सीद योऽस्मस्पाकतर इति ब्रह्मासनमन्वीक्षते ॥५॥ निरस्तः पराग्वसुः सह पाप्मना निरस्तः सोऽस्तु योऽस्मान्द्वेष्टि यश्च वयं द्विष्म इति दक्षिणा तृणं निरस्यति ॥६॥ तदन्वालभ्य जपतीदमहमर्वाग्वसोः सदने सीदाम्यृतस्य सदने सीदामि सत्यस्य सदने सीदामीष्टस्य सदने सीदामि पूर्त्तस्य सदने सीदामि मामृषदेव बर्हिः स्वासस्थं स्वाध्यासदेयमूर्णम्रदमनभिशोकम् ॥७॥ विमृग्वरीमित्युपविश्यासनीयं ब्रह्मजपं जपति बृहस्पतिर्ब्रह्मा ब्रह्मसदन आसिष्यते बृहस्पते यज्ञं गोपाय यदुदुद्धत उन्निवतः शकेयमिति ॥८॥ दर्भैः स्रुवं निर्मृज्य निष्टप्तं रक्षो निष्टप्ता अरातयः प्रत्युष्टं रक्षः प्रत्युष्टा अरातय इति प्रतप्य ॥९॥ मूले स्रुवं गृहीत्वा जपति विष्णोर्हस्तोऽसि दक्षिणः पूष्णा दत्तो बृहस्पतेः । तं त्वाहं स्रुवमाददे देवानां हव्यवाहनम् ॥ अयं स्रुवो विदधाति होमाञ्छताक्षरश्छन्दसा जागतेन । सर्वा यज्ञस्य समनक्ति विष्ठा बार्हस्पत्येष्टिः शर्म्मणा दैव्येनेति ॥१०॥ ओं भूः शं भूत्यै त्वा गृह्णे भूतय इति प्रथमं ग्रहं गृह्णाति ॥११॥ ओं भुवः शं पुष्ट्यै त्वा गृह्णे पुष्टय इति द्वितीयम् ॥१२॥ ओं स्वः

कुशों को आस्तरण करके "आहे दैधिषव्यो०" इत्यादि मंत्र से ब्रह्मा अपने आसन को देखे ॥५॥ "निरस्तः, पराग्वसु०" इत्यादि मंत्र से आसन से तृण लेकर वाम हाथ से दक्षिण की ओर फेंक देवे ॥६॥ उस को लेकर "इदमह मर्वाग्वसो०" इत्यादि मंत्रों से उपवेशन करके आसनीय ब्रह्म जप "बृहस्पतिर्ब्रह्मा०" इत्यादि मंत्र का जप करे ॥७॥८॥ कुशों से स्रुवा को मार्जन करके "विष्टप्तं रक्षो०" इत्यादि मंत्र से तपा कर स्रुव को जड़ में पकड़ कर "विष्णोर्हस्तोऽसि०" इत्यादि मंत्र का जप करे ॥९॥ १०॥ "ओं भूः शं भूत्यै०" इत्यादि से प्रथम ग्रह को ग्रहण करे। "ओं भुवः०" इत्यादि से दूसरे को पकड़े ॥ "ओं स्वः०" इत्यादि से तीसरे

शं त्वा गृह्णे सहस्रपोषायेति तृतीयम् ॥१३॥ ओं जनच्छं त्वा गृह्णेऽपरिमितपोषायेति चतुर्थम् ॥१४॥ राजकर्माभिचारिकेष्वमुष्य त्वा प्राणाय गृह्णेऽपानाय व्यानाय समानायोदानायेति पञ्चमम् ॥१५॥ अग्नावग्नि-र्हृदा पूतं पुरस्ताद्युक्तो यज्ञस्य चक्षुरिति जुहोति ॥१६॥ पश्चादग्नेर्मध्यदेशे समानत्र पुरस्ताद्धोमान् ॥१७॥ दक्षि-णेनाग्निमुदपात्र आज्याहुतीनां सम्पातानानयति ॥१८॥ पुरस्ताद्धोम आज्यभागः संस्थितहोमः समृद्धिः शान्ता-नामिति ॥१९॥ एतावाज्यभागौ ॥२०॥ ॥३॥

वृष्णे बृहते स्वर्विदे अग्नये शुल्कं हरामि त्विषीमते । स न स्थिरान्बलवतः कृणोतु ज्योक्त नो जीवातवे दधात्वग्नये स्वाहेत्युत्तरपूर्वार्द्धे आग्नेयमाज्यभागं जुहोति॥१॥दक्षिणपूर्वार्द्धे सोमाय त्वं सोम दिव्यो नृचक्षाः सुगा अस्मभ्यं पथो अनुख्यः । अभि नो गोत्रं विदुष इव नेषोऽछा नो वाचमुशतीं जिगासि सोमाय स्वाहेति ॥२॥

को, "ओं जनच्छं०" इत्यादि से चौथे को पकड़े ॥११॥१२॥१३॥१४॥ राजकर्म्म और आभिचारिक कर्म्मों में "अमुष्य त्वा०" इत्यादि से पञ्चम को पकड़े ॥१५॥ "अग्नावग्निर्हृदा०" इत्यादि से अविधिकर्म होने से एक एक स्रुव करके आज्यधानी से आज्य की आहुतियाँ देवे ॥१६॥ अग्नि के पश्चात् मध्य देश में समान ही पुरस्ताद्धोम, अग्नि के दक्षिण भाग में जलपात्र आज्याहुतियों के संपातों को लावे अर्थात् हुतशेषों को लावे ॥ पुरस्ताद्धोम, आज्य भाग, संस्थित होम, समृद्धि होम, और शान्त होमों के बचे होमों को उदपात्र में रक्खे और इन आज्यभाग की दो आहुतियों को भी ॥१७॥१८॥१९॥२०॥ यह तीसरी कण्डिका समाप्त हुई ॥ ३ ॥

"वृष्णे बृहते०" इत्यादि मंत्र से अग्नि के उत्तर पूर्वार्द्ध में आग्नेय आज्य भाग की आहुति देवे ॥१॥ और दक्षिण पूर्वार्द्ध में "त्वं सोम दिव्यो०" इत्यादि से आहुति करे ॥२॥ पुरस्ताद्धोम और आज्यभाग के

मध्ये हविः ॥३॥ उपस्तीर्याज्यं संहताभ्यामङ्गुलिभ्यां द्विर्हविषोऽवद्यति मध्यात्पूर्वार्द्धाच्च ॥४॥ अवत्तमभिघार्य द्विर्हविः प्रत्यभिघारयति ॥५॥ यतो यतोऽवद्यति तदनु-पूर्वम् ॥६॥ एवं सर्वाण्यवदानानि ॥७॥ अन्यत्र सौविष्ट-कृतात् ॥८॥ उदेनमुत्तरं नयेति पुरस्ताद्धोमसंहतां पूर्वाम् ॥९॥ एवं पूर्वां पूर्वां संहतां जुहोति ॥१०॥ स्वाहान्ताभिः प्रत्यृचं होमाः ॥११॥ यामुत्तरामग्नेराज्यभागस्य जुहोति रक्षोदेवत्या सा यां दक्षिणतः सोमस्य पितृदेवत्या सा ॥१२॥ तस्मादन्तरा होतव्या देवलोक एव हूयन्ते ॥१३॥ यां हुत्वा पूर्वामपरां जुहोति सापक्रामन्ती स पापी-यान्यजमानो भवति ॥१४॥ यां परां परां संहतां जुहोति साभिक्रामन्ती स वसीयान् यजमानो भवति ॥१५॥

होम के मध्य भाग में प्रधान हवि की आहुतियाँ देवे ॥३॥ आज्य को उतार कर स्रुव से उपस्तरण मिली हुई दो अङ्गुलियों से (मध्यमा और प्रदेशिनी से) स्रुच में एक स्रुव धर कर दो अङ्गुलियों से अवदान करे पूर्वार्द्ध मध्य से ॥४॥ अवदान को अभिघार कर दो बार आहुति कर के पुनः अभिघार देवे ॥५॥ जैसे २ अवदान करे उसी क्रम से उस हवि का ढार देवे ॥६॥ इसी प्रकार उक्त अवदान नियम से प्रत्येक ऋचा से अवदान करे ॥७॥ सौविष्ट कृत को छोड़ कर अन्यत्र समझना ॥८॥ "उदेनमुत्तरं नय०" इस प्रथम ऋचा से पुरस्ताद्धोम देश की आहुति देवे ॥९॥ इस २ प्रकार पूर्व २ देश में मिली हुई पूर्व २ आहुतियाँ देवे ॥१०॥ प्रत्येक आहुति के स्वाहान्त मंत्र के साथ करे ॥११॥ अग्नि के उत्तर भाग में जो आज्य भाग की आहुति होती है वह रक्षो देवता के लिये जानो । जो दक्षिण भाग में सोम की आहुति होती है वह पितरों के लिये जानो ॥१२॥ इसलिये मध्य में आहुति देवे—यह आहुति देव लोक ही में होती है जानो ॥१३॥ जिस आहुति करके—पूर्वा अपरा आहुति होती है, वह अपक्रामन्ती नाम की आहुति है जिसके करने से यजमान पापी होता है ॥१४॥ जो परा परा मिली आहुति होती है

यामनग्नौ जुहोति सान्धा तया चक्षुर्यजमानस्य मीयते सोऽन्धंभावुको यजमानो भवति ॥१६॥ यां धूमे जुहोति सा तमसि हूयते सोऽरोचको यजमानो भवति ॥१७॥ यां ज्योतिष्मति जुहोति तया ब्रह्मवर्चसी भवति तस्माज्ज्योतिष्मति होतव्यम् ॥१८॥ एवमस्मै क्षत्रमग्नीषोमाविस्यग्नीषोमीयस्य ॥१९॥४॥

अग्नीषोमा सवेदसा सहूती वनतं गिरः । सं देवत्रा बभूवथुः ॥ युवमेतानि दिवि रोचनान्यग्निश्च सोम सक्रतू अधत्तम् । युवं सिन्धूँरभिशस्तेरवद्यादग्नीषोमावमुञ्चतं गृभीतान् ॥ अग्नीषोमा य आहुतिं यो वां दाशाद्धविष्कृतिम् । स प्रजया सुवीर्यं विश्वमायुर्व्यश्नवत् ॥१॥ इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः । तद्वां चेति प्रवोर्यम् ॥ श्नथद्वृत्रमुत सनोति वाजमिन्द्रा यो अग्नी स हुरी सपर्यात् । इरज्यन्ता वसव्यस्य भूरेः सहस्तमा सहसा वाजयन्ता ॥ इन्द्राग्नी अस्मान् रक्षतां यौ प्रजानां प्रजावती । स प्रजया सुवीर्यं विश्वमायुर्व्यश्नवत् ॥ गोमद्धिरण्यवद्वसु यद्वामश्वावदीमहे ।

उसको अभिक्रामन्ती कहते हैं–उससे यजमान ईश्वर (शक्तिशाली) होता है ॥१५॥ जो आहुति अग्नि बुत जाने पर भस्म में होती है उसका करने वाला यजमान नेत्र से दृष्टि हीन होता है ॥१६॥ जो धूमयुक्त अग्नि में आहुति करता है वह गुणयुक्त होता हुआ भी प्रकाश रहित होता है ॥१७॥ जो ज्वालायुक्त अग्नि में आहुति करता है वह यजमान ब्रह्मवर्चस्वी होता है अतएव ज्वालायुक्त अग्नि में आहुति देवे ॥१८॥ इसी प्रकार "अस्मै क्षत्रम्०" इत्यादि से अग्नीषोमीय देवताओं की आहुतियाँ देवे ॥१९॥ यह चौथी कण्डिका पूरी हुई ॥४॥

"अग्नीषोमा०" इत्यादि से लेकर "तद्वनेमहि स्वाहा" तक के मंत्रों

इन्द्राग्नीतद्वनेमहि स्वाहेति ॥२॥ ऐन्द्राग्नस्य हविषोऽमावास्यायाम् ॥३॥ प्राक्स्विष्टकृतः पार्वणौ होमौ समृद्धिहोमाः काम्यहोमाश्च ॥४॥ पूर्णापश्चादिति पौर्णमास्याम् ॥५॥ यत्ते देवा अकृण्वन् भागधेयमित्यमावास्यायाम् ॥६॥ आकूत्यै त्वा स्वाहा। कामाय त्वा स्वाहा । समृधे त्वा स्वाहा। आकूत्यै त्वा कामाय त्वा समृधे त्वा स्वाहा। ऋचा स्तोमं समर्धय गायत्रेण रथन्तरम्। बृहद्गायत्रवर्तनि स्वाहा॥७॥ पृथिव्यामग्नये समनमन्निति सन्नतिभिश्च ॥८॥ प्रजापते न त्वदेतान्यन्य इति च॥९॥ उपस्तीर्याज्यं सर्वेषामुत्तरतः सकृत्सकृदवदाय द्विरवत्तमभिघारयति ॥१०॥ न हवींषि ॥११॥ आ देवानामपि पन्थामगन्मयच्छक्रवाम तदनुप्रवोढुम्॥ अग्निर्विद्वान्सं यजात्स इद्धोता सोऽध्वरान्स ऋतून्कल्पयात्यग्नये स्विष्टकृते स्वाहेत्युत्तरपूर्वार्द्धेऽवयुतं हुत्वा सर्वप्रायश्चित्तीयान् होमाञ्जुहोति ॥१२॥ स्वाहेष्टेभ्यः स्वाहा । वषडनिष्टेभ्यः स्वाहा । भैषजं स्विष्ट्यै स्वाहा । निष्कृतिर्दुरिष्ट्यै स्वाहा । दैवीभ्यस्तनूभ्यः स्वाहा ॥ अयाश्चाग्नेऽस्यनभिशस्तिश्च सत्यमित्त्वमया

को पढ़कर आहुतियाँ देवे ॥२॥ अमावास्या को ऐन्द्राग्नी की आहुतियाँ देवे ॥३॥ और स्विष्टकृत होम के पहिले दो होम पार्वण के–समृद्धि होम और काम्य होम ॥४॥ "पूर्णा पश्चात्०" इत्यादि से पौर्णमासी को होम करे ॥५॥ "यत्ते देवा०" इत्यादि से अमावास्या को होम करे ॥६॥ "आकूत्यै स्वाहा०" इत्यादि "वर्त्तनि स्वाहा" तक ॥७॥ और "पृथिव्यां०" इत्यादि से लेकर "त्वदेतान्यन्य०" तक मंत्रों से आज्य की आहुतियाँ देवे ॥८॥ ॥९॥ आज्य उपस्तरण करके सबके उत्तर भाग में एक २ बार लेकर दो अवदान का अभिघार करे और एक हवि की आहुति देवे ॥१०॥११॥ "आदेवानामपि०" इत्यादि मंत्रों से उत्तर पूर्वार्द्ध भाग में अवयुत होम की आहुति देकर सर्व प्रायश्चित्तीय होमों की "स्वाहेष्टेभ्यः स्वाहा०"

असि । अयासा मनसा कृतोऽयास्यं हव्यमूहिषे । अया नो धेहि भेषजं स्वाहेत्यों स्वाहा भूः स्वाहा भुव स्वाहा स्वः स्वाहों भूर्भुवःस्वःस्वाहेति ॥१३॥५॥

यन्मे स्कन्नं मनसो जातवेदो यद्वा स्कन्दद्धविषो यत्र यत्र । उत्प्रुषो विप्रुषः संजुहोमि सत्याः सन्तु यजमानस्य कामाः स्वाहेति ॥१॥ यन्मे स्कन्नं यदस्मृतीति च स्कन्नास्मृति होमौ ॥२॥ यदद्य त्वा प्रयतीति संस्थितहोमाः ॥३॥ मनसस्पत इत्युत्तमं चतुर्गृहीतेन ॥४॥ बर्हिराज्यशेषेऽनक्ति पृथिव्यै त्वेति मूलमन्तरिक्षाय त्वेति मध्यं दिवे त्वेत्यग्रम् ॥५॥ एवं त्रिः ॥६॥ सं बर्हिरक्तमित्यनुप्रहरति यथा देवतम् ॥७॥ स्रुवमग्नौ धारयति ॥८॥ यदाज्यधान्यां तत्संस्रावयति संस्रावभागास्तविषा बृहन्तः प्रस्तरेष्ठा बर्हिषदश्च देवाः । इमं यज्ञमभि विश्वे गृणन्तः स्वाहा देवा अमृता मादयन्तामिति ॥९॥ स्रुवोऽसि घृतादनिशितः । सपत्नक्षयणो दिवि षीद । अन्त-

---

इत्यादि मंत्रों से आहुतियाँ देवे ॥१२॥१३॥ यह पाँचवी कण्डिका समाप्त हुई ॥५॥

"यन्मे स्कन्नं०" इत्यादि से आज्य की आहुति देवे॥१॥"यन्मे स्कन्नं०" और "अस्मृति" द्वारा स्कन्न और अस्मृति होम करे ॥२॥ "यदद्य०" से संस्थित होम की आहुति करे ॥३॥ "मनसस्पते०" से संस्थित होम के अन्त में चतुर्गृहीत द्वारा आहुति देवे ॥४॥ वेदि के पास के स्तरण को लाकर आज्य शेष जो आज्यधानी में रहे उसको "पृथिव्यै०" से मूल को "अन्तरिक्षाय त्वा०" से मध्य को "दिवे त्वा०" से अग्रभाग को सिक्त करे ॥५॥ इसी प्रकार तीन बार करे ॥६॥ "सं बर्हिरक्तं०" इत्यादि से यथा दैवत देवे ॥७॥ स्रुव को अग्नि में स्थापन करे ॥८॥ जो आज्यधानी में हो उसे "संस्रावभागा हविषा०" इत्यादि से संस्रव होम करे ॥९॥ और "स्रुवोऽसि०" इत्यादि से पूर्व भाग में दण्ड की भाँति स्रुवको

रिक्षे सीद पृथिव्यां सीदोत्तरोऽहं भूयासमधरे मत्सपत्ना इति स्रुवं प्राग्दण्डं निदधाति ॥१०॥ विमुञ्चामि ब्रह्मणा जातवेदसमग्निं होतारमजरं रथस्पृतम् । सर्वा देवानां जनिमानि विद्वान् यथाभागं वहतु हव्यमग्नि-रग्नये स्वाहेति समिधमादधाति ॥११॥ एधोऽसीति द्वितीयां समिदसीति तृतीयाम् ॥१२॥ तेजोऽसीति मुखं विमार्ष्टि ॥१३॥ दक्षिणेनाग्निं त्रीन्विष्णुक्रमान् क्रमते विष्णोः क्रमोऽसीति दक्षिणेन पादेनानुसंहरति सव्यम् ॥१४॥ सूर्यस्यावृतमित्यभिदक्षिणमावर्तते ॥१५॥ अग-न्मस्वरित्यादित्यमीक्षते ॥१६॥ इन्द्रस्य वचसा वयं मित्र-स्य वरुणस्य च । ब्रह्मणा स्थापितं पात्रं पुनरुत्थापयाम-सीत्यपरेणाग्निमुदपात्रं परिहृत्योत्तरेणाग्निमापो हि ष्ठा मयोभुव इति मार्जयित्वा बर्हिषि पत्न्याञ्जलौ निन-यति समुद्रं वः प्रहिणोमीतीदं जनास इति वा ॥१७॥ वीरपत्न्यहं भूयासमिति मुखं विमार्ष्टि ॥१८॥ व्रतानि व्रतपतय इति समिधमादधाति ॥१९॥ सत्यं स्वर्तेनेति

धर देवे ॥१०॥ "विमुञ्चामि०" इत्यादि से समिध को लाकर धरे ॥११॥ "एधोऽसि०" से दूसरी समिध, "समिदसि०" से तीसरी, "तेजोऽसि" से मुख का मार्जन करे ॥१२॥१३॥ "विष्णोः क्रमोऽसि०" इत्यादि से वेदि के जघन प्रदेश से पहिले दहिने पद को आगे कर उसके पीछे २ वाम पद से तीन वार परिक्रमा करे ॥ और "सूर्यस्यावृतं०" इत्यादि से दहिने ओर फेरा लगावे ॥१४॥१५॥ और "अगन्म०" से सूर्य को देखे ॥१६॥ अग्नि के पश्चिम भाग से जलपात्र को लेकर अग्नि के उत्तर में "आपो हि ष्ठा०" इत्यादि से उसका मार्जन करके पत्नी की अञ्जलि में कुश धर कर कांसे के पात्र को "समुद्रं वः०" इत्यादि से या "इदंज-नास०" से घुमावे ॥१६॥१७॥ "वीरपत्न्यहं०" इत्यादि से पत्नी अपने हाथ से मुख का मार्जन करे ॥१८॥ और "व्रतानि व्रतपतय०" से समिद्

परिषिच्योदङ्ङ्ग्नि हविरुच्छिष्टान्युद्वासयति ॥२०॥ पूर्णपात्रं दक्षिणा ॥२१॥ नादक्षिणं हविः कुर्वीत यः कुरुते कृत्यामात्मनः कुरुत इति ब्राह्मणम् ॥२२॥ अन्वाहार्यं ब्राह्मणान् भोजयति ॥२३॥ यद्वै यज्ञस्यानन्वितं भवति तदन्वाहार्येणान्वाह्रियते॥२४॥ एतदन्वाहार्यस्यान्वाहार्यत्वम् ॥२५॥ ईज्या वा अन्ये देवाः सपर्येण्या अन्ये देवाः। ईज्या देवा ब्राह्मणाः सपर्येण्याः ॥२६॥ यज्ञेनैवेज्यान् प्रीणात्यन्वाहार्येण सपर्येण्यान् ॥२७॥ तेऽस्योभे प्रीता यज्ञे भवन्तीति॥२८॥इमौ दर्शपूर्णमासौ व्याख्यातौ॥२९॥ दर्शपूर्णमासाभ्यां पाकयज्ञाः ॥३०॥ अथाप्यपरो हवनयोगी भवति ॥३१॥ कुम्भीपाकादेव व्युद्धारं जुहुयात्

का आधान करे एवं "सत्यं त्वर्तेन०" इत्यादि से जल का छीटा दे उत्तर की ओर जल के साथ बची हवि को कर्त्ता स्वीकार करे। पुनः ब्रह्मा और कर्त्ता के पोषणों के योग्य पूर्णपात्र (धान्यादि से भरा) दक्षिणा में देवे ॥१९॥२०॥२१॥ बिना दक्षिणा के हवन न करे। क्योंकि जो ऐसा करता है वह मानो अपना नाश करता है—ऐसा ब्राह्मणग्रंथ का वचन है ॥२२॥ ब्राह्मणों को ओदनादि भोजन करावे ॥२३॥ जो पदार्थ यज्ञ के अनुकूल होता है वही श्रद्धापूर्वक व्यवहृत होता है अर्थात् यज्ञार्थ लाया जाता है ॥२४॥ यह अन्वाहार्य्य का अन्वाहार्यत्व है ॥२५॥ ईज्य वा पूज्य अन्य देवता होते हैं और सपर्येण्य अन्य देवता होते हैं ॥ जिनमें यज्ञ से सत्कार योग्य देवगण होते हैं और वस्त्र, भोजन, धन, सेवा आदि से पूजने योग्य ब्राह्मण होते हैं। अतएव यज्ञों द्वारा देवगण को और भोजनादि द्वारा ब्राह्मणों को प्रसन्न करना चाहिये। ये दोनों ही (देव, ब्राह्मण) यजमान द्वारा यज्ञ में प्रसन्न होते हैं तब ही यज्ञों का फल यजमान को होता है ॥२६॥२७॥२८॥ इन दोनों दर्श और पौर्णमास का व्याख्यान हुआ और दर्श पौर्णमास द्वारा पाकयज्ञ सब कहे गये ॥२९॥३०॥ इसके अनन्तर दूसरा भी हवन योग्य है अर्थात् आग्नेय और अग्नीषोमीय के अतिरिक्त अन्य भी यज्ञ हैं ॥३१॥ कुम्भीपाक से ही लेकर आहुतियाँ देवे ॥

॥ ३२ ॥ अधिश्रयणपर्यग्निकरणाभिघारणोद्वासनालङ्करणोत्पवनैः संस्कृत्य ॥३३॥ अथापि श्लोकौ भवतः ॥ आज्यभागान्तं प्राक् तन्त्रमूर्ध्वं स्विष्टकृता सह । हवींषि यज्ञ आवापो यथा तन्त्रस्य तन्तवः । पाकयज्ञान् समासाद्यैकाज्यानेकबर्हिषः । एकस्विष्टकृतः कुर्यान्नानापि सति दैवतेति ॥३४॥ एतेनैवामावास्यो व्याख्यातः ॥३५॥ ऐन्द्राग्नोऽत्र द्वितीयो भवति ॥ ३६ ॥ तयोर्व्यतिक्रमे त्वमग्ने व्रतपा असि कामस्तदग्र इति शान्ताः ॥३७॥६॥

अश्नात्यनादेशे स्थालीपाकः ॥ १ ॥ पुष्टिकर्मसु सारूपवत्से ॥२॥ आज्यं जुहोति ॥३॥ समिधमादधाति ॥४॥

अधिश्रयण, पर्यग्निकरण, अभिघारण, उद्वासन, अलङ्करण, और उत्पवन आदि संस्कार करके आहुति देवे ॥ ३२॥३३ ॥ यहाँ दो श्लोक गोपथ ब्राह्मणों के हैं। आज्य भाग के अन्त के होम पूर्वतन्त्र स्विष्ट कृत के सहित हवियों के यज्ञ, यह आवाप (प्रधान) है । और जैसे तन्त्र की सन्तति वा सूत्र स्वरूप है। यदि पाक यज्ञ के करने में ऐसा अवसर आ पड़े कि एक आज्य हो और अनेक बर्हि। (हवि रखने के कुश के पात्र) हों तो एक ही स्विष्टकृत की आहुति करे। चाहे भिन्न २ अनेक दैवत हवन क्यों न हों ॥३४॥ इसीके द्वारा अमावास्या में कर्त्तव्य ऐन्द्राग्नि की व्याख्या हुई जानो ॥३५॥ यहाँ ऐन्द्राग्न दूसरा है जानो ॥३६॥ इन दोनों के व्यतिक्रम होने पर "त्वमग्ने व्रतपा असि", "कामस्तदग्र०" से शान्ता नाम की आहुति करनी चाहिये ॥३७॥ यह छठी कन्डिका पूरी हुई ॥ ६ ॥

इस संहिता विधि में जहाँ २ "अश्नाति" या "आशयति" करके कहा गया है वहाँ २ स्थालीपाक की विधि जानना ॥ १ ॥ जैसे पुष्टि कर्मों में "सारूपवत्सा" स्थालीपाक समझना ॥२॥ जहाँ "जुहोति" कहा गया है परन्तु हवन करने का विधान नहीं किया गया वहाँ घृत समझना ॥३॥ जहाँ होम का विधान हो परन्तु होतव्य (किस वस्तु का होम करे सो नहीं लिखा है) वहाँ आज्य की आहुति करे ॥ ३ ॥ जहाँ केवल

आवपति व्रीहियवतिलान् ॥ ५ ॥ भक्षयति क्षीरौदनपुरोडाशरसान् ॥ ६ ॥ मन्थौदनौ प्रयच्छति ॥ ७ ॥ पूर्वं त्रिषप्तीयम् ॥ ८ ॥ उदकचोदनायामुदपात्रं प्रतीयात् ॥ ९ ॥ पुरस्तादुत्तरतः संभारमाहरति ॥ १० ॥ गोरनभिप्रापाद्वनस्पतीनाम् ॥ ११ ॥ सूर्योदयनतः ॥ १२ ॥ पुरस्तादुत्तरतोऽरण्ये कर्मणां प्रयोगः ॥ १३ ॥ उत्तरत उदकान्ते प्रयुज्य कर्माण्यपां सूक्तैराप्लुत्य प्रदक्षिणमावृत्याप उपस्पृश्यानवेक्षमाणाग्राममुदाव्रजन्ति ॥ १४ ॥ आज्यबन्ध्याप्लवनयानभक्ष्याणि सम्पातवन्ति ॥ १५ ॥ सर्वाण्यभिमन्त्र्याणि ॥ १६ ॥ स्त्र्यव्याधितावा प्लुतावसिक्तौ

समिद् का आधान लिखा है परन्तु यह नहीं लिखा है कि अमुककाष्ठ आदि हो । वहाँ होम के योग्य काठ ग्रहण करना चाहिये ॥४॥ व्रीहि (धान्य), जौ, और तिलों का आवपन करे अर्थात् अग्नि में डाल कर आहुति करे॥ ॥५॥ जहाँ "भक्षयति" का विधि हो वहाँ क्षीरोदन, पुरोडाश, रसों को भक्षण करे करावे ॥६॥ जहाँ "प्रयच्छति" का विधान हो वहाँ मन्थ और ओदन देवे ॥७॥ "पूर्वं त्रिषप्तीयम्" कहने से "ये त्रिषप्ता०" इस सूक्त को लेवे ॥८॥ जहाँ उदक का संस्कार कहा गया हो वहाँ जलपात्र का संस्कार समझना ॥९॥ निवास स्थान से संभार लाकर वेदि के पूर्व उत्तर भाग में धरे ॥१०॥ जहाँ वनस्पतियों के पास के फूल, पत्र, आदि लाने का विधान हो, और उसके मिलने में कठिनता हो तो गौशाला के पास के वानस्पत्य के प्रयोजनीय अंश को लेवे ॥११॥ सूर्य्य के उदय समय संभार आदि को लावे ॥१२॥ निवास स्थान के पूर्व या उत्तर-जंगल में कर्म करे ॥१३॥ सब ही कर्म जल के उत्तर भाग में कर के "अम्बयो यन्ति शम्भुमयो भू हिरण्यवर्णादयः कृष्णं नियानं ससुषी· र्हिमवतः प्रस्रवन्ति वायोः पूतः०" ये जलसूक्त हैं । जलसूक्तों से नहा कर परिक्रमा कर जल को स्पर्श कर के पीछे न देखते हुए ग्राम को जावे ॥१४॥ "आज्य" आदि सबों में सम्पात् का अभिमंत्रण होता है । यज्ञार्थ सब ही पदार्थों का अभिमंत्रण करे ॥१५॥१६॥ स्त्री, रुग्ण पुरुष,

शिरस्तः प्रक्रम्याप्रपदात्प्रमार्ष्टि ॥ १७ ॥ पूर्वं प्रपाद्य प्रयच्छति ॥ १८ ॥ त्रयोदश्यादयस्तिस्रो दधिमधूनि वासयित्वा बध्नाति ॥ १९ ॥ आशयति ॥२०॥ अन्वारब्धायामभिमन्त्रणहोमाः ॥ २१ ॥ पश्चादग्नेश्चर्मणि हविषां संस्कारः ॥ २२ ॥ आनडुहः शकृत्पिण्डः ॥२३॥ जीवघात्यं चर्म ॥२४॥ अकर्णोऽश्मा ॥२५॥ आप्लवनावसेचनानामाचामयति च ॥२६॥ सम्पातवतामश्नाति न्यङ्क्ते वा ॥ २७॥ अभ्याधेयानां धूमं नियच्छति ॥ २८ ॥ शुचिना कर्मप्रयोगः ॥२९॥७॥

पुरस्ताद्धोमवत्सु निशाकर्मसु पूर्वाह्णे यज्ञोपवीती शालानिवेशनं समूहयत्युपवत्स्यद्भक्तमशित्वा स्नातोऽहतवसनः प्रयुङ्क्ते ॥१॥ स्वस्त्ययनेषु च ॥ २ ॥ इज्यानां

इनमें से स्त्री तो जल में गोता लगाकर स्नान करे और रुग्ण पुरुष शिर से पैर तक जल से मार्जन करे ।।१७।। पहिले प्रपादन फिर मन्थौदन को देवे ।।१८।। और त्रयोदशी आदि तीन तिथियों में दही, मधु, यज्ञ कराने वाले को कर्ता खिलावे और वासित को बान्ध देवे ।।१९।। इसके पश्चात् अग्नि के पास जो चर्म है, उसमें हवि का संस्कार करे ।।२०।। बैल के गोमय का पिण्ड बनावे। बलवान् जीवित पशु के चर्म को अर्थात् गोलाकार सींगवाले पशु के चर्म को लाकर धरे ।।२१।।२२।।२३।।२४।।२५।। आप्लुवन, अवसेचन, का कारयिता कर्ता से आचमन करावे ।। २६ ।। आहुति के सम्पात को आँखों में आञ्जे या खावे ।। २७ ।। अभ्याधेय पदार्थों के धूम को कारयिता स्वयं ग्रहण करे ।।२८।। और कर्मों की समाप्ति में पवित्रता से कर्म का प्रयोग करे। नित्य, नैमित्तिक, काम्य कर्म्मों को स्नान कर के करे ।।२९।।३०।। यह सातवी कण्डिका समाप्त हुई ।।७।।

पुरस्ताद्धोमवाले निशाकर्म्मों में पूर्वाह्ण में यज्ञोपवीती होकर अग्निशाला में बैठकर अग्नि का समूहन करे। उपवास रहकर, भात खाकर, नहाकर, अखण्ड चीरे दार नये वस्त्र धारण कर–कर्म करने में प्रवृत्त होवे ऐसा कोई आचार्य मानते हैं ।।१।। स्वस्त्ययन कर्मों में भी ऐसा ही करे

दिश्यान् बलीन् हरति ॥ ३ ॥ प्रतिदिशमुपतिष्ठते ॥ ४ ॥ सर्वत्राधिकरणं कर्तुर्दक्षिणा ॥ ५ ॥ त्रिरुदकक्रिया ॥६॥ अनन्तराणि समानानि युक्तानि ॥७॥ शान्तं संभारम् ॥८॥ अधिकृतस्य सर्वम् ॥९॥ विषये यथान्तरम् ॥१०॥ प्रयच्छ पर्शुमिति दर्भलवनं प्रयच्छति ॥ ११ ॥ अरातीयोरिति तक्षति ॥१२॥ यत्त्वा शिक इति प्रक्षालयति ॥१३॥ यद्य-स्कृष्ण इति मन्त्रोक्तम् ॥ १४ ॥ पलाशोदुम्बरजम्बुकाम्पी-लस्रग्वङ्कशिरीषस्रक्त्यवरणबिल्वजङ्गिडकुटकगर्ह्यगलावल-वेतसशिम्बलसिपुनस्यन्दनारणिकाश्मयोक्ततुन्युपूतदार-वः शान्ताः ॥ १५ ॥ चितिप्रायश्चित्तिशमीशमका-

॥२॥ स्वस्त्ययन याग देवताओं के लिये प्रत्येक दिशाओं में बलि, उपहार देवे और प्रति दिशा में उपस्थान करे ॥३॥४॥ सब ही यज्ञकर्त्ता क दक्षिणा देवे ॥५॥ विधि कर्मों में जहाँ २ जल से कर्म करने का विधान हो वहाँ २ जल क्रिया तीन बार करे ॥६॥ संहिता में जो २ सूक्त अनन्तर कहे गये है, जिनके प्रयोजन समान हों उनको इकत्र कर प्रयोग करे ॥७॥ सब ही शान्तकर्मों में शान्तसम्भार, दर्भ, समिद्, आदि । अभिचार कर्मों में रौद्र, आङ्गिरस, सम्भार जानना ॥८॥ स्रुच्, स्रुव, समिद्, काष्ठ आदि मणि, द्रव्य काष्ठ करना चाहिये । मादानक श्रृत क्षीरोदन खावे । और मादानक के चमसा में एक रूप रंग के वत्स के गौ के दूध में क्षीरौदन पकावे । मंत्र कर्म में जहाँ द्रव्य का सन्देह हो वहाँ निकृष्ट द्रव्य ग्रहण करे ॥९॥१०॥ "प्रयच्छ पर्शु०" से दर्भ काटने का अस्त्र देवे ॥ ११ ॥ "अरातीयोः" से उलूखल, मुसल, काठ, एवं अन्य कार्य के लिये लकड़ी काटे, चीरे-फाड़े ॥१२॥ "यत्त्वाशिक" से प्रक्षालन करे ॥१३॥ "यद्यत्कृष्णः" से उलूखल मुसल को प्रक्षा-लन करे ॥१४॥ पलाश, उदुम्बर, जम्बु, काम्पील, स्रक्, वंघ, शिरीष, स्रक्त्य, वरण, बिल्व, जङ्गिड़, कुटक, गर्ह्य, गलावल, वेतस, शिम्बल, सिपुन, स्यन्दन, अरणिकाष्ठ, अश्मयोक्त, तुन्यु, पूतदारु ये शान्त कर्म में प्रयोजनीय हैं ॥१५॥ चिति, प्रायश्चित्ति, शमी, शमका, सवंशा, शाम्य-

सर्वंशाशाम्यवाकातलाशापलाशवाशाशिंशपाशिम्बल-सिपुनदर्भापामार्गाकृतिलोष्टवल्मीकवपादूर्वाप्रान्तव्रीहि-यवाः शान्ताः ॥ १६ ॥ प्रमन्दाशीरशलल्युपधानशक-धूमा जरन्तः ॥ १७ ॥ सीसनदीसीसे अयोरजांसि कृकलासशिरः सीसानि ॥ १८ ॥ दधि घृतं मधूदकमिति रसाः ॥ १९ ॥ व्रीहियवगोधूमोपवाकातलप्रियङ्गुश्या-माका इति मिश्रधान्यानि ॥ २० ॥ ग्रहणमा ग्रह-णात् ॥ २१ ॥ यथार्थमुदर्कान्योजयेत् ॥ २२ ॥ इहैव ध्रुवामेह यातु यमो मृत्युः सत्यं बृहदित्यनुवाको वास्तो-ष्पतीयानि ॥ २३ ॥ दिव्यो गन्धर्व इमं मे अग्ने यौ ते मातेति मातृनामानि ॥२४॥ स्तुवानमिदं हविर्निस्साला-मरायक्षयणं शं नो देवी पृश्निपर्ण्या पश्यति तान्सत्यौ-जास्त्वया पूर्वं पुरस्तायुक्तो रक्षोहणमित्यनुवाकश्चात-नानि ॥ २५ ॥ ८ ॥

वाका, तलाशा, पलाशा, वाशा, शिंशपा, शिम्बल, सिपुन, दर्भ, अपा-मार्ग, आकृतिलोष्ट, वल्मीक, वपा, दूर्वा, प्रान्त, व्रीहि, यव ॥१६॥ प्रमन्द, उशीर, शलली, उपधान, शकधूम, ये सब पुराने लेना चाहिये ॥१७॥ लोहकीट, गिरगिट का शिर, और सीस कहा गया है वहाँ उनकी जगह नदीफेन लेना चाहिये ॥१८॥ रस के काम में दही, घी, मधु, जल लेना चाहिये ॥१९॥ धान्य, जौ, गोधूम, उपवाक, तिल, प्रियङ्गु, श्यामा इन को मिश्र धान्य कहते हैं ॥२०॥ संहिता विधि में अपरिमित प्रयोग में ग्रहण अनियम हैं अतएव जहाँतक ग्रहण हो उसको ग्रहण करे ॥२१॥ साकांक्ष वचन की परिसमाप्ति के लिये वचन् को "उदर्क" कहते हैं । जहाँ ऐसा हो वहाँ उदर्कान् वचनों की योजना करे ॥२२॥ "इहैव ध्रुवा मेह" इत्यादि अनुवाक "वास्तोष्पतीय" हैं ॥२३॥ "दिव्यो गन्धर्व" इत्यादि "मातृनाम" है ॥२४॥ "स्तुवानमिदं०" इत्यादि यह अनुवाक चातन गण है ॥२५॥ यह अष्टम कण्डिका समाप्त हुई ॥८॥

अम्बयो यन्ति शम्भुमयोभू हिरण्यवर्णा निस्सालां ये अग्नयो ब्रह्म जज्ञानमित्येका तदेव मृगारसूक्तानि ॥१॥ उत्तमं वर्जयित्वाऽप नः शोशुचदघं पुनन्तु मा सस्रुषोर्हिमवतः प्रस्रवन्ति वायोः पूतः पवित्रेण शं च नो मयश्च नोऽनड्वुद्भ्यस्त्वं प्रथमं मह्यमापो वैश्वानरो रश्मिभिर्यमो मृत्युर्विश्वजित्संज्ञानं नो यद्यन्तरिक्षे पुनर्मैत्विन्द्रियं शिवा नः शं नो वातो वात्वग्निं ब्रूमो वनस्पतानिति ॥ २ ॥ पृथिव्यै श्रोत्रायेतित्रिः प्रत्यासिञ्चति ॥३॥ अम्बयो यन्ति शम्भुमयो भू हिरण्यवर्णाः शंतातीयं शिवा नः शं नो वातो वात्वग्निं ब्रूमो वनस्पतीनिति ॥४॥ पृथिव्यै श्रोत्रायेति त्रिः प्रत्यासिञ्चति ॥५॥ इति शान्तियुक्तानि ॥६॥ उभयतः सावित्र्युभयतः शं नो देवी ॥७॥ अहतवासाः कंसे शान्त्युदकं करोति ॥ ८ ॥ अतिसृष्टो अपां वृषभ इत्यपोऽतिसृज्य सर्वा इमा आप ओषधय इति पृष्ट्वा

"अम्बयो यन्ति" इत्यादि एक और "अग्नेर्मन्व०" इत्यादि ये "मृगार सूक्त" हैं ॥१॥ पहिले को छोड़ कर "अपनः" इत्यादि यह मृगारसूक्त है "पृथिव्यै श्रोत्राय" से तीन वार आसिंचन करे ॥२॥३॥ "अम्बयो यन्ति इत्यादि शान्तिगण हैं । इन सब सूक्तों से कौशिक का कहा बृहत् शान्ति-गण है ॥४॥ "पृथिव्यै श्रोत्रियाय"० से तीन वार प्रत्यासिञ्चन् करे अर्थात् शान्त्युदक के मध्य में शान्ति जल डाले फिर "पृथिव्यै श्रोत्राय" से अग्नि का पर्युक्षण करे । पूर्व गण को शांतिगण कहते हैं, और उत्तर भी शान्ति शब्द वाच्य हैं—दोनों की संज्ञा—पूर्वोत्तरा है ॥ शान्ति के आदि एवं अन्त में "सावित्री" और "शन्नो देवी" पढ़ना चाहिये ॥५॥६॥७॥ अखण्ड चीरेदार नये वस्त्र पहन कर काँसे के पात्र में शान्ति के जल को करे "अतिसृष्टो" इत्यादि से जल छोड़कर । ओषधियों के लाने वाले से कर्ता पूछे कि 'ये सब ओषधियाँ हैं ? आ० कहे "सब है ।" तब कर्ता ब्रह्मा से पूछे कि ये सब जल ओषधियाँ हैं ? ब्रह्मा जल को

सर्वा इत्याख्यात ओं बृहस्पति प्रसूतः करवाणास्यनुज्ञाप्यों सवितृप्रसूतः भवानित्यनुज्ञातः कुर्वीत ॥९॥ पूर्वया कुर्वीतेति गार्ग्यपार्थश्रवसभागलिकाङ्कायनोपरिबभ्रवकौशिकजाटिकायनकौरुपथयः ॥ १० ॥ अन्यतरया कुर्वीतेति युवा कौशिको युवा कौशिकः ॥११॥९॥
इत्यथर्ववेदे कौशिकसूत्रे प्रथमोऽध्यायः समाप्तः ॥१॥

पूर्वस्य मेधाजननानि ॥१॥ शुकसारिकृशानां जिह्वा बध्नाति ॥२॥ आशयति ॥३॥ औदुम्बरपलाशकर्कन्धूनामादधाति ॥४॥ आवपति ॥५॥ भक्षयति ॥६॥ उपाध्यायाय भैक्ष्यं प्रयच्छति ॥ ७ ॥ सुप्तस्य कर्णमनुमन्त्रयते ॥ ८ ॥ उपसीदञ्जपति ॥९॥ धानाः सर्पिर्मिश्राः सर्वहुताः ॥१०॥

छूकर कहे–हाँ सब है। सब क्या ? चित्यादि सब मिल कर सब ओषधियों सहित गंगादिके सब नदियों का जल है । "ओं बृहस्पतिप्रसूतः करवाणि" ऐसी मुझे अनुज्ञा हो "सवितृप्रसूतः भवानि" अनुज्ञा पाने पर करो ॥ "बृहस्पति प्रसूतः" से करे यह मत गार्ग्य, पार्थ, श्रवस, भागलि, काङ्कायन, उपरि बभ्रव, कौशिक, जाटिकायन, कौरुपथि का है । "सवितृप्रसूतः" से करे यह मत युवा कौशिक का है ॥८॥९॥१०॥११॥ यह नवमी कण्डिका समाप्त हुई ॥९॥ यह अथववेद के कौशिक सूत्र के प्रथमाध्याय का भाषानुवाद समाप्त हुआ ॥१॥

पूर्व के (त्रिषप्तीयसूक्त) अनुवाक से मेधा जनन कर्म करे ॥१॥ मेधा चाहने वाले कंटारिका के पत्ते को "अयं मे वरण उरसि०" और आश्यादि सूक्त से आज्याहुति के संपात से होमकर अपने गले में बाँधे ॥२॥ और कर्त्ता मेधा चाहने वाले को खवावे ॥३॥ उदुम्बर, पलाश, बैर के बड़े फल, इनको लावे ॥४॥ और उसे आवपन करे ॥५॥ ये त्रिषप्ता०" इस सूक्त से क्षीरौदन खावे और रस को प्राशन करे ॥६॥ "ये त्रिषप्ता०" सूक्त से उपनयन के अनन्तर-ब्रह्मचारी-एकत्रित की हुई भिक्षा को अभिमत्रण कर अध्यापक को समर्पण करे ॥७॥ रात में सोते हुए अध्यापक के कान में अभिमंत्रण करे ॥८॥ जब २ उपाध्याय घर

तिलमिश्रा हुत्वा प्राश्नाति ॥ ११ ॥ पुरस्तादग्नेः कल्माषं दण्डं निहत्य पश्चादग्नेः कृष्णाजिने धाना अनुमन्त्रयते ॥१२॥ सूक्तस्य पारं गत्वा प्रयच्छति ॥१३॥ सकृज्जुहोति ॥१४॥ दण्डधानाजिनं ददाति ॥१५॥ अहं रुद्रेभिरिति शुक्लपुष्पहरितपुष्पे किंस्त्यनाभिपिप्पल्यौ जातरूपशकलेन प्राक्स्तनग्रहात् प्राशयति ॥ १६ ॥ प्रथमप्रवदस्य मातुरुपस्थे तालुनि सम्पातानानयति ॥ १७ ॥ दधिमध्वाशयति ॥ १८ ॥ उपनीतं वाचयति वार्षशतिकं कर्म ॥१९॥ त्वं नो मेधे यौश्च म इति भक्षयति ॥ २० ॥ आदित्यमुपतिष्ठते ॥२१॥ यदग्ने तपसेत्याग्रहायण्यां भक्षयति ॥ २२ ॥ अग्निमुपतिष्ठते ॥२३॥ प्रातरग्निं गिरावरगराटेषु

को जाया करे तब २ ब्रह्मचारी जप किया करे ॥९॥ लावा, घी, मिलाकर हवन करे ॥१०॥ तिल में घी मिलाकर हवन कर शेष हवि को प्राशन करे ॥११॥ काले रंग के दण्ड को अग्नि के पीछे धर कर काले रंग के मृग चर्म पर धाना धर कर उस का अनुमंत्रण करे ॥१२॥ सूक्त को पढ़ लेने पर देवे ॥१३॥ धान को अजिन के द्वारा एक बार आहुति देवे ॥१४॥ और उपाध्याय के लिये दण्ड धान अजिन देवे ॥१५॥ "अहं रुद्रेभिः" इत्यादि से शंखपुष्पिका, अन्धपुष्पिका, शंखनाभि, पिप्पली को सोने के शलाका से घस कर माँ के दूध पीने के पहिले बालक को चटावे ॥ और बच्चे को भली भाँति वर्चस्वी बनाने के लिये और मेधावि बनाने वाला पहिले माता के गोद में बच्चे को देकर "अहं रुद्रेभिः" सू० से पाँच कर्मों को जात कर्म में करे और सम्पात को तालु पर डाले ॥१६॥१७॥ और दही. मधु मिलाकर बच्चे को चटावे ॥१८॥ और बालक के पास "अहं रुद्रेभिः" सूक्त एवं "आयातु मित्र" इत्यादि गण के अन्त के वचन को पढ़े—जो बच्चे की आयुः सौ वर्ष की चाहे वह इस कर्म को करे ॥१९॥ "त्वं नो मेधे०" मंत्रों से भक्षण करावे ॥२०॥ आदित्य का उपस्थान करे ॥२१॥ "यदग्ने तपसे०" इत्यादि से आग्रयण की पौर्णमासी को मेधाजनन कर्म कर के और बच्चे को शेष हवि भक्षण करावे ॥ २२ ॥ और

दिवस्पृथिव्या इति संहाय मुखं विमार्ष्टि ॥२४॥१॥१०॥

पूर्वस्य ब्रह्मचारि सांपदानि ॥१॥ औदुम्बर्यादयः ॥२॥ ब्रह्मचार्यावसथादुपस्तरणान्यादधाति॥३॥ पिपीलिकोद्वापे मेदोमधुश्यामाकेषीकतूलान्याज्यं जुहोति ॥ ४ ॥ आज्यशेषे पिपीलिकोद्वापानोप्य ग्राममेत्य सर्वहुतान् ॥ ५ ॥ ब्रह्मचारिभ्योऽन्नं धानास्तिलमिश्राः प्रयच्छति ॥६॥ एतानिग्रामसाम्पदानि ॥ ७ ॥ विकारस्थूणामूलावतक्षणानि सभानामुपस्तरणानि ॥८॥ ग्रामीणेभ्योऽन्नम् ॥९॥ सुरां सुरापेभ्यः ॥ १० ॥ औदुम्बर्यादीनि भक्षणान्तानि सर्वसाम्पदानि ॥११॥ त्रिर्ज्योतिःकुरुते॥१२॥ उपतिष्ठते॥१३॥ सव्यात्पाणिहृदयाल्लोहितं रसमिश्रमश्नाति ॥ १४ ॥ पृश्निमन्थः ॥ १५ ॥ जिह्वाया उत्साद्यमक्ष्योः परिस्तरण-

---

अग्नि का उपस्थान करे ॥२३॥ "प्रातरग्नि०" इत्यादि पढ़ कर सोते से उठ कर मुख का प्रक्षालन करे॥२४॥ १॥ यह दशमी कण्डिका पूरी हुई ॥१०॥

पौर्णमासी को निर्ऋति कर्म करके एक वार प्रातःकाल में ब्रह्मचारी "त्रिषप्तीय०" सूक्त से साम्पद कर्म करे ॥ उदुम्बर आदि १०।४ सूत्रोक्त अग्नि का आधान करे ॥२॥ ब्रह्मचारी अपने घर से तृणादि को लाकर आधान करे ॥३॥ चूँटियों से फेकी वा निकाली हुई मट्टी के छिद्र में मेद, मधु, श्यामक, शरपुष्प इनको आज्य के साथ आहुति देवे ॥४॥ आज्य शेष में पिपीलिका की मट्टी को थाली में धर कर ग्राम में आकर एक वार हवन करे ॥५॥ ब्रह्मचारियों के लिये अन्न, और तिल मिला धान देवे ॥६॥ पूर्व दिन में निर्ऋति कर्म करके ग्राम साम्पद का अधिकार होता है। समिद का विकार, स्थूणा (खूँटी) के जड़, इनके अवतक्षण (चीर, फाड़, कर,) को यज्ञ के उपस्तरण करे ॥७॥८॥ ग्रामीणों को अन्न, सुरा पीने वाले को सुरा देवे ॥९॥१०॥ औदुम्बर, पलाश, बैर आदि और क्षीरौदन, पुरोडाश, रस ये सर्वकामनाओं के लिये हैं ॥११॥ तीनवार ज्योतिःकरै ॥१२॥ तब उपस्थान करे ॥१३॥ सव्य हाथ से लाल सहजन को पानी में मिलाकर खावे ॥१४॥ गौ का मट्ठा ॥१५॥ मस्तु

मस्तृहणं हृदयं दूर्शे उपनह्य तिस्रो रात्रीः पल्पूलने वासयति ॥१६॥ चूर्णानि करोति ॥१७॥ मैश्रधान्ये मन्थ ओप्य दधिमधुमिश्रमश्नाति ॥ १८ ॥ अस्मिन् वसु यदा बध्नन्नव प्राणानिति युग्मकृष्णलं वासितं बध्नाति ॥१९॥ सारूपवत्सं पुरुषगात्रं द्वादशरात्रं सम्पातवन्तं कृत्वा-नभिमुखमश्नाति ॥ २० ॥ २ ॥ ११ ॥

कथं मह इति मादानकशृतं क्षीरौदनमश्नाति ॥१॥ चमसे सरूपवत्साया दुग्धे व्रीहियवाववधाय मूर्छयित्वा मध्वासिच्याशयति ॥ २ ॥ पृथिव्यै श्रोत्रायेति जुहोति ॥३॥ वत्सो विराज इति मन्थान्तानि ॥४॥ सहृदयं तदू षु संजानीध्वमेह यातु सं वः पृच्यन्तां सं वो मनांसि संज्ञानं न इति सांमनस्यानि ॥ ५ ॥ उदकुलिजं सम्पातवन्तं ग्रामं परिहृत्य मध्ये निनयति ॥६॥ एवं सुरा-

---

लङ्कक में धूलक आदि को पुराने वस्त्र में बांधकर तीन रात तक गौ के गोबर में वासे और चौथे दिन पुराने वस्त्र सहित को चूर्ण करे ॥ और मैश्रधान्य में मथन को डालकर दधि, मधु मिलाकर खावे ॥१॥१६॥१७॥१८॥ "अस्मिन्वसु यदा बध्नन्नव प्राणान् इस मंत्र से उक्त प्रतीकों में कृष्णमणि को वास कर सब कामना सिद्धि चाहने वाला इस को हाथ या गले में बांधे ॥१९॥ एक वर्ण बच्चे वाली गौके दूध में पके ओदन को पुरुषाकृति बनाकर १२ दिन तक उस पर दूध में पके ओदन को ढारे ॥२०॥२॥११॥ दूसरी कण्डिका पूरी हुई ॥२॥

सम्पत्ति चाहने वाला "कथमहं" इत्यादि मादानक वृक्ष के काठ से पके क्षीरोदन को खावे ॥१॥ चमसा में सरूप वत्सा गौ के दूध में व्रीहि, यव डालकर मूर्च्छना देकर उस में मधु देकर खावे ॥२॥ और "पृथिव्यै श्रोत्राय०" से आहुति देवे ॥३॥ "त्रिर्ज्योतिः कुरुते" इत्यादि से पृश्निमंथ—तक कर्म्म होते हैं ॥४॥ "सहृदयम्०" इत्यादि से सांमनस्य कर्म कहे गये हैं ॥५॥ चूने वाले घड़े को बनाकर गाँव में भ्रमण करावे

कुलिजम् ।७।। त्रिहायिण्या वत्सतर्याः शुक्तानि पिशिता-न्याशयति ।।८।। भक्तं सुरां प्रपां सम्पातवत्करोति ।।९।। पूर्वस्य ममाग्ने वर्च इति वर्चस्यानि ।।१०।। औदुम्बर्यादीनि त्रीणि ।। ११ ।। कुमार्या दक्षिणमूरुमभिमन्त्रयते ।।१२।। वपां जुहोति ।। १३ ।। अग्निमुपतिष्ठते ।। १४ ।। प्रातरग्निं गिरावरगराटेषु दिवस्पृथिव्या इति दधिमध्वाशयति ।।१५।। कीलालमिश्रं क्षत्रियं कीलालमितरान् ।।१६।।३।।१२।।

हस्तिवर्चसमिति हस्तिनम् ।१।।हास्तिदन्तंबध्नाति ।२। लोमानि जतुना संदिह्य जातरूपेणापिधाप्य ।।३।। सिंहे व्याघ्रे यशो हविरिति स्नातकसिंहव्याघ्रबस्तकृष्णवृषभराज्ञां नाभिलोमानि ।।४।। दशानां शान्तवृक्षाणां शकलानि ।।५।। एतयोः प्रातरग्निं गिरावरगराटेषु दिवस्पृथिव्या इति

।।६।। इसी प्रकार दारु के घड़े को भी करे ।।७।। सांमनस्य चाहने वाला तीन वर्ष की वाच्छी के मांस को खट्टे में मिलाकर खावे ।।८।। भात, शराब, जल इनको सम्पातवत् करके "पूर्व त्रिषप्तीयसूक्त के "ममाग्ने वर्च" से वर्चस्य कर्म करे और औदुम्बर्य्यादि तीन का आधान कर हवन करे ।।९।।१०।।११।। कुमारी के दहिने जंघे को अभिमंत्रण करे और शान्त पशु की वपा की आहुति देवे ।।१२।।१३।। और अग्नि का उपस्थान करे ।।१४।। "प्रातरग्नि" इत्यादि मंत्र से दही, मधु खावे ।।१५।। और कीलाल मिलाकर क्षत्रिय को देवे एवं केवल कीलाल वैश्यादिकों को देवे ।।१६।।३।।१२।। यह बारहवी कण्डिका पूरी हुई ।।१२।।

"हस्ति वर्चसम्"–(ये त्रिषप्ता, अस्मिन्वसु, प्रातरग्नि, हस्तिवर्चसं, सिंह-व्याघ्रे यशोहविर्यशसंमेन्द्रो गिरा वरगराटेषु यथा सोमः प्रतिः सवने यच्च वर्चो अक्षेषु येन महानघ्न्या जन्घनम्" यह वर्चस्य हैं।) हाथी का दाँत को आज्य तंत्र से बान्धे ।।१२।। हाथी के लोमों को लाख में गांथ कर सोना में भर कर "सिंहे व्याघ्रेयशोहविः" से सात मर्मो को सिंह, व्याघ्र, वस्त, काले वृषभ में श्रेष्ठ वृषभ के नाभि और लोमों को स्थाली पाक द्वारा पका कर खावे और "प्रात रग्निं०" इत्यादि मंत्रसे

सप्तमर्माणि स्थालीपाके पृक्तान्यश्नाति ॥६॥ अकुशलं यो ब्राह्मणो लोहितमश्नीयादिति गार्ग्यः ॥७॥ उक्तो लोममणिः ॥८॥ सर्वैराप्लावयति ॥९॥ अवसिञ्चति ॥१०॥ चतुरङ्गुलं तृणं रजोहरणं बिन्दुनाभिश्चोत्यौपमथ्य ॥११॥ शुनि किलासमजे पलितं तृणे ज्वरो योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तस्मिन् राजयक्ष्म इति दक्षिणा तृणं निरस्यति गन्धप्रवादाभिरलंकुरुते ॥१२॥४॥१३॥

पूर्वस्य हस्तित्रसनानि ॥१ रथचक्रेण सम्पातवता-

खावे ॥६॥ इस रुधिर को जो ब्राह्मण खावे उसका कल्याण नहीं होता है ऐसा गार्ग्य—कहते हैं ॥७॥ लोमणि के विषय में कहा गया ॥८॥ यह कर्म क्षत्रियों के लिये है ब्राह्मण के लिये नहीं ॥८॥ पाँच प्रतीकों से (मंत्रों से) जल से नहवा कर, जलसे उस को सेक करे ॥९॥१०॥ चार अङ्गुल परिमाण के तृण को—"रजउदक" कहते हैं। जिस के द्वारा धूलि निकल जाती है। आकाश के जल (मेघ-का पानी) द्वारा किसी पात्रमें नीचे छिद्रकर के उस में चार अङ्गुल वाला तृण लटका देवे और तृण के नीचे दूसरा जलपात्र धर देवे जिस में शुद्ध जल गिरेगा। "शुनि किलास समये" इत्यादि मंत्र से उस शुद्ध जल को मथकर तृण को दक्षिण दिशा में फेक देवे एवं यस्ते गन्धः" इत्यादि तीन ऋचाओं से यक्ष्मा रोग वाले के शरीर में सुगन्धित-पदार्थ उस जल में मिलाकर नित्य अनुलेपन करे तो रोग छूट जावेगा ॥९॥१०॥११॥१२॥४॥१३॥ यह तेरहवीं कण्डिका पूरी हुई ॥१३॥

अब राज कर्मो को कहेंगे ॥ इन में से युद्ध सम्बन्धि कर्मो के तंत्र को पहिले कहेंगे ॥१॥ अश्वत्थ वर्धक के वृक्ष के काठ की अरणियों द्वारा अग्नि मन्थन कर "इन्द्रो मन्थतु"० इत्यादि मंत्र से मन्थन करते हुए अनुमंत्रण करे और "पूति रज्जुः"० इत्यादि आधी ऋचा से अग्नि गिरने के स्थान में रज्जु को धरे। 'धूमं परादृश्य०" आधी ऋचा से उत्पन्न अग्नि को अनुमंत्रण करे। इस अग्नि का नाम "सेनाग्नि" है ॥ अन्यचसश्च०" सेना अग्नि का प्रणयन, ग्रहण, पंच गृहीत आज्य। अभ्यातनान्त आहुतियाँ करके लाल अश्वत्थ की शाखा को उत्तर भाग में रोपन कर

प्रतिप्रवर्तयति ॥२॥ यानेनाभियाति ॥३॥ वादित्रैः ॥४॥ हृतिवस्त्योरोप्य शर्कराः ॥५॥ तोत्रेण नग्नप्रच्छन्नः ॥६॥ विद्मा शरस्य मा नो विदन्नदारसृत्स्वस्तिदा अवमन्युर्निर्हस्तः परिवर्त्मान्यभिभूरिन्द्रो जयात्यभिस्त्वेन्द्रेति साङ्ग्रामिकाणि ॥७॥ आज्यसक्तूञ्जुहोति ॥८॥ धनुरिध्मे धनुःसमिधमादधाति ॥९॥ एवमिष्विध्मे ॥१०॥ धनुःसम्पातवद्विमृज्य प्रयच्छति ॥११॥ प्रथमस्येषुपर्ययणानि ॥१२॥ द्रुघ्न्यार्त्नीज्यापाशतृणमूलानि बध्नाति ॥१३॥ आ-

---

प्रधान कर्म करे। इस के अनन्तर उत्तर तंत्र में विशेषता है। संनति होमांत तक करके "इमे जयंतु स्वाहेभ्य०" इत्यादि मंत्र से आज्य की आहुति देवे। पश्चात् वधक काष्ठ प्रज्वालित अग्नि में बायें हाथ से इङ्गिड की 'पराभिजयन्तादुराहामोभ्यः ओं स्वाहेति" मंत्र से आहुति देवे। तब शाखाओं पर दक्षिणा में—"नीललोहितेनामून्" मंत्र से डाले स्विष्टकृत् आदि उत्तर तंत्र–हुआ। यह सांग्रामिकतंत्र है। सांग्रामिक तंत्रों में सब जगह मंत्रों का उच्चारण ऊंचे स्वर से होगा परन्तु प्रधान मंत्रों ही को ऊंचे स्वर से बोलना चाहिये ॥ अब शत्रु के हाथियों को डराने के कर्म्मों का विधि कहेंगे ॥१॥ शत्रु सेना के हाथियों को युद्ध में प्रवर्तमान के सम्मुख राजा अपनी सेना की हस्तिनियों को आगे करे और रथचक्र के आगे हाथियों को प्रवृत करे घोड़े आदि को सम्पात् से संस्कृत करके शत्रु सैन्य के सम्मुख करे ॥ पुरोहित बाजों के (भेरी, मृदङ्ग झल्लरि आदि) साथ जावें, हृति (चमड़े का मोट) अनुवासना चर्म इन दोनों में शर्करा (अस्त्र विशेष) को डाल कर हाथी पर प्रतोद लेकर लग्न हो छिपाकर, हाथी को अङ्कुशादि से दण्ड देकर आगे शीघ्र चलावे ॥२॥३॥४॥५॥६॥ "विद्मा शरस्य०" इत्यादि सूक्तों से आज्य आहुतियाँ देवे ॥८॥ प्रादेशमात्र लम्बी सरपत की इध्म अग्नि में डाले ॥१०॥ और धनुष को सम्पात की तरह करके (अग्नि पर झुका कर) राजा को देवे ये विजय कर्म समाप्त हुए ॥ इन कर्म्मों से शत्रु से न लड़ने पर भी विजय होता है क्योंकि शत्रु सेना इन कर्म्मों को देखते ही भाग जायेगी॥११॥ इषु निवारण कर्म को कहते हैं। द्रुघ्नी, आर्त्नी, ज्या,

रेऽसाविस्यपनोदनानि ॥१४॥ फलीकरणतुषवुसावतक्ष-णान्यावपति ॥१५॥ अन्वाह ॥१६॥ अग्निर्नः शत्रूनग्निर्नो दूत इति मोहनानि ॥१७॥ ओदनेनोपयम्य फलीकर-णान्लुलूखलेन जुहोति ॥१८॥ एवमणून् ॥१९ एकविंश-त्या शर्कराभिः प्रतिनिष्पुनाति ॥२०॥ अप्वां यजते ॥२१॥ संशितमिति शितिपदीं सम्पातवनोमवसृजति ॥२२॥ उद्धृषस्सुयोजयेत् ॥२३॥ इममिन्द्रेति युक्तयोः प्रदानान्तानि ॥२४॥ दिग्युक्ताभ्यां नमो देववधेभ्य इत्युपतिष्ठते ॥२५॥ त्वया मन्यो यस्ते मन्यो इति संर-म्भणानि ॥२६॥ सेने समीक्षमाणो जपति ॥२७॥ भाङ्ग-

---

पाश, इन तृणों में किसी एक की जड़ को बांधे इस का फल शत्रु प्रयुक्त शस्त्रों का असर विरुद्ध–होगा अर्थात् शत्रु ही की सेना की हानि होगी ॥ ॥१४॥ चावल का गुण्डा, तुष, भूसा काठ का बुरादा इन को अग्नि में डाले ॥ ऐसा प्रति दिन करे (जब तक युद्ध जारी रहे) ॥१६॥ 'अग्निर्नः इत्यादि मंत्र के जप करने से परसेना का ज्ञान भ्रष्ट हो जाता है ॥१७॥ ओदन को पिण्ड के आकार बना कर और ओदन के साथ कणिका मिलाकर पिण्डीकृत करके सूर्य्य के सम्मुख हवन करे ॥ १८ ॥ १९ ॥ २१ शर्करा को लेकर साफ करे ॥२०॥ अप्वा देवता के लिये चरु पकावे और आज्यभागान्त आहुति करके "अग्निर्नः०" इत्यादि दो सूक्तों से चरु की आहुतियाँ करे। निर्वाप, प्रोक्षण बर्हिर्होम इन में विशेषता है ॥ 'अप्वायै त्वा जुष्टं निर्वपामि" अप्वातये इत्यादि से प्रोक्षण, और "अप्वां गच्छतुहविः" कहे ॥२१॥ उद्वेगकर कर्म्म कहा जाता है ॥ श्वेत पैर वाली बकरी को पुरोहित शत्रु सेना में छोड़ देवे या श्वेत पैर वाली भेड़ि या हरिणी को छोड़ देवे ॥२२॥ और जब शत्रु सेना उद्विग्न हो जावे तो उससे युद्ध करने की योजना करे ॥२३॥ युद्ध होते समय नमो देववधेभ्यः और इममिन्द्रे०" इत्यादि प्रदानान्ता सूक्त का जप करे ॥२४॥ येऽस्यां-स्थ प्राच्यां दिशि प्राचीदिक्" इत्यादि दो मंत्रों से उपस्थान करे ॥२५॥ अपनी सेना के उत्साह बढ़ाने के लिये "त्वया मन्यो यस्ते मन्यो०" इत्यादि जप करे ॥२६॥ दोनों सेनाओं को देखता हुआ अपनी सेना को

मौञ्जान् पाशानिङ्गिडालंकृतान् सम्पातवतोऽनूक्तान्सेनाक्रमेषु वपति ॥२८॥ एवमामपात्राणि ॥२९॥ इङ्गिडेन संप्रोक्ष्य तृणान्याङ्गिरसेनाग्निना दीपयति ॥३०॥ यां धूमोऽवतनोति तां जयन्ति ॥३१॥५॥१४॥

ऋधङ्मन्त्रस्तदिदासेत्याश्वत्थ्यां पात्र्यां त्रिवृतिगोमयपरिचये हस्तिपृष्ठे पुरुषशिरसि वामित्राञ्जुह्वदभिप्रक्रम्य निवपति ॥१॥ वराहविहिताद्राजानो वेदिं कुर्वन्ति ॥२॥ तस्यां प्रदानान्तानि ॥३॥ एकेष्वाहतस्यादहन उपसमाधाय दीर्घदण्डेन स्रुवेण रथचक्रस्य खेन समया जुहोति ॥४॥ योजनीयां श्रुत्वा योजयेत् ॥५॥ यदि चिन्नु त्वा नमो देववधेभ्य इत्यन्वाह ॥६॥ वैश्याय प्रदाना-

---

हारती हुई देख कर जप करे ॥२७॥ और भाङ्ग मौञ्जपाशों को इंगिड से अलंकृत करके सम्पात वान् करके जिस ओर सेना आक्रमण करती हो, उसी प्रदेश में डाले ॥२८॥ इसी प्रकार कच्चे पात्रों को डाले ॥२९॥ इङ्गिड से संप्रोक्षण कर शर तृणों को चाण्डालाग्नि से जलावे ॥३०॥ जलाने पर धूम जिस सेना को ढाक लेवे उसकी हार समझो ॥३१॥ यह चौदहवी कण्डिका समाप्त हुई ॥५॥१४॥

"ऋधङ्मन्त्रस्तदिदास०" इत्यादि मंत्र से तीन बार धरे हुए अश्वत्थ की पात्री हाथी के पीठ पर या पुरुष के शिर पर धर कर उसमें शत्रुओं के प्रति हवन करता हुआ धावा करे और पैदल चलने वाले पुरुष के शिर पर पात्री को धर कर उसमें भी आहुतियाँ करता जावे ॥१॥ यह जय कर्म है ॥ सूकर द्वारा निकाली हुई मट्टी से राजा लोग यज्ञ वेदि बनावें और उस में प्रदानान्त मंत्रों को पढ़ कर हवन करें ॥३॥ संग्राम में एक बाण से मरे हुए को दहन करने पर्य्यन्त इध्मों का आधान करने पर चक्र को रख कर बड़े दण्डे वाले स्रुव से रथ चक्र के छिद्र द्वारा पास ही आहुति देवे ॥४॥ और शत्रु सैन्य की तय्यारी देख कर अपनी सेना को धावा बोल देवे ॥५॥ पर सैन्य को लक्ष्य कर यदि "चिनुत्वा नमो देव वधेभ्यः" इस को प्रति दिन जप करें ॥६॥ वैश्य राजा प्रदानान्त

न्तानि ॥७॥ त्वया वयमित्यायुधिग्रामण्ये ॥८॥ नि तद्द्धिष इति राज्ञोदपात्रं द्वौ द्वाववेक्षयेत् ॥९॥ यन्न पश्येन्न युध्येत ॥ १० ॥ नि तद्द्धिषे वनस्पते ऽयाविष्ठाग्न इन्द्रो दिशश्चतस्र इति नवं रथं राजानं ससारथिमास्थापयति ॥११॥ ब्रह्म जज्ञानमिति जीवितविज्ञानम् ॥१२॥ तिस्रः स्नावरज्जूरङ्गारेष्ववधाय ॥१३॥ उत्कुचतीषु कल्याणम् ॥१४॥ साङ्ग्रामिकमेता व्यादिशति मध्ये मृत्युरितरे सेने ॥१५॥ पराजेष्यमाणान्मृत्युरतिवर्तते ज्येष्यन्तो मृत्युम् ॥१६॥ अग्रेषूत्कुचत्सु मुख्या हन्यन्ते मध्येषु मध्या अन्तेष्ववरे ॥१७॥ एवमिषीकाः ॥१८॥६॥१५॥

तक करे ॥७॥ "त्वयावयं०" इत्यादि अस्त्र पर ग्राम में करें ॥८॥ अपनी सेना का जय पराजय और पुरुषों के मारे जाने की शंका में इसका विज्ञान यह है कि राजा अपने जलपात्र को अभिमंत्रण करके दो २ योद्धाओं को राजा देखे जिसको न देखे अर्थात् रहते हुए जो न दीख पड़े उसको न लड़ने देवे ॥९॥१०॥" नितद्द्धिषे०" इत्यादि मंत्र पढ़ कर नये रथ को तय्यार कर पुरोहित राजा को उस पर सवार करावे ॥११॥ रोगी पुरुष के अच्छा होने का ज्ञान होने की विधि-पुरोहित "ब्रह्मजज्ञानं०" इत्यादि से जीवित ज्ञान के लिये कि यह रोगी जीवित रहेगा या नहीं ? इस संशय में तत्त्व जानने की चिन्ताकरके चमड़े के ताँत की तीन रज्जू को आग में डाल कर चिन्ता करे कि यह जीयेगा या नहीं ? यदि अङ्गर में की ज्वाला ऊपर को उठे तो जानना यह रोगी जीवेगा ॥१४॥ अब सांग्रामिक विधान को कहते हैं-तीन रज्जुओं में से एक अपनी सेना की रज्जू दूसरी मध्य में मृत्यु सूचक तीसरी रज्जू पर सेना सूचक हो । इस प्रकार संकल्प करके आग में तीनों रज्जुओं को डालकर जिसके ऊपर मृत्यु वाली रस्सी जावे उसकी सेना का जय होगा ॥१५॥१६॥ मृत्यु रज्जुके आगे सरपत की तीन इषिका अग्नि में डाले यदि पहिली इषिका-जल कर ऊपर को उठे तो सेना के प्रधानों की मृत्यु जानो, मध्यम इषिका फल—सेना के मध्यम पुरुषों की मृत्यु जानो

उच्चैर्घोष उपश्वासयेति सर्ववादित्राणि प्रक्षाल्य तगरोशीरेण संधाव्य सम्पातवन्ति त्रिराहृत्य प्रयच्छति ॥१॥ विहृदयमित्युच्चैस्तरां हुत्वा स्रुवमुद्वर्तयन् ॥ २ ॥ सोमांशुं हरिणचर्मण्युत्सीव्य क्षत्रियाय बध्नाति ॥३॥ परिवर्त्मानीन्द्रो जयातीति राजा त्रिः सेनां परियाति ॥४॥ उक्तः पूर्वस्य सोमांशुः ॥५॥ संदानं व आदानेनेति पाशैरादानसंदानानि ॥ ६ ॥ मर्माणि त इति क्षत्रियं संनाहयति ॥७॥ अभयानामप्ययः ॥८॥ इन्द्रो मन्थत्विति ॥९॥ पूतिरज्जुरिति पूतिरज्जुमवधाय ॥१०॥ अश्वत्थबध-कयोरग्निं मन्थति ॥११॥ धूममिति धूममनुमन्त्रयते ॥१२।

और अन्तवाली इषिका फल-अपर पुरुषों की मृत्यु जानना ॥१७॥१८॥६ यह पन्द्रहवीं कण्डिका पूरी हुई ॥१५॥ "उच्चैर्घोष उप श्वासय०" इत्यादि सब बाजाओं को प्रक्षालन करके तगर और वीर द्वारा संधापन कर सम्पात वन्ति करके पुरोहित तीन बार लेकर दमयितृओं को देवे ॥१॥ विध्द्यम्०" इत्यादि मंत्र से ऊँचे स्वर से बोलकर आहुति देकर स्रुव ऊपर को बर्तता हुआ होम करे ॥२॥ और सोमलता को हरिण के चमड़े में सीकर क्षत्रिय के लिये बांध देवे ॥३॥ परिवर्त्मानीन्द्रो जयति" से राजा बैठी हुई सेना को "त्रिषन्धीय०" सूक्त से तीन बार परिक्रमा करे ॥ सोमलता के विषय में कहा गया सेना के आक्रमणों में केवल पचन का ही आदेश किया जावे ॥६॥ मर्माणित०" इत्यादि मंत्र से संनाह पहनावे ॥७॥ अब अभय कर्म को कहते हैं ॥ "स्वस्तिदा विशा ब्राह्मणेन को प्रयुक्तासि न तना अवीरेणुक कण्ठो अभयं मित्रावरुणावभयं द्यावा-पृथिवी असमै ग्रामाय हत तद्दपूषेमा आशा इन्द्रः सूत्रामा मैते पथा स्वस्तिदा विशां पतिर्नमस्ते घोषिणीभ्य आ ते राष्ट्रमिदमुच्छ्रेयो यत इन्द्र भयामह-"यह अभय गण है ॥८॥ 'इन्द्रो मन्थ" से अग्नि मन्थन करे और समिदाधान का प्रयोग करे ॥९॥ "पूति रज्जुः०" से पुरानी रज्जु को अग्नि रखने की जगह लावे ॥१०॥ अश्वत्थ और वधक काष्ठों से मन्थन कर अग्नि उत्पन्न करे ॥११॥"धूमम्०" इत्यादि से धूम का अनु-

अग्निमित्यग्निम् ॥१३॥ तस्मिन्नरण्ये सपत्नक्षयणी-रादधात्यश्वत्थबधकताजद्रुङ्गाह्वखदिरशराणाम् ॥ १४ ॥ उक्ताः पाशाः॥१५॥आश्वत्थानि कूटानि भाङ्गानि जालानि ॥ १६ ॥ बाधकदण्डानि ॥ १७ ॥ स्वाहैभ्य इति मित्रेभ्यो जुहोति ॥१८॥ दुराहामीभ्य इति सव्येनेङ्गिडममित्रेभ्यो बाधके ॥ १९ ॥ उत्तरतोऽग्नेर्लोहिताश्वत्थस्य शाखां निहत्य नीललोहिताभ्यां सूत्राभ्यां परितत्य नीललो-हितेनामूनिति दक्षिणा प्रहापयति ॥ २० ॥ ये बाहव उत्तिष्ठतेति·यथालिङ्गं सम्प्रेष्यति ॥२१॥ होमार्थे पृषदा-ज्यम् ॥२२॥ प्रदानान्तानि वाप्यानि ॥२३॥ वाप्यैस्त्रिष-न्धीनि वज्ररूपाण्यर्बुदरूपाणि ॥२४॥ शितिपदीं सम्पा-

---

मंत्रण करे ॥ १२ ॥ "अग्नि" इस आधी ऋचा से उत्पन्नाग्नि का अनुमंत्रण करे ॥१३॥ इसी अग्नि में सेना कर्म करे। यह कर्म वन में होगा न कि सेना में॥ शत्रुक्षयणी कहे इध्मों का अर्थात् अश्वत्थ, वधक, एरण्ड, पलाश, खदिर और शर इनका आधान करे ॥१४॥ इस कर्म में सूत्रोक्त पाश काम में लाये जाय जो भाङ्ग एवं मौज का प्रयोग करे॥१५॥ स्वाभा· विक गर्त्त को कूट कहते हैं। सेनाकार्य्य में पीपल का कूट बनावे और जानवरों को बांधने के लिये जाल होती है इसको भाङ्ग का बनावे॥१६॥ और बाधक वृक्ष का दण्ड करे॥१७॥ स्वाहैभ्यः इत्यादि और "अमित्रेभ्यो" से आहुति करे ॥१८॥ "दुराहामीभ्य०" को पढ़कर बधक के काठ से प्रज्वलित अग्नि में वाम हाथ से इङ्गिड को और शत्रु के लिये बाधक अग्नि में आहुति देवे ॥१९॥ अग्नि के उत्तर भाग में लाल अश्वत्थ की शाखा को काटकर नीले एवं लाल रंग के सूतों से लपेट करके "नील लोहितेनामून्"० इत्यादि से दक्षिण द्वार होकर छोड़ देवे ॥२०॥ "ये बाहव उत्तिष्ठत"० इत्यादि इस अनुवाक को शुद्ध समय में कर्ता जप करे॥ और संकेतानुसार संप्रेषण करे ॥२१॥ होम के लिये पृषदाज्य (दही का छिटा दिया घृत) लेवे ॥२२॥ सब स्थानों में—पाश में अश्वत्थ के कूट में, भाङ्ग के जालों में, बाधक दण्डों में, वज्र रूप पात्रों में और इङ्गिड के अलङ्करण में क्रुद्धानुमंत्रण करे ॥२३॥२४॥ शितिपदी

तवतीं दर्भरज्ज्वा क्षत्रियायोपासङ्गदण्डे बध्नाति ॥२५॥ द्वितीयामस्यति ॥२६॥ अस्मिन् वस्विति राष्ट्रावगमनम् ॥२७॥ आनुशूकानां व्रीहीणामाव्रस्कजैः काम्पीलैः श्रृतं सारूपवत्समाशयति ॥२८॥ अभीवर्त्तेनेतिरथनेमिमणि-मयः सीसलोहरजतताम्रवेष्टितं हेमनाभिं वासितं बद्ध्वा सूत्रोतं बर्हिषि कृत्वा सम्पातवन्तं प्रत्यृचं भृष्टीरभीव-र्तोत्तमाभ्यामाचृतति ॥२९॥ अचिक्रदद्दा त्वा गन्निति यस्माद्राष्ट्रादवरुद्धस्तस्याशायां शयनविधं पुरोडाशं दर्भेषूदके निनयति ॥३०॥ ततो लोष्टेन ज्योतिरा-यतनं संस्तीर्य क्षीरौदनमश्नाति ॥३१॥ यतो लोष्टस्ततः संभाराः ॥ ३२ ॥ तिसृणां प्रातरशिते पुरोडाशे व्हयन्ते

को पृषदाज्य से सम्पात करके दर्भरज्जु से क्षत्रिय के विश्रामार्थ उर्ध्वज दण्ड में बांध देवे ॥२५॥ और दूसरी शितिपदी को शत्रु सेना में फेंक देवे ॥२६॥ "अस्मिन्वसु"० से अपने राष्ट्र में प्रवेश करे ॥ जो शत्रु द्वारा अपने राष्ट्र से निकाला जाकर पुनः अपने राष्ट्र में जाता है उसके लिये यह प्रवेश विधि है ॥२७॥ आनुशूक (पहिले बार के काटे जाने पर फिर उत्पन्न हो) धान्य (यव आदि) के कटने पर श्रपण काठ और गुण्डारोचन लता से समान रूप रंग के बचा वाली गौ के दूध में पका कर राजा को खिलावे ॥२८॥ रथचक्र के बाहर पृष्ट के अवयव को मणि के आकार का बनाकर सीसा, लोहा, चान्दी, तामा, इनसे वेष्टित कर नाभिमणिद्वार को सुवर्ण मणिद्वार बनाकर कस्तूरी से त्रयोदशी आदि तिथि में बान्ध देवे और सूत से पोहकर कुश पर धरकर "अभी-वर्तोत्तमामुदसोसपत्नक्षयण:" इत्यादि दो ऋचाओं से प्रत्येक ऋचा से दूध का ढार मणि से देवे ॥२९॥ जिस देश से शत्रु राजा द्वारा निकाला गया हो उस राष्ट्र की ओर के क्षेत्र से व्रीहि, जल, दर्भ आदि लेकर निवास देश में शयन स्थान में विधि पुरोडाश को करके-कुशों को बिछाकर मंत्र के अन्त में जल के साथ लावे ॥३०॥ परराष्ट्र की दिशा से मट्टी का ढेला लेकर चूर्णित करे एवं उसको अग्नि स्थान के उत्तर भाग में विकिर देवे। जहाँ से मट्टी का ढेला लेवे वहीं से अन्य साधनों

॥३३॥७॥१६॥ भूतो भूतेष्विति राजानमभिषेक्ष्यन्महानदे शान्त्युदकं करोत्यादिष्टानाम् ॥१॥ स्थालीपाकं श्रपयित्वा दक्षिणतः परिगृह्याया दर्भेषु तिष्ठन्तमभिषिञ्चति ॥२॥ तल्पार्षभं चर्मारोहयति ॥३॥ उदपात्रं समासिञ्चेते ॥४॥ विपरिदधाने ॥५॥ सहैव नौ सुकृतं सह दुष्कृतमिति ब्रह्मा ब्रूयात् ॥६॥ यो दुष्कृतं करवत्तस्य दुष्कृतं सुकृतं नौ सहेति ॥७॥ आशयति ॥८॥ अश्वमारोह्यापराजितां प्रतिपादयति ॥९॥ सहस्रं ग्रामवरो दक्षिणा ॥१०॥ विपरिधानान्तमेकराजेन व्याख्यातम् ॥११॥ तल्पे दर्भेष्वभिषिञ्चति ॥१२॥ वर्षीयसि वैयाघ्रं चर्मारोहयति ॥१३॥ त्वत्वा-

---

को भी ग्रहण करे ॥३२ ॥ राष्ट्र के तीन जनों के प्रातःकाल भोजन कर लेने पर पुरोडाश से हवन करे ॥३३॥७॥१६॥ यह सोलहवीं कण्डिका समाप्त हुई ॥१६॥

अब लघुअभिषेक विधि को कहेंगे ॥ माण्डलिक, सामन्त, युवराज, सेनापति, या अन्य किसी का अभिषेक कर्म जानना । राजा आदि अभिषेक करने की इच्छा वाला महानदी गंगा, यमुना आदि के जल से पुरोहित मंत्रोक्त जल से तैय्यार करे ॥१॥ स्थालीपाक को पकाकर अग्नि के दक्षिण भाग में बिछाये हुए कुशों पर बैठे राजा आदि को पुरोहित यथाविधि "भूतोभूतेषु"० इत्यादि अभिषेक गण मंत्रों से अभिषेक करे ॥२॥ पलङ्ग पर लाल बैल के चर्म को बिछा कर उसपर राजा को पुरोहित आरोहण करावे ॥ जलपात्र को जल से सिञ्चन करे ॥४॥ पुरोहित राजा के बदले "सह नौ सुकृतं सह दुष्कृतम्" ऐसा ब्रह्मा कहे ॥६॥ राजा उत्तर देवे । "यो दुष्कृतं करवत्तस्य दुष्कृतं सुकृतं नौ सह" ॥७॥ स्थाली पाक को भक्षण करे ॥८॥ राजा घोड़ा पर चढ़कर पश्चिम दिशा की ओर जावे ॥९॥ सहस्र गौ दक्षिणा में पुरोहित को देवे ॥१०॥ सार्वभौम राजा का अभिषेक, माण्डलिक राजा के अभिषेक की अपेक्षा भिन्न है ऐसा कहा गया जानना ॥११॥ मंचान पर, कुशों पर, बैठे हुओं को अभिषिंचन करे इसका विकार फिर कुशोंपर का कहना तल्प के सम्बन्धार्थ जानना ॥१२॥ अधिक उमर वाले व्याघ्र के

रो राजपुत्रास्तल्पाः पृथक् पादेषु शयनं परामृश्य सभां प्रापयन्ति ॥१४॥ दासः पादौ प्रक्षालयति ॥१५॥ महाशूद्र उपसिञ्चति ॥१६॥ कृतसम्पन्नानक्षानातृतीयं विचिनोति ॥१७॥ वैश्यः सर्वस्वजैनमुपतिष्ठत उत्सृजायुष्मन्निति ॥१८॥ उत्सृजामि ब्राह्मणायोत्सृजामि क्षत्रियायोत्सृजामि वैश्याय धर्मो मे जनपदे चर्यतामिति ॥१९॥ प्रतिपद्यते ॥२०॥ आशयति ॥२१॥ अश्वमारोह्यापराजितां प्रतिपादयति ॥२२॥ सभामुदायाति ॥२३॥ मधुमिश्रं ब्राह्मणान् भोजयति ॥२४॥ रसानाशयति ॥२५॥ महिषाण्युपयाति ॥२६॥ कुर्युर्गामिति गार्ग्यपार्थश्रवसौ नेति भागलिः ॥२७॥ इममिन्द्र वर्धय क्षत्रियं म इति क्षत्रियं प्रातः प्रातरभिमन्त्रयते ॥२८॥ उक्तं समासेचनं विपरिधानम् ॥२९॥ सविता प्रसवानामिति पौरोहित्ये वस्त्य-

---

चर्म पर आरोहण करावे ॥१३॥ और राजपुत्र राजा के शयन-शय्या के पैर की ओर जब तक राजा को नींद न आवे तब तक शयन सम्बन्धि बातें करे और सभा को पहुँचावे ॥१४॥ शूद्रदास राजा के पैरों को प्रक्षालन करे ॥१५॥ महाशूद्र प्रक्षालन करते समय जल ढारा करे ॥१६॥ पुष्टिद्यूत के लिये बहेरा के फलों को चूने और द्यूत के लिये अक्षों को तैय्यार कर तीसरे पाशा को चून लेवे यों राजा द्यूत खेले ॥१७॥ "उत्सृज आयुष्मन्"० ऐसा कहकर वैश्य राजा के पास बैठे ॥१८॥ "उत्सृजामि"० इत्यादि मंत्र राजा पढ़े और वैश्य, राजा के निकट पहुँचे ॥१९॥२०॥ सब वर्णों से आज्ञा पाकर वैश्य सब पटरानियों के घरों में जावे और राजा को घोड़े पर चढ़ाकर पश्चिम दिशा में पहुँचा कर सभा में राजा को लेकर आवे ॥२३॥ और मधु मिला अन्न ब्राह्मणों को भोजन करावे । रसों को भोजन करावे ॥२५॥ और सब महिषियों के घरों में राजा जावे ॥२६॥ "कुर्युर्गाम्"—ऐसा गार्ग्य पार्थश्रवस ये दो आचार्य मानते हैं और भागलि नहीं मानते हैं ॥२७॥ 'इममिन्द्र वर्धय क्षत्रियम्"० प्रति दिन प्रातः समय पुरोहित अभिमंत्रणा किया करे

न्वैश्वलोपीः समिध आधाय ॥३०॥ इन्द्र क्षत्रमिति क्षत्रियमुपनयीत ॥३१॥ तदाहुर्न क्षत्रियं सावित्रीं वाचयेदिति ॥३२॥ कथं नु तमुपनयीत यन्न वाचयेत् ॥३३॥ वाचयेदेव वाचयेदेव ॥३४॥८॥१७॥ इत्यथर्ववेदे कौशिकसूत्रे द्वितीयोऽध्यायः समाप्तः ॥२॥

पूर्वस्य पूर्वस्यां पौर्णमास्यामस्तमित उदकान्ते कृष्णचैलपरिहितो निर्ऋतिकर्माणि प्रयुङ्क्ते ॥१॥ नाव्याया दक्षिणावर्ते शापेटं निखनेत् ॥२॥ अपां सूक्तैरवसिञ्चति ॥३॥ अप्सु कृष्णं जहाति ॥४॥ अहतवसन उपमुच्योपानहौ जीवघात्याया उदाव्रजति ॥५॥ प्रोष्य तामुत्तरस्यां साम्पदं कुरुते ॥६॥ शापेटमालिप्याप्सु निबध्य तस्मिन्नुपसमाधाय संपातवन्तं करोति ॥७॥ अश्नाति

॥२८॥ जलका आसेचन विपरिधान करके कहा गया है ॥२९॥ "सविता प्रसवाना"० इत्यादि मंत्र से अमावस्या को पुरोहित उपवास रहकर समिदाधान करे ॥३०॥ "इन्द्रक्षत्रम्"० से क्षत्रिय का उपनयन करे ॥३१॥ सो कहा है कि क्षत्रिय से सावित्री मंत्र न बचवावे ॥३२॥ तो कैसे उसका उपनयन किया जावे ? (जब सावित्री न बचवायी जावे) ॥३३॥ बचवावे ही बचवावे ही ॥३४॥ ८॥१७॥ यह सतरहवीं कण्डिका पूरी हुई ॥१७॥ और अथर्ववेद के कौशिकसूत्र के दूसरे अध्याय का भाषानुवाद समाप्त हुआ ॥

"पूर्वं त्रिषप्तीयम्"० सूक्त के अनुसार पहिली पौर्णमासी को सूर्यास्त समय जल के पास जाकर काला वस्त्र पहन कर निर्ऋति कर्मों (दुरिता दूर करने के लिये) को करने में प्रयुक्त होवे ॥१॥ नाव के दक्षिण भाग में शापेट को खने और अप सूक्तों से जल से सिंचन करे ॥२॥३॥ और जो काला वस्त्र पहिना है उसको जल में छोड़ देवे ॥४॥ और अखण्ड नये वस्त्र और जीवित पशु को मारकर जो चर्म लिया गया हो उससे बने जूते को छोड़ पीछे लौट कर देखता हुआ घर को आवे ॥५॥ उस रात्रि में वहाँ रहकर दूसरी रात्रि में ब्रह्मचारि साम्पद करे ॥६॥

॥८॥ आधाय कृष्णं प्रवाहयति ॥९॥ उपमुच्य जरदुपा-नहौ सव्येन जरच्छत्रं दक्षिणेन शालातृणान्यादीप्य जीर्णं वीरिणमभिन्यस्यति ॥१०॥ अनावृतमावृत्य सकृ-ज्जुहोति ॥११॥ सव्यं प्रहरत्युपानहौ च ॥१२॥ जीर्णं वीरिण उपसमाधायायं ते योनिरिति जरत्कोष्ठाद्व्रीही-ञ्छर्करामिश्रानावपति ॥१३॥ आ नो भरेति धानाः ॥१४॥ युक्ताभ्यां सह कोष्ठाभ्यां तृतीयाम् ॥१५॥ कृष्ण-शकुनेः सव्यजंघायामङ्कमनुबध्याङ्के पुरोडाशं प्रपतेत इत्य-नावृतं प्रपादयति ॥१६॥ नीलं सन्धाय लोहितमाच्छाद्य शुक्लं परिणह्य द्वितीययोष्णीषमङ्केनोपसाद्य सव्येन सहाङ्केनावाङ्प्स्वपविध्यति ॥१७॥ तृतीयया छन्नं चतुर्थ्या संवीतम् ॥१८॥ पूर्वस्य चित्राकर्म ॥१९॥ कुलाय श्रृतं

और शापेट को मट्टी से लीपकर जल में बांधकर उसमें उपसमाधान करके इसके पश्चात् नाव को दक्षिणावर्त करे ॥७॥ उपसमाधान कर स्थालीपाक पकाकर खावे ॥८॥ काले वस्त्र को जल में डालकर बहा देवे ॥९॥ एवं पुराने जूते को त्याग कर वाम हाथ से पुराने छाते को, दाहिने हाथ से शालातृणों को जलाकर पुराने वीरिण को डाल देवे ॥१०॥ प्रदक्षिण होकर नैर्ऋत्य कोण की ओर होकर "ये त्रिषप्ता०" इत्यादि सूक्त से आज्य की आहुति एक बार देवे ॥११॥ पुराने वीरिण को उप-समाधान करके "अयंयोनिः" पुराने कोष्ट से लेकर व्रीहि और शर्करा को मिलाकर आहुति करे ॥१३॥ "आनोभर०" इत्यादि से जरत्काष्ठ से लेकर पूर्ववत् करे ॥१४॥ समुचित दो सूक्तों काष्ठाभ्यां से तीसरी बार आहुति देवे ॥१५॥ काक जंघा में काले लोहे के काँटे को बांधकर उसमें पुरोडाश को बांधे ॥१६॥ एवं पीछे निर्ऋति दिशा के सम्मुख होकर "प्रपतेत" इस ऋचा से काक को छोड़ देवे ॥१७॥ नीले वस्त्र को नीचे पहन कर ऊपर लाल वस्त्र से ढाँप करके सफेद वस्त्र की पगड़ी पहन करके "या मा लक्ष्मीः०" इत्यादि मंत्र से लोह खण्ड द्वारा पगड़ी को जल में फेक देवे ॥१८॥ "एक शतं लक्ष्म०" इस ऋचा से लाल

हरितबर्हिषमश्नाति ॥२०॥ अन्वक्ताः प्रादेशमात्रीराद्धाति ॥२१॥ नाव्ययोः सांवेद्ये पश्चादग्नेर्भूमिपरिलेखे कीलालं मुखेनाश्नाति ॥२२। तेजोव्रतं त्रिरात्रमश्नाति ॥२३॥ तद्भक्षः ॥२४॥ शम्भुमयोभुभ्यां ब्रह्मजज्ञानमस्य वामस्य यो रोहित उदस्य केतवो मूर्धाहं विषासहिमिति सलिलैः क्षीरौदनमश्नाति ॥२५॥ मन्थान्तानि ॥२६॥ द्वितीयेन प्रवत्स्यन् हविषामुपदधीत ॥२७॥ अथ प्रस्येस्य ॥२८॥ अथ प्रस्येस्य ॥२९॥ अथ प्रार्थयमाणः ॥३०॥ अथ प्रार्थयमाणः ॥३१॥ चत्वारो घायाः पलाशय-

---

बध्नाति ॥११॥ प्रपथ इति नष्टैषिणां प्रक्षालिताभ्यक्त-पाणिपादानां दक्षिणान्पाणीन्निमृज्योत्थापयति ॥१२॥ एवं सम्पातवतः ॥१३॥ निमृज्यैकविंशतिं शर्कराश्च-तुष्पथेऽवक्षिप्यावकिरति ॥१४॥ नमस्कृत्येति मन्त्रो-क्तम् ॥१५॥ अंहोलिङ्गानामापो भोजनहवींष्यभिमर्शो-नोपस्थानमादित्यस्य ॥१६॥ स्वयं हविषां भोजनम् ॥१७॥ विश्वे देवा इत्यायुष्याणि ॥१८॥ स्थालीपाके घृतपि-ण्डान् प्रतिनीयाश्नाति ॥१९॥ अस्मिन्वसु यदाबध्नन्व प्राणानिति युग्मकृष्णलमादिष्टानां स्थालीपाक आधाय

मंत्रण करके तब उसपर चढ़े। और नौमणि को बान्ध लेवे ॥१०॥ अर्थात् नौका में बैठने वालों को नौमणि को ऋचा से अभिमंत्रण करके सम्पातवती नौमणि को बांध देवे ॥११॥ नष्ट द्रव्य के मिलने को कहते हैं। "प्रपथ०" से नष्ट वस्तु पाने वाले हाथ पैर धोकर साफ करके दहिने हाथ (पाणि) को मार्जन करके उठावे और इसी प्रकार संपातवती (गिरावें) करें ॥१३॥ इकीश शर्करा को मार्जन करके चौराहे पर फेक कर बखेर देवे ॥१४॥ और "द्यावापृथिवीभ्यां०" ऋचा को जप करके अर्थ सूक्त से उपस्थान करे ॥१५॥ सप्तप्रतीक का अंहोलिंगगण होता है। इसकी एक२ ऋचा से होम करे। १३ हवियों से आहुति करे ऐसा विकल्प पक्ष है। भोजन को अभिमंत्रण करके खिलावे। भक्ष को खावे। हवि, आज्य और समिधाकी आहुति करे। आप्लवनावसेचनादि यथासंभव करे। पाप संसर्ग में, व्याधि संसर्ग में, वर्ण संसर्ग में, दूसरे २ पापों में स्वस्त्ययन करे। अंहो लिङ्ग के विकल्प से हृदय को छू कर जप करके आदित्य का उपस्थान करे। उसी सूक्त से अभिमर्शन करे, पुरुष या अन्य का। वृक्ष, घर, स्त्री, पुरुष आदि का स्वस्त्ययन करे। अभिमर्शन करके आदित्य का उपस्थान करे ॥१७॥ हवि को अभिमंत्रण करके खावे। "विश्वेदेवा०" से स्वयं अभिमंत्रण करके खावे ॥१८॥ स्थालीपाक से घी के तीन पिण्डों को करके, धरकर अभिमंत्रण करके घी और स्थालीपाक को खावे। इससे आयु बढ़ेगा ॥१९॥ हिरण्यमणि को

बध्नाति ॥२०॥ आशयति ॥२१॥३॥५२॥

आयुर्दा इति गोदानं कारयिष्यन्सम्भारान् सम्भरति ॥ १ ॥ अमत्रिमोजोमानीं दूर्वामकर्णमश्ममण्डलमानडुहशकृत्पिण्डं षड् दर्भप्रान्तानि कंसमहते वसने शुद्ध-माज्यं शान्ता ओषधीर्नवमुदकुम्भम् ॥ २ ॥ बाह्यतः शान्तवृक्षस्येध्मं प्राञ्चमुपसमाधाय ॥ ३ ॥ परिसमुह्य पर्युक्ष्य परिस्तीर्य बर्हिरुदपात्रमुपसाद्य परिचरणेनाऽऽज्यं परिचर्य ॥ ४ ॥ नित्यान्पुरस्ताद्धोमान् हुत्वाज्यभागौ च ॥५॥ पश्चादग्नेः प्राङ्मुख उपविश्यान्वारब्धाय शान्त्युदकं करोति ॥६॥ तत्रैतत्सूक्तमनुयोजयति ॥ ७ ॥ त्रिरेवाग्निं सम्प्रोक्षति त्रिः पर्युक्षति ॥ ८ ॥ त्रिः कारयमाणमा-चामयति च सम्प्रोक्षति च ॥९॥ शकृत्पिण्डस्य स्थाल-रूपं कृत्वा सुहृदे ब्राह्मणाय प्रयच्छति ॥ १० ॥ तत्सु-

---

"अस्मिन्वसु०" इत्यादि से स्थालीपाक में डालकर बांधे। और तब भोजन करे ॥२०॥२१॥३॥५२॥ यह बावनवी कण्डिका समाप्त हुई ॥

"आयुर्दा०" से, गोदान कर्म को करने की इच्छा वाला, इसकी सामग्रियों को इकट्ठा करे। यह कर्म वर्ष में करे या जैसा कुल का धर्म हो वैसा करे ॥१॥ अमत्रि, ओजमानी, दूर्वा, अकर्ण, अश्ममण्डल, बैल का गोबर, दर्भ के छः प्रान्त, कटोरा, अखण्ड नये वस्त्र, शुद्ध घृत, शान्ताओषधी, और जल कुम्भ को लावे ॥२॥ और बाहर शान्त वृक्ष के इध्मको पूर्वमुख धरे ॥३॥ परिसमूहन, पर्युक्षण, परिस्तरण, करके बर्हिकुश, जलपात्र को लाकर और आज्यविधि पूर्वक तैयार करके ॥४॥ नित्य पुरस्तात् होमों को करके आज्य भाग की दो आहुतियों को करके ॥५॥ अग्नि के पश्चात् भाग में पूर्वमुख बैठकर अन्वारब्ध हुआ शान्ति जल को करे ॥६॥ वहां "आयुर्दा०" सूक्त की योजना करे ॥७॥ तीन बार अग्नि संप्रोक्षण और तीन ही बार पर्युक्षण करे ॥८॥ और तीन बार करवाने बालक को आचमन एवं संप्रोक्षण करावे ॥९॥ गोबर के पिण्ड को स्थाल रूप करके सुहृत् ब्राह्मण को देवे ॥१०॥ वह ब्राह्मण सुहृत् अग्नि के

हृद्दक्षिणतोऽग्नेरुदङ्मुख आसीनो धारयति ॥ ११ ॥ अथास्मा अन्वारब्धाय करोति ॥ १२ ॥ आयुर्दा इत्यनेन सूक्तेनाज्यं जुह्वन्मूर्ध्नि सम्पातानानयति ॥ १३ ॥ दक्षिणे पाणावश्ममण्डल उदपात्र उत्तरसम्पातान् स्थालरूप आनयति ॥१४॥ अमत्रिमोजोमानीं चोदपात्रेऽवधाय ॥ १५ ॥ स्थालरूपे दूर्वां शान्त्युदकमुष्णोदकं चैकधाभिसमासिच्य ॥१६॥ आयमगन्सविता क्षुरेणेत्युदपात्रमनुमन्त्रयते ॥१७॥ अदितिः श्मश्रिवत्युन्दति ॥१८॥ यत्क्षुरेणेत्युदकपत्रं क्षुरमद्भिश्चोत्य त्रिः प्रमार्ष्टि ॥ ॥१९॥ येनावपदिति दक्षिणस्य केशपक्षस्य दर्भपिञ्जूल्या केशानभिनिधाय प्रच्छिद्य स्थालरूपे करोति ॥ २० ॥ एवमेव द्वितीयं करोति ॥ २१ ॥ एवं तृतीयम् ॥ २२ ॥ एवमेवोत्तरस्य केशपक्षस्य करोति ॥२३॥४॥५३॥

अथ नापितं समादिशत्यक्षण्वन्वप केशश्मश्रुरोम

दक्षिण भाग में होकर उत्तर मुख बैठकर धारण करे ॥११॥ अब इस अन्वारब्ध बालक के लिये करे ॥१२॥ दक्षिणसे सुहृत् के उत्तर हाथ में होकर गिरा कर गोबर पिण्ड पर लावे ॥१४॥ उदपात्र में पोथिका और गुडूची को डालकर तब सम्पात को गोबर पिण्ड पर दूर्वा धरकर डाले और शान्त्युदक और गर्म जल एकत्र धारा करके आसिंचन कर "आयमगन्सविता०" से क्षुरा से उदपात्र को अनुमंत्रण करे। और "अदितिः श्मश्रू०" से दाढ़ी मूछ के बालों को काटे ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ ॥१७॥१८॥ "यत्क्षुरेण०" से जलपात्र को क्षुरा के जल से तीन बार मार्जन करे ॥१९॥ "येनावत्०" से शिर के दक्षिण के केशपक्ष पर दर्भपिञ्जुली द्वारा केशों पर धरकर काटकर ढेर करे ॥२०॥ इसी प्रकार उत्तरकेश पक्ष को भी करे ॥२१॥ इसी भांति तीसरे को करे। ॥२२॥ इसी प्रकार उत्तर केशपक्ष को भी करे ॥२३॥४॥५३॥ यह तिरपनवी कण्डिका समाप्त हुई।

अब नापित को आदेश करे कि बिना घाव किये केश, दाढ़ी, मोछ,

परिवप नखानि च कुर्विति ॥१॥ पुनः प्राणः पुनर्मैत्विन्द्रियमिति त्रिर्निमृज्य ॥ २ ॥ त्वयि महिमानं सादयामीत्यन्ततो योजयेत् ॥३॥ अथैनमुप्तकेशश्मश्रुं कृत्तनखमाप्लावयति ॥ ४ ॥ हिरण्यवर्णा इत्येतेन सूक्तेन गन्धप्रवादाभिरलङ्कृत्य ॥ ५ ॥ स्वक्तं म इत्यानक्ति ॥ ६ ॥ अथैनमहतेन वसनेन परिधापयति परिधत्तेति द्वाभ्याम् ॥ ७ ॥ एह्यश्मानमातिष्ठेति दक्षिणेन पादेनाश्ममण्डलमास्थाप्य प्रदक्षिणमग्निमनुपरिणीय ॥ ८ ॥ अथास्य वासो निर्मुष्णाति यस्य ते वास इत्येतया ॥९॥ अथैनमपरेणाहतेन वसनेनाच्छादयत्ययं वस्ते गर्भं पृथिव्या इति पञ्चभिः ॥ १० ॥ यथा द्यौर्मनसे चेतसे धिय इति महाव्रीहीणां स्थालीपाकं श्रपयित्वा शान्त्युदकेनोपसिच्याभिमन्त्र्य प्राशयति ॥ ११ ॥ प्राणापाना-

रोमों को बनाओ और नखों को काटो ॥१॥ "पुनः प्राणः" इत्यादि से तीन बार मार्जन करके ॥२॥ "त्वयि महिमानं सादयामि०" इत्यादि पुनः केशों को काटने के लिये नापित को क्षुरा साफ कर देवे ॥३॥ अब इस केशादि कटवाये बालक को स्नान करावे ॥४॥ "हिरण्यवर्णा०" इत्यादि सूक्त से कलशोदक को अभिमंत्रण करके "यस्ते गन्ध" तीन ऋचा से बालक को नहवावे और गन्ध पुष्प को अभिमंत्रण कर लेवे ॥५॥ "स्वक्तं म०" से दो आँखों में अञ्जन लगावे ॥६॥ और अखण्ड नये वस्त्र को "परिधत्त" इस दो ऋचाओं से पहनावे ॥७॥ "एह्यश्मानमातिष्ठ०" इत्यादि दक्षिण पग को पत्थर पर स्थापन करे और अग्नि की प्रदक्षिणा कर ऐसा करे ॥८॥ अब इस "यस्य ते वास०" ऋचा से ओढ़ने के वस्त्र को देवे ॥९॥ अब इस बालक को दूसरे वस्त्र से (जो नया हो) आच्छादन करे। "अयं वस्ते गर्भं पृथिव्या०" इन पांच ऋचाओं से ॥१०॥ "यथा द्यौर्मनसे चेतसे धिय०" से महाव्रीहियों के स्थालीपाक को पका कर शान्ति जल सेचन कर अभिमंत्रण करके प्राशन करावे ॥११॥ "प्राणापानौ ओजोऽसि०" से आज्य की आहुति करे। समिध का

वोजोऽसीत्युपदधीत ॥ १२ ॥ तुभ्यमेव जरिमन्निति कुमारं मातापितरौ त्रिः सम्प्रयच्छेते ॥१३॥ घृतपिण्डा-नाशयतः ॥ १४ ॥ चूडाकरणं च गोदानेन व्याख्यातम् ॥ १५ ॥ परिधापनाश्ममण्डलवर्जम् ॥ १६ ॥ शिवे ते स्तामिति परिदानान्तानि ॥१७॥ पार्थिवस्य मा प्रगा-मेति चतस्रः सर्वाण्यपियन्ति ॥ १८ ॥ अमन्त्रिमोजोमा-नीं च दूर्वां च केशांश्च शकृत्पिण्डं चैकधाभिसमाहृत्य ॥ १९ ॥ शान्तवृक्षस्योपर्यादधाति ॥ २० ॥ अधिकरणं ब्रह्मणः कंसवसनं गौर्दक्षिणा ॥ २१ ॥ ब्राह्मणान्भक्तेनो-पेप्सन्ति ॥ २२ ॥ ५ ॥ ५४ ॥

उपनयनम् ॥ १ ॥ आयमगन्निति मन्त्रोक्तम् ॥ २ ॥

आधान करे, पलाश आदि की समित् "पुरोडाश, दूध, ओदन, पायस और पशु की आहुति करे ॥१२॥ "तुभ्यमेव जरिमन्०" से कुमार को माता और पिता माता परस्पर संप्रयच्छन करें। जैसे—पहिले पिता माता को, तब माता पिता को, तीसरे पिता माता को छः बार सूक्त की आवृत्ति करे। फिर इसी सूक्त से तीन घृत पिण्डों को प्रत्येक २ को डाल कर अभिमंत्रण करके कुमार को चटावे, तब पूर्वोक्त पिंडदानों को देवे ॥ १३ ॥ १४ ॥ चूड़ाकरण गोदान के साथ कहा गया ॥ १५ ॥ परिधापन और अश्मारोहण को छोड़कर ॥१६॥ शिवे ते स्तां०" से परिदान के अन्त तक करो ॥१७॥ "पार्थिवस्य मा प्रगां०" से ४ को करे ॥१८॥ अमन्त्रि, ओजोमानी, दूर्वा, केशों को, गोबर पिण्ड को एक ही बार लाकर शान्त वृक्ष के ऊपर धरे ॥१९॥२०॥ दक्षिणा में ब्राह्मण को कटोरा, कपड़ा और गौ देवे ॥२१॥ और ब्राह्मण को उनकी इच्छा-नुसार भोजन करावे ॥२२॥५॥५४॥ यह चौपनवी कण्डिका समाप्त हुई ॥

अब उपनयन कर्म को कहेंगे। गर्भ के पाचवें या आठवें वर्ष में उपनयन संस्कार ब्राह्मण का होता है ॥१॥ "आयमगन्निति०" से दूर्वा, शान्ति जल, उष्ण जल को एक प्रकार करके अभिमंत्रण करे ॥ जलपात्र को अनुमंत्रण करे ॥२॥ छुरा को गर्म जल से मार्जन करके जल लेकर

यत्क्षुरेणेत्युक्तम् ॥ ३ ॥ येनावपदिति सकृदपिञ्जूलि ॥४॥ लौकिकं च समानामा परिधानात् ॥ ५ ॥ उपेतपूर्वस्य नियतं सवान्दास्यतोऽग्नीनाधास्यमानः पर्यवेतव्रतदीक्षिष्यमाणानाम् ॥६॥ सोष्णोदकं शान्त्युदकं प्रदक्षिणमनुपरिणीय पुरस्तादग्नेः प्रत्यङ्मुखमवस्थाप्य ॥ ७ ॥ आह ब्रूहि ॥ ८ ॥ ब्रह्मचर्यमागमुप मा नयस्वेति ॥९॥ को नामासि किंगोत्र इत्यसाविति यथा नामगोत्रे भवतस्तथा प्रब्रूहि ॥ १० ॥ आर्षेयं मा कृत्वा बन्धुमन्तमुपनय ॥ ११ ॥ आर्षेयं त्वा कृत्वा बन्धुमन्तमुपनयामीति ॥ १२ ॥ ओं भूर्भुवःस्वर्जनदोमित्यञ्जलावुदकमासिञ्चति ॥ १३ ॥ उत्तरोऽसानि ब्रह्मचारिभ्य इत्युत्तमं पाणिमन्वादधाति ॥१४॥ एष म आदित्यपुत्रस्तन्मे गोपायस्वेत्यादित्येन समीक्षते ॥ १५ ॥ अपक्रामन्

"आदित्या०" एवं "अदितिः" ऋचाओं से केशों को वपन करे ॥ "येनावपत्" से केशों को काटे, दर्भ पिञ्जुली को छोड़ करके ॥४॥ और लौकिक को परिधान तक तुल्य होता है ॥५॥ उपनीत पूर्व को नियत सवों को देते हुए अग्नियों का आधान करने वाला पर्यवेत दीक्षिष्यमाण का ठंढा गर्म मिले जल को, शान्ति जल को प्रदक्षिण अनुपरिणीय अग्नि के पूर्व भाग में पूर्व मुख बैठ करके कहें कि "कहा" ॥५॥६॥७॥८॥ "ब्रह्मचर्यमागमुप मा नयस्व०" ॥९॥ आचार्य कहें-"तुम्हारा क्या नाम है ? क्या गोत्र है ? तब ब्रह्मचारी कहे-मेरा नाम (जो हो राम आदिक) अमुक गोत्र, अमुक प्रवर, अमुकशर्म्माऽहं इत्यादि ॥१०॥ ब्रह्मचारी कहे-"आर्षेयं मा कृत्वा बन्धुमन्तमुपनय ॥११॥ आचार्य-"आर्षेयं त्वा कृत्वा बन्धुमन्तमुपनयामि" ॥१२॥ ओं भूर्भुवः स्वर्जनदों", से अञ्जली में जल आसिंचन करे ॥१३॥ "उत्तरोऽसानि ब्रह्मचारिभ्य०" से आचार्य ब्रह्मचारी के दहिने हाथ को पकड़ कर "एष म आदित्यपुत्रस्तन्मे गोपायस्व०" से आदित्य को देखे ॥१४॥१५॥ "अपक्रामन् पौरुषेयाद्

न्पौरुषेयाद्वृणान इत्येनं बाहुगृहीतं प्राञ्चमवस्थाप्य दक्षिणेन पाणिना नाभिदेशेऽभिसंस्तभ्य जपति ॥१६॥ अस्मिन् वसु वसवो धारयन्तु विश्वे देवा वसव आ यातु मित्रोऽमुत्र भूयादन्तकाय मृत्यव आरभस्व प्राणाय नमो विषासहिमित्यभिमन्त्रयते ॥१७॥ अथापि परिस्वरमाण आ यातु मित्र इत्यपि खल्वेतावतैवोपनीतो भवति ॥१८॥ प्रच्छाद्य त्रीन् प्राणायामान् कृत्वावच्छाद्य वत्सतरीमुदपात्रे समवेक्षयेत् ॥१९॥ समिन्द्र नः संवर्चसेति द्वाभ्यामुत्सृजन्ति गाम् ॥२०॥६॥५५॥

श्रद्धाया दुहितेति द्वाभ्यां भाद्रमौञ्जीं मेखलां बध्नाति ॥१॥ मित्रावरुणयोस्त्वा हस्ताभ्यां प्रसूतः प्रशिषा प्रयच्छामीति पालाशं दण्डं प्रयच्छति ॥२॥ मित्रावरुणयोस्त्वा हस्ताभ्यां प्रसूतःप्रशिषा प्रतिगृह्णामि । सुश्रवः सुश्रवसं मा कुर्ववक्रोऽविथुरोऽहं भूयासमिति प्रतिगृह्णाति ॥३॥ श्येनोऽसीति च ॥ ४ ॥ अथैनं व्रतादानीयाः समिध

वृणान०" से ब्रह्मचारी के बाहु को पकड़ कर पूर्व मुख धर कर अपने दहिने हाथ से ब्रह्मचारी के नाभि देश पर संस्तंभन कर जप करे "अस्मिन्वसु वसवो धारयन्तु०" इत्यादि से अभिमंत्रण करे ॥१६॥ १७॥ और भी आचार्य यदि त्वरमाण हो तो "आ यातु मित्रं०" यह भी- इससे भी बालक उपनीत होगा ॥१८॥ ब्रह्मचारी को वस्त्र से आच्छादन करके तीन प्राणायामों को करके वत्सतरी को जलपात्र में देखो ॥१९॥ "समिन्द्र नः संवर्च०" दो ऋचाओं से गौ को छोड़ देवे ॥२०॥६॥५५॥ यह पचपनवी कंडिका समाप्त हुई ॥

"श्रद्धया दुहिता०" इन दो ऋचाओं से भाद्रमौञ्जी मेखलाको ब्रह्मचारी के कमर में पहिनावे ॥ १ ॥ "मित्रावरुणयोस्त्वा०" से पलाश के दण्ड को देवे ॥ २ ॥ "मित्रावरुणयोस्त्वा०" से प्रतिग्रहण करे ॥३॥ "श्येनोऽसि०" से भी ॥४॥ अब इसको व्रतादानीय समिधों

आधापयति ॥५॥ अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तत्समापेयं तन्मे राध्यतां तन्मे समृध्यतां तन्मे मा व्यनशत्तेन राध्यासं तत्ते प्रब्रवीमि तदुपाकरोमि अग्नये व्रतपतये स्वाहा ॥६॥ वायो व्रतपते । सूर्य व्रतपते । चन्द्र व्रतपते । आपो व्रतपत्न्यो । देवा व्रतपतयो । वेदा व्रतपतयो । व्रतानां व्रतपतयो व्रतमचारिषं तदशकं तत्समाप्तं तन्मे राद्धं तन्मे समृद्धं तन्मे मा व्यनशत्तेन राद्धोऽस्मि तद्वः प्रब्रवीमि तदुपाकरोमि व्रतेभ्यो व्रतपतिभ्यः स्वाहेति ॥७॥ अथैनं बद्धमेखलमाहितसमित्कं सावित्रीं वाचयति ॥८॥ पच्छः प्रथमम् ॥९॥ ततोऽर्धर्चशः ॥१०॥ ततः संहिताम् ॥११॥ अथैनं संशास्त्यग्नेश्चासि ब्रह्मचारिन्मम चापोऽशान कर्म कुरूर्ध्वस्तिष्ठन्मा दिवा स्वाप्सीः समिध आधेहि ॥१२॥ अथैनं भूतेभ्यः परिददात्यग्नये त्वा परिददामि ब्रह्मणे त्वा परिददाम्युदङ्कथाय त्वा शूल्वाणाय परिददामि शत्रुञ्जयाय त्वा क्षात्रायणाय परिददामि मार्त्युंजयाय त्वा मार्त्यवाय परिददाम्यघोराय त्वा परिददामि तक्षकाय त्वा वैशालेयाय परिददामि हाहाहूहूभ्यां त्वा गन्धर्वाभ्यां परिददामि योगक्षेमाभ्यां त्वा परिददामि भयाय च त्वाऽभयाय च परिददामि विश्वेभ्य-

---

का आधान करावे ॥५॥ "अग्न व्रतपते०" इत्यादि से आहुतियाँ करे ॥६॥७॥ इस ब्रह्मचारी को जिसने मेखला पहनी, समिदाधान किया इसको सावित्री का उपदेश करे ॥८॥ पहिले पाद २ करके कहे ॥९॥ तब आधी २ ऋचा ॥ १० ॥ फिर सबको मिलाकर ॥११॥ अब इसका आचार्य्य भलि भाँति शासन करे—तुम अग्नि का ब्रह्मचारी हो, जल से सब कर्म करो, खड़े होकर । दिन में मत सोओ, समिधाओं का आधान करो ॥११॥१२॥ अब भूतों के लिये आचार्य देवे "अग्नये त्वा परिददामि०" इत्यादि ॥१३॥ "अस्ति चरतादिहैवेति मयि रमन्तां ब्रह्मचारिणः"

स्त्वा देवेभ्यः परिददामि सर्वेभ्यस्त्वा देवेभ्यः परिददामि विश्वेभ्यस्त्वा भूतेभ्यः परिददामि सर्वेभ्यस्त्वा भूतेभ्यः परिददामि सप्रजापतिकेभ्यः ॥१३॥ स्वस्ति चरतादिहेति मयि रमन्तां ब्रह्मचारिण इत्यनुगृह्णीयात् ॥ १४ ॥ नानुप्रणुदेत् ॥ १५ ॥ प्रणीतीरभ्यावर्तस्वेत्यभ्यात्ममावर्तयति ॥१६॥ यथापः प्रवता यन्ति यथा मासा अहर्जरम्। एवा मा ब्रह्मचारिणो धातरायन्तु सर्वदा ॥ स्वाहेत्याचार्यः समिधमादधाति ॥१७॥७॥५६॥

श्रद्धाया दुहितेति द्वाभ्यां भाद्रमौञ्जीं मेखलां ब्राह्मणाय बध्नाति ॥१॥ मौर्वीं क्षत्रियाय धनुर्ज्यां वा ॥२॥ क्षौमिकीं वैश्याय ॥ ३ ॥ मित्रावरुणयोस्त्वा हस्ताभ्यां प्रसूतः प्रशिषा प्रयच्छामीति पालाशं दण्डं ब्राह्मणाय प्रयच्छति ॥४॥ आश्वत्थं क्षत्रियाय ॥५॥ न्यग्रोधावरोहं वैश्याय ॥६॥ यद्यस्य दण्डो भज्येत य ऋते चिदभिश्रिष इत्येतयालभ्याभिमन्त्रयते ॥७॥ सर्वत्र शीर्णे भिन्ने नष्टेऽन्यं कृत्वा पुनर्मैत्विन्द्रियमित्यादधीत ॥ ८ ॥ अथ

कह कर अनुग्रह करे ॥१४॥ आचार्य ब्रह्मचारी को कहे "मेरे सम्मुख होवो" ब्रह्मचारी आचार्य के सम्मुख होवे ॥१५॥१६॥ "यथापः प्रवता०" इत्यादि से आचार्य समिधाओं को आहुति करे ॥१७॥७॥५६॥ यह छप्पनवीं कण्डिका समाप्त हुई॥

"श्रद्धया दुहिता०" से भाद्रमौंजी मेखला को ब्राह्मण को पहनावे ॥१॥ मौर्वी मेखला या तांतकी क्षत्रिय को ॥२॥ रेशम की मेखला वैश्य को ॥३॥ "मित्रावरुणयोस्त्वा०" इत्यादि से पलाश का दण्ड ब्राह्मण को, अश्वत्थ का दण्ड क्षत्रिय को, न्यग्रोधावरोह वैश्य को देवे ॥४॥५॥६॥ यदि ब्रह्मचारी का दण्ड टूट जावे तो "य ऋते चिदभिश्रिषः०" इत्यादि ऋचा से छूकर अभिमंत्रण करे ॥७॥ सबही जगह टूटने, टुकड़े २ हो जाने, खो जाने की दशा में दूसरे दण्ड को बनाकर "पुनर्मैत्विन्द्रियं०" से आधान करे ॥८॥ ब्रह्मचारी के वर्तों के विषय में कहते हैं ॥९॥

वासांसि ॥९॥ ऐणेयहारिणानि ब्राह्मणस्य ॥ १० ॥ रौरव-पार्षतानि क्षत्रियस्य ॥ ११ ॥ आजाविकानि वैश्यस्य ॥१२॥ सर्वेषां क्षौमशाणकम्बलवस्त्रम् ॥१३॥ काषा-याणि ॥१४॥ वस्त्रं चाप्यकाषायम् ॥१५॥ भवति भिक्षां देहीति ब्राह्मणश्चरेत् ॥ १६ ॥ भिक्षां भवती ददात्विति क्षत्रियः ॥१७॥ देहि भिक्षां भवतीति वैश्यः ॥१८॥ सप्त कुलानि ब्राह्मणश्चरेत्त्रीणी क्षत्रियो द्वे वैश्यः ॥१९॥ सर्वं ग्रामं चरेद्भैक्षं स्तेनपतितवर्जम् ॥ २० ॥ मय्यग्र इति पञ्च प्रश्नेन जुहोति ॥२१॥ सं मा सिञ्चन्त्विति त्रिः पर्यु-क्षति ॥२२॥ यदग्ने तपसा तपोऽग्ने तपस्तप्यामह इति द्वाभ्यां परिसमूहयति ॥ २३ ॥ इदमापः प्रवहतेति पाणी प्रक्षालयते ॥२४॥ सं मा सिञ्चन्त्विति त्रिः पर्युक्षति ॥२५॥ अग्ने समिधमाहार्षमित्यादधाति चतस्रः ॥२६॥ एधोऽ-सीत्यूष्मभक्षं भक्षयत्या निधनात् ॥ २७ ॥ एवं नो मेध

ऐणेय हरिण का चर्म ब्राह्मण के लिये, रुरुमृग का चर्म क्षत्रिय के लिये, बकरे और भेड़ का चर्म वैश्य के लिये जानो ॥१०॥११॥१२॥ सबही वर्णों के लिये रेशमी, शण का, और कम्बल का वस्त्र बनावे ॥१३॥ काषाय रंग के वस्त्र हों ॥ वस्त्र भी काषाय रंग का न हो ॥१४॥१५॥ आप भिक्षा देवें—ऐसा कह कर ब्रा० ब्र० मांगे, "भिक्षां भवती ददातु—" ऐसा कहकर क्ष० मांगे और "देहि भिक्षां भवति"—ऐसा कह कर वैश्य मांगे ॥१६॥१७॥१८॥ सात घरों से ब्राह्मण, तीन घर से क्षत्रिय और दो घरों से वैश्य भिक्षा मांगे ॥ १९ ॥ सबही घरों से (ग्राम भर) भिक्षा मांगे, चोर एवं पतित को छोड़ कर ॥ २० ॥ "मय्यग्र०" से पञ्च प्रश्न से आहुति करे ॥२१॥ "सं मा सिञ्चन्तु०" से तीनवार पर्युक्षण करे ॥२२॥ "यदग्ने तपसा०" इत्यादि दो ऋचाओं से परिसमूहन करे ॥२३॥ "इदमापः प्रवह०" से दोनों हाथों को धोवे ॥२४॥ "सं मा सिञ्चन्तु०" से तीन वार पर्युक्षण करे ॥२५॥ "अग्ने समिधमाहार्ष०" से चार समि-धाओं को आधान करें ॥२६॥ "एधोऽसि०" से ऊष्मभक्षण (धूमभक्षण)

इत्युपतिष्ठते ॥२८॥ यदन्नमिति तिसृभिर्भैक्षस्य जुहोति ॥२९॥ अहरहः समिध आहृत्यैवं सायंप्रातरभ्यादध्यात् ॥३०॥ मेधाजनन आयुष्यैर्जुहुयात् ॥३१॥ यथाकामं द्वादशरात्रमरसाशी भवति ॥३२॥८॥५७॥

भद्राय कर्णः क्रोशतु भद्रायाक्षि वि वेपताम् ॥ परा दुःष्वप्न्यं सुव यद्भद्रं तन्न आ सुव ॥ अक्षिवेपं दुःष्वप्न्यमार्त्तिं पुरुषरेषिणोम् ॥ तदस्मदश्विना युवमप्रिये प्रतिमुञ्चतम् ॥ यत्पार्श्वादुरसो मे अङ्गादङ्गादववेपते ॥ अश्विना पुष्करस्रजा तस्मान्नः पातमंहस इति कर्णं क्रोशन्तमनुमन्त्रयते ॥१॥ अक्षि वा स्फुरत् ॥२॥ वि देवा जरसोत देवा आवतस्त उप प्रियमन्तकाय मृत्यव आ रभस्व प्राणाय नमो विषासहिमित्यभिमन्त्रयते ॥३॥

करे निधान से ॥२७॥ "त्वं नो मेध०" से उपस्थान करे॥ २८॥ "यदन्नं०" इन तीन ऋचाओं से भिक्षाकी आहुतियां करे ॥ २९ ॥ प्रति दिन समिधाओं को ला २ कर सायं प्रातः काल आधान करे ॥ ३० ॥ मेधाजनन और आयुष्यगण सूक्तों से आहुतियां करे ॥३१॥ यथाकाम १२ रात रस न खावे ॥३२॥८॥५७॥ यह सत्तावनवी कंडिका समाप्त हुई ॥

"भद्राय कर्णः क्रोशतु०"इत्यादि से खुजलाते कान को अभिमंत्रण करे। आँख के फड़कने में, बुरे स्वप्न देखने पर, अनिष्ट देखने पर, और अद्भुत देखने पर अभिमंत्रण करे ॥१॥२॥ "वि देवा जरसोत०" इत्यादि से पुरुष शरीर को अभिमंत्रण करे आयुष्कामना वाले ॥३॥ ब्राह्मणोक्त और ऋषिहस्त- जिन में ब्राह्मणों को कहते हैं । सात ब्राह्मणों को अभीष्ट भोजन करा कर एक को पूर्व मुख, एक को दक्षिण मुख, चार को उत्तर मुख, "सर्वे उत देवाः" इस सूक्त से पुरुष शरीर को अभिमर्शन करे ॥ अब ऋषिहस्त को कहते हैं। "अन्तकाय मृत्यवे०" सूक्त से नाभि के ऊपर और नीचे अभिमंत्रण करे। सूक्त को दो वार जप करे। "आ रभस्व०" से हृदय को अभिमंत्रण करे। "आवतस्ते

ब्राह्मणोक्तमृषिहस्तश्च ॥ ४ ॥ कर्मणे वां वेषाय वां सुकृताय वामिति पाणी प्रक्षाल्य ॥ ५ ॥ निर्दुरर्मण्य इति संधाव्य ॥६॥ शुद्धा न आप इति निष्ठीव्य जीवाभिराचम्य ॥ ७ ॥ एहि जीवमित्याञ्जनमणिं बध्नाति ॥ ८ ॥ वाताज्जात इति कृशनम् ॥९॥ नव प्राणानिति मन्त्रोक्तम् ॥१०॥ घृतादुल्लुप्तमा त्वा चृतस्वृतुमिष्ट्वा मुञ्चामि त्वोत देवा आवतस्त उप प्रियमन्तकाय मृत्यव आरभस्व प्राणाय नमो विषासहिमित्यभिमन्त्रयते ॥११॥ निर्दुरर्मण्य इति सर्वसुरभिचूर्णैररण्येऽप्रतीहारं प्रलिम्पति ॥१२॥ अथ नामकरणम् ॥१३॥ आ रभस्वेमामित्यविच्छिन्नामुदकधारामालम्भयति ॥१४॥ पूतुदारुं बध्नाति ॥१५॥ पाययति ॥१६॥ यत्ते वास इत्यहतेनोत्तरसिचा

ब्राह्मणाय नमः०" इन दो सूक्तों से दहिने कान को अनुमंत्रण करे ॥४॥ "कर्मणे वां वेषाय वां सुकृताय वां०" से दोनों हाथों को प्रक्षालन करे ॥ और "वि देवा०" सूक्त से अभिमंत्रण करे ॥ ५ ॥ "निर्दुरर्मण्य०" से जोड़ कर ॥६॥ "शुद्धा न आपः" से थूक करके "जीवा स्थ०" इन चार ऋचाओं से आचमन करके "एहि जीवं०" से आञ्जन मणि को बान्धे ॥७॥ आयुष्काम युद्ध में रक्षा के लिये इस का नाश नहीं होता है। न शपथ करने से और न जादू टोना से नाश होता है ॥८॥ "वाताज्जात०" से कृशन करे अर्थात् आयुष्काम रक्षार्थी उपनयनमें नित्य बान्धे ॥ ९ ॥ "नव प्राणान्०" सूक्त से सोना, चाँदी, लोहा, इन तीनों चूर्ण को इकट्ठा करके नव शलाक मणि को त्रिवृत बना कर धर कर अभिमंत्रण करके बान्धे ॥ १० ॥ "घृतादुल्लुप्तमा त्वा०" इत्यादि से आयुष्काम, आरोग्य काम, रक्षा काम, वाला शरीर को अभिमंत्रण करे ॥११॥ "निर्दुरर्मण्य०" से सर्व सुरभि चूर्णों से वन में अप्रतीहार लीपे यह विकल के लिये कर्म है ॥१२॥ अब नामकरण को कहते हैं ॥१३॥ "आ रभस्वेमां" इस अर्थ सूक्त से कुमार के दहिने हाथ पर जल की धारा को डाले ॥१४॥ और देवदारु मणि धर करके अभिमंत्रण कर

प्रच्छादयति ॥१७॥ शिवे ते स्तामिति कुमारं प्रथमं निर्णयति ॥१८॥ शिवौ ते स्तामिति व्रीहियवौ प्राशयति ॥१९॥ अह्ने च त्वेत्यहोरात्राभ्यां परिददाति ॥२०॥

घीस कर उसे बान्धे ॥१५॥ और उस जल को पिलावे तब पुण्याहवाचन के अन्त में नामकरण करे । २ या ४ अक्षरों का मन्य संयुक्त या देवता संयुक्त नाम धरे । पिता कुमार के दहिने कान में सोना धर कर उस का नाम कहे ॥१६॥ "यत्ते वास०" से यंत्र निर्मुक्त वस्त्र से उत्तर किनारे से आछादन करके चार परिदानों को "शिवे ते स्तां०" इन दो ऋचाओं से और "हृदे ते०" तथा "पार्थिवस्य" इन दो से "मा प्रगाम०" इन दो से और व्रीहि, जौ, शमी प्रान्त, और जल को "द्यावापृथिवीभ्यां त्वा परिददामि०" से देवे ॥१७॥ पुनः कुमार के मूर्धा पर "शिवौ ते स्तां०" इन दो ऋ० से, "पार्थिवस्य०" इन दो से, "मा प्रगाम०" दो से, "व्रीहि यवाभ्यां त्वा परिददामि" "अन्हे च त्वा०" इस एक से, "पार्थिवस्य०" दो से "मा प्रगाम०" दो से, "अहोरात्राभ्यां त्वा परिददामि शरद०" इस एक से, "पार्थिवस्य०" दोसे, व्रीहि, जौ, शमी के पत्ते और जलको प्राशन करावे । "ऋतुभ्यस्त्वा परिददामि०" से बालक के मूर्धा में देवे और अभ्यातानादि उत्तरतन्त्र को करे । यह नामकरण संस्कार समाप्त हुआ ॥१७॥ अब चौथे मास में निष्क्रमण संस्कार करो "शिवे ते स्तां०" दो ऋचाओं से कुमार को घर से "बाहर निकाले । "उद्वयं तमसस्परि०" एक से सूर्य को दिखलावे और को पूर्वोक्त चार परिदानों को देवे और अभ्यातानादि उत्तरतंत्र की आहुतियां देवे ॥ निष्क्रमण समाप्त हुआ ॥१८॥ अब छठे मास में कुमार का अन्न प्राशन करे ॥ "अव्यचसश्च" इत्यादि अभ्यातानान्त कर्म करके "भूमे मात क०" इस एक से कुमार को भूमि पर बैठावे । "शिवौ ते स्तां०" से व्रीहि और जौ को अभिमंत्रण करके उसे घस कर कुमार को प्लावे ॥ और सब अन्नों को पूरा करे, स्रुक्, स्रुवा, पुस्तक, द्रव्य इनको देवे और पूर्वोक्त चारो परिदानों को यथाविधि देवे ॥ "स्वस्ति न इन्द्र०" से कुमार को अन्न प्राशन कराकर अभ्यातानादि उत्तरतंत्र को करे ॥ यह अन्नप्राशन कर्म समाप्त हुआ ॥१९॥ "अन्हे च त्वा०" से दिन रात्रों को देवे, "शरदे त्वा०" से ऋतुओं को

शरदे स्वेत्यृतुभ्यः ॥२१॥ उदस्य केतवो मूर्धाहं विषासहि-मित्युद्यन्तमुपतिष्ठते ॥२२॥ मध्यंदिनेऽस्तं यन्तं सकृत्प-र्यायाभ्याम् ॥२३॥ अंहोलिङ्गानामापो भोजनहवींष्युक्ता-नि ॥२४॥ उत्तमासु यन्मातली रथक्रीतमिति सर्वासां द्वितीया ॥२५॥६॥५८॥

विश्वे देवा इति विश्वानायुष्कामो यजते ॥१॥ उपतिष्ठते ॥२॥ इदं जनास इति द्यावापृथिव्यौ पुष्टि-कामः ॥३॥ सम्पत्कामः ॥४॥ इन्द्र जुषस्वेतीन्द्रं बलकामः ॥५॥ इन्द्रमहमितिपण्यकामः ॥६॥ उदेनमुत्तरं नय योऽ-स्मानिन्द्रः सुत्रामेति ग्रामकामः ॥७॥ ग्रामसाम्पदाना-

---

देवे ॥२०॥२१॥ "उदस्य केतवो०" इत्यादि अनुवाक से तीनों समय प्रतिदिन सूर्य्य का उपस्थान करे यदि आयु वृद्धि की कामना हो अर्थात् सूर्योदय समय, मध्यदिन में और अस्त होते समय भगवान् सूर्य का उपस्थान करे ॥२२॥२३॥ और अंहोलिङ्गक गण के मंत्रों से जलको अभिमंत्रण कर पिये, भोजन को अभिमंत्रण कर खावे और हवि को अभिमंत्रण कर सूर्य्य के नाम आहुति देवे आयुष्कामना वाला किया करे ॥२४॥ "अग्नि ब्रूम०" सूक्त के "यन्मातली रथक्रीतं०" सब ऋचाओं के दूसरी ऋचा व्यतिषङ्ग से व्यवहार करे ॥२५॥९॥५८॥ यह अठावनवी कंडिका समाप्त हुई ॥

अब काम्य कर्मों की विधि को कहेंगे । संभार के लक्षण में मण्डप विधान कहा गया है । या घर में करे ॥ आयुष्कामना वाला "विश्वे देवा०" इत्यादि से चरु की आहुति देवे और उपस्थान करे तो उसकी आयु १०० वर्ष की होगी ॥१॥२॥ "इदं जनास०" से पुष्टि कामना वाला और सम्पत्ति चाहने वाला "द्यावापृथिवी" से यज्ञ करे ॥३॥४॥ पुरुषादि बल कामना वाला राजा नित्य "इन्द्र जुषस्व०" इत्यादि से अग्नि में आहुति करे ॥ ५ ॥ "इन्द्रमहं०" से पण्य (किसी प्रकार व्यवसाय) की कामना वाला अग्नि में आहुति किया करे ॥ ६ ॥ "उदेनमुत्तरं०" इत्यादि से ग्राम की इच्छा वाला आहुतियां करे और उपस्थान करे ॥७॥ ग्राम सम्पत् के लिये पलाश की समिधों का

पदानामप्यय: ॥८॥ यशसं मेन्द्र इति यशस्काम: ॥९॥ मह्यमाप इति वर्चस्काम: ॥१०॥ आगच्छत इति जायाकाम: ॥११॥ वृषेन्द्रस्येति वृषकाम: ॥१२॥ आ त्वाहार्षं ध्रुवा द्यौरिति ध्रौव्यकाम: ॥१३॥ त्यमू षु त्रातारमा मन्द्रैरिति स्वस्त्ययनकाम: ॥१४॥ सामास्त्वाग्नेऽभ्यर्चते-त्यग्निं संपत्काम: ॥१५॥ पृथिव्यामिति मन्त्रोक्तम् ॥१६॥ तदिदास धीती वेतीन्द्राग्नी ॥१७॥ यस्येदमा रजोऽथर्वाणमदितिर्द्यौरदितेः पुत्राणां बृहस्पते सवितरित्यभ्युदितं

आधान करे और घृत धरके आस्तरणों की आहुति करे ॥८॥ यश की कामना वाला "यशसं मेन्द्र०" से चरुकी आहुति करे। और "भृशमिन्द्रं०" से उपस्थान करे ॥ ९ ॥ कूप, तड़ाग, वापी, पुष्करिणी, जल-सेतु बान्धने आदि कामना वाला "मह्यमाप:" से इन्द्र के लिये आहुतियाँ देवे एवं उपस्थान करे ॥ १० ॥ "आगच्छत०" से इन्द्र की आहुति और उपस्थान करे सन्तान की इच्छावाला ॥११॥ बैल की कामनावाला इन्द्र की आहुति और उपस्थान "वृषेन्द्रस्य०" से करे ॥१२॥ सार्वभौमराजा होने की इच्छा से "आ त्वा हार्षं ध्रुवा द्यौ:" से इन्द्र की आहुति और उपस्थान करे ॥१३॥ दो पैर एवं चार पैर वाले मनुष्य एवं पशु के कल्याण की इच्छा से "त्यमू षु त्रातारमा मन्द्रै:०"। से इन्द्र की आहुति एवं उपस्थान करे ॥१४॥ सम्पत् चाहनेवाला "सामास्त्वाग्नेऽभ्यर्चत०" से अग्नि की आहुति और उपस्थान करे ॥१५॥ पृथ्वी, अग्नि, अन्तरिक्ष, वायु, द्यौ, आदित्य, दिशायें, चन्द्रमा ये आठ देवता, हैं। इनकी आहुतियों के लिये आठ अलग २ चरु पकाकर "पृथिव्यां०" से आहुतियां करे और उपस्थान करे। सब कामनावाला ॥१६॥ "तदिदास धीती वेतीन्द्राग्नी०" से इन्द्र एवं अग्नि की आहुति एवं उपस्थान करे सर्व कामना वाला ॥१७॥ इन्द्र, अथर्वा, अदिति, देवताओं को बृहस्पति को "यस्येदमा रजो०" इत्यादि से आहुतियां करे और उपस्थान करे सब कामनावाला ॥ और "बृहस्पते सवित:"। इस एक ऋचा से सूर्य्योदय होने पर सोते हुए ब्रह्मचारी को जगाकर उठा देवे। सूर्य्योदय

ब्रह्मचारिणं बोधयति ॥१८॥ धाता दधातु प्रजापतिर्जनयत्यन्वद्य नो यत्र इन्द्रो ययोरोजसा विष्णोर्नु कमग्राविष्णू सोमारुद्रा सिनीवालि बृहस्पतिर्नो यत्ते देवा अकृण्वन्पूर्णा पश्चात् प्रजापतेऽभ्यर्चत को अस्या न इति प्रजापतिम् ॥१९॥ अग्न इन्द्रश्चेति मन्त्रोक्तान् सर्वकामः ॥२०॥ य ईशे ये भक्षयन्त इतीन्द्राग्नी लोककामः ॥२१॥ अन्नं ददाति प्रथमम् ॥२२॥ पशूपाकरणमुत्तमम् ॥२३॥ सर्वपुरस्ताद्धोमा युज्यन्ते ॥२४॥ दोषो गायेत्यथर्वाणं समावृत्याश्नाति ॥ २५ ॥ अभयं द्यावापृथिवी श्येनोऽसीति प्रतिदिशं सप्तर्षीनभयकामः ॥२६॥ उत्तरेण दीक्षितस्य वा ब्रह्मचारिणो वा दण्डप्रदानम् ॥ २७ ॥ द्यौश्च म इति द्यावापृथिव्यौ विरिष्यति ॥२८॥ यो अग्ना-

---

तक सोते रहने का प्रायश्चित है ॥१८॥ "धाता दधातु०" इत्यादि से मंत्र में कहे हुए देवताओं के नाम आहुति और उपस्थान करे ॥१९॥२०॥ "य ईशे ये भक्षयन्त०" से इन्द्र और अग्निकी आहुतियां एवं उपस्थान करे ॥ सर्वलोकाधिपत्य कामनावाले करें॥२१॥"अन्नं ददाति०" से अभीष्ट अन्न को अभिमंत्रण करके भिक्षुओंको देवे॥२२॥ यह पहिले करे ॥२२॥ और पुनः ये पशुका उपाकरण करे ॥२३॥ और सर्वपुरस्तात् होमों को करे ॥२४॥ अथर्वा ऋषि के नाम आहुति एवं उपस्थान करे सर्वलोकाधिपत्य की कामनावाला। गोदानादिक तन्त्रको परिधापनान्त तक करके तब "इदावत्सराय०" से आहुति करे। तब अभ्यतानों को करे। फिर "ऋचं साम०" से आहुति करे ॥ अभ्यातानान्त तक करके, "दोषो गाय०" इस सूक्त से भात धर कर अभिमंत्रण करके खावे ॥२५॥ व्रत को समाप्ति कर व्रत को त्याग देवे। "अभयं द्यावापृथिवी०" से जिस ग्राम या नगर को अभय करने की इच्छा हो उसके सब दिशाओं में आहुतियां करे ॥२६॥ ज्योतिष्टोमयज्ञ में दीक्षित पुरुष को ब्रह्मा दण्ड देवे ॥२८॥ यदि नाश होने की बारी आ जावे तो "द्यौश्च म०" से द्यावापृथिवी की आहुति तथा उपस्थान करे ॥२८॥ "यो अग्नौ०" इत्यादि से रुद्रदेवों को आहुतियाँ

विति रुद्रान् स्वस्त्ययनकामः स्वस्त्ययनकामः ॥२९॥ ॥१०॥५९॥

इत्यथर्ववेदे कौशिकसूत्रे सप्तमोऽध्यायः समाप्तः ॥ ७ ॥

अग्नीनाधास्यमानः सवान्वा दास्यन् संवत्सरं ब्रह्मौदनिकमग्निं दीपयति ॥१॥ अहोरात्रौ वा ॥२॥ याथाकामी वा ॥३॥ संवत्सरं तु प्रशस्तम् ॥४॥ सवाग्निसेनाग्नी तादर्थिकौ निर्मथ्यौ वा भवतः ॥५॥ औपासनौ चोभौ हि विज्ञायेते ॥६॥ तस्मिन्देवहेडनेनाज्यं जुहुयात् ॥७॥ समिधोऽभ्यादध्यात् ॥८॥ शकलान् वा ॥९॥ तस्मिन् यथाकामं सवान् ददात्येकं द्वौ सर्वान् वा ॥१०॥ अपि वैकैकमास्माशिषो दातारं वाचयति ॥११॥ पराशिषोऽनुमन्त्रणमनिर्दिष्टाशिषश्च ॥१२॥ दातारौ कर्माणि कुरुतः ॥१३॥ तौ यथालिङ्गमनुमन्त्रयते ॥१४॥ उभयलिङ्गैरुभौ

देवे और उपस्थान करे स्वस्त्ययन की इच्छावाला ॥२९॥१०॥५९॥

यह अथर्ववेद के कौशिक सूत्र के सप्तम अध्यायका भाषानुवाद पूरा हुआ ॥७॥

अग्नियों को आधान करने की इच्छा वाले, या सवों को देने की इच्छा वाले संवत्सर तक ब्रह्मौदन अग्नि को जलावे ॥१॥ या दो दिन-रात तक ॥२॥ या जितने समय तक इच्छा हो ॥३॥ परन्तु संवत्सर तक का समय सबसे अच्छा है ॥४॥ सवाग्नि और सेनाग्नि, तादर्थिक या निर्मथन से होते हैं ॥५॥ दोनों ही औपासन जान पड़ते हैं ॥६॥ उसमें "देवहेडन०" इत्यादि पूरे अनुवाक से आहुतियाँ करे ॥७॥ समिधाओं का आधान करे ॥८॥ या शाकलों का करे ॥९॥ उसके निमित्त जैसी इच्छा हो सब देवे एक या दो देवे ॥१०॥ अथवा एक २ को दाता को आशिष बचवावे ॥११॥ पर का अनुमंत्रण निर्दिष्ट नहीं है और आशिष का वाचन भी अनिर्दिष्ट है ॥१२॥ दाता दोनों कर्मों को करे ॥१३॥ उन दोनों को यथालिङ्ग अनुमंत्रण करे ॥१४॥ दोनों लिङ्गों से दोनों दाताओं को—पुंलिङ्ग से पुरुष दाता को एवं स्त्रीलिङ्ग से पत्नी

पुंलिङ्गैर्दातारं स्त्रीलिङ्गैः पत्नीम् ॥१५॥ उदहृत्सम्प्रैषवर्जम् ॥१६॥ अथ देवयजनम् ॥१७॥ यत्समं समूलमविदग्धं प्रतिष्ठितं प्रागुदक्प्रवणमाकृतिलोष्टवल्मीकेनास्तीर्य दर्भैश्च लोमभिः पशूनाम् ॥१८॥ अग्ने जायस्वेति मन्थन्तावनुमन्त्रयते ॥१९॥ पत्नी मन्त्रं सन्नमयति ॥२०॥ यजमानं च ॥२१॥ कृणुत धूममिति धूमम् ॥२२॥ अग्नेऽजनिष्ठा इति जातम् ॥२३॥ समिद्धो अग्न इति समि-

---

दाता को अनुमंत्रण करे ॥१५॥ उदहृत् के संप्रेष को छोड़ कर ॥१६॥ अब देव यजन के विषय में कहेंगे ॥१७॥ जो भूमि सम हो, समूल हो, जहाँ कुछ जलाया नहीं गया हो, प्रतिष्ठित हो, पूर्व, उत्तर को ढालुआ हो, जोते खेत की मट्टी और दीमक मट्टी से बराबर कर पशुओं के बाल तथा रोमों को बिछावे ॥१८॥ अब सब यज्ञों के विधान को कहेंगे। सम्भारों को इकट्ठा कर लेने पर—उत्तरायण सूर्य्य के होने पर ऋषिगुण युक्त ऋत्विजों का वरण करे ॥ यह ऋत्विक् कल्प हुआ । मधुपर्क कहा जा चुका । एकादशी तिथि में वरण करके गोदानिक विधान से केश, श्मश्रु, नखों को बनवाकर और पत्नी केशों को छोड़ कर नखों को बनवा लेवे । स्नान कर अखण्ड नये वस्त्र पहन ओढ़कर तय्यार होवे और सुगन्ध पदार्थों से युक्त होकर दाता उपनयन के समान दण्ड, मेखला और यज्ञोपवीती होकर पत्नी के साथ तीन रात्रि दीक्षा ग्रहण करे । अग्नि के लिये, ब्राह्मण के लिये और गुरु वा आचार्य के लिये व्रतों को सुन कर तब व्रतादानीय आठ समिधाओं को आधान करे । तब कर्त्ता अभ्यातानादि उत्तरतंत्र करे । हविष्य भक्षणादि कर्ता, कराने वाला और पत्नी करे । अब चतुर्दशी को प्रातःकाल यज्ञोपवीती होकर शान्तिजल को करके देवयजन को संप्रोक्षण करके जोते खेत की मिट्टी और दीमक की मिट्टी से वेदि को बराबर कर दर्भों, गौ, अश्व, भेड़ क लोमो से वेदि का आस्तरण करके पलाश की दो अरणियों से अग्नि को यजमान मन्थन करे । "अग्ने जायस्व०" ऋचा से ॥१९॥ पहिली आधी ऋचा में पत्नी एवं यजमान का नाम ग्रहण करे । पत्नी मंत्र को संयमन करे और यजमान को भी ॥२०॥२१॥ "कृणुत धूमं०" से धूम को ॥२२॥ "अग्नेऽज-

ध्यमानम् ॥२४॥ परेहि नारीत्युदहृतं संप्रेष्यत्यनुगुप्ता-मलंकृताम् ॥२५॥ एमा अगुरित्यायतीमनुमन्त्रयते ॥२६॥ उत्तिष्ठ नारीति पत्नीं संप्रेष्यति ॥२७॥ प्रतिकुम्भं गृभायेति प्रतिगृह्णाति ॥२८॥ ऊर्जो भाग इति निदधाति ॥२९॥ इयं महीति चर्मास्तृणाति प्राग्ग्रीवमुत्तरलोम ॥३०॥ पुमान् पुंस इति चर्मारोहयति ॥३१॥ पत्नी ह्वयमानम् ॥३२॥ तृतीयस्यामपत्यमन्वाह्वयति ॥३३॥ ऋषिप्रशि-ष्टेत्युदपात्रं चर्मणि निदधाति ॥ ३४ ॥ तदापस्पुत्रास इति सापत्यावनुनिपद्येते ॥३५॥१॥६०॥

प्राचीं प्राचीमिति मन्त्रोक्तम् ॥१॥ चतसृभिरुदपात्र-

निष्ठा०" तीन ऋचा अग्नि उत्पन्न होने पर "समिद्धोऽग्न०" से समिधा डालते समय पढ़े "उत्तमं नाकं०" से दाता को पाद करके बचवावे और ब्रह्मौदनिक अग्नि को मथन करके स्थण्डिल में डालकर "यद्देवा०" इत्यादि से पूर्ण होम करे । पूर्ण होम का विधान शान्ति कल्प में कहा गया है । "यद्देवा देवहेडनं०" इस अनुवाक से आज्य की आहुति देवे और समित् का आधान करे या शाकलों को डाले । इसी प्रकार ब्रह्मौदनिक अग्नि को साल भर जलावे या अहोरात्र भर या जैसी इच्छा हो वैसा करे । संवत्सर तो प्रशस्त है । अब अमावास्या को प्रातःकाल उठकर जल लावे । साधु वादिनी ब्राह्मणी को अलंकृता करके उसके हाथ में उदकघट पकड़वा कर भेजे ॥२५॥ "एमा अगुः" से उसके आते समय अनुमंत्रण करे ॥ २६ ॥ "उत्तिष्ठ नारी०" से पत्नी को संप्रेषण करे ॥२७॥ प्रतिकुम्भ के लेते समय "गृभाय०" ऐसा कहकर ग्रहण करे ॥२८॥ "ऊर्जो भाग०" से कुम्भ को भूमि पर धरे ॥२९॥ "इयं महि०" से चर्म को पूर्व को ग्रीवा एवं उत्तर लोम करके बिछावे ॥३०॥ "पुमान् पुंसः" से चर्म पर चढ़े ॥३१॥ पत्नी को बुलावे ॥३२॥ और तीसरी ऋचा से पुत्र को बुलावे ॥३३॥ "ऋषिप्रशिष्ट०" से उदपात्र को चर्म पर धरे ॥३४॥ "तदापस्पुत्रास०" से पत्नी पति के पीछे बैठे ॥ ३५ ॥ १ ॥ ६० ॥ यह साठवी कंडिका समाप्त हुई ॥

"प्राचीं प्राचीं०" से प्रत्येक दिशा का उपस्थान (जिस दिशा का

मनुपरियन्ति ॥२॥ प्रतिदिशं ध्रुवेयं विराडिस्युपतिष्ठन्ते ॥३॥ पितेव पुत्रानिस्यवरोह्य भूमिन्तेनोदकार्थान्कुर्वन्ति ॥४॥ पवित्रैः संप्रोक्षन्ते ॥५॥ दर्भाग्राभ्यां चर्महविः संप्रोक्षति ॥६॥ आदिष्टानां सानजानस्यै प्रयच्छति ॥७॥ तांस्त्रेधा भाग इति व्रीहिराशिषु निदधाति ॥८॥ तेषां यः पितॄणां तं श्राद्धं करोति ॥९॥ यो मनुष्याणां तं ब्राह्मणान् भोजयति ॥१०॥ यो देवानां तमग्ने सहस्वानिति दक्षिणं जान्वाच्यापराजिताभिमुखः प्रह्वो वा मुष्टिप्रसृताञ्जलिभिः कुम्भ्यां निर्वपति ॥११॥ कुम्भ्या वा चतुः ॥१२॥ तान्सप्त मेधानिति सापत्यावभिमृशतः ॥ १३ ॥ गृह्णामि हस्तमिति मन्त्रोक्तम् ॥१४॥ त्रयो वरा इति त्रीन्वरान् वृणीष्वेति ॥१५॥ अनेन कर्मणा ध्रुवानिति प्रथमं

उपस्थान उसका नाम लेवे) करे। चार ऋचाओं से उदपात्र को अनुमंत्रण करे ॥२॥ "प्रतिदिशं ध्रुवेयं विराट्०" से उपस्थान करे। "पितेव पुत्रान्०" से चढ़कर भूमि को उदक कलश को धरे इसी से सब कार्य होंगे ॥४॥ पवित्रे द्वारा संप्रोक्षण करे ॥५॥ दर्भाग्रों से चर्म हवि को संप्रोक्षण करे ॥६॥ तब बैल के चर्म पर व्रीहि को तीन भागों में करे। देव, मनुष्य, पितृ, पत्नी विना जाने ही देवे। कर्त्ता प्रैष द्वारा देवे। व्रीहि को विभागों पर धरे "त्रेधा भागो निहितः" त्रिभिः पादैः से अनुमंत्रण करे ॥७॥८॥ जो पितृ भाग है उससे अवभृथ के अन्त में वृद्धिश्राद्ध करे। जो मनुष्यों का भाग है उसको ब्राह्मणों को जमावे ॥१०॥ जो देवताओं का भाग है उसको "अग्ने सहस्वान्०" से दहिनी जंघा टेक कर पश्चिम मुख हो निहुड़कर मुट्ठी—दोनों हाथ की अंजली फैलाकर कुम्भ्या में निर्वाप करे ॥११॥ या कुम्भी में चार अञ्जुलि डाले ॥१२॥ "तान्सप्त मेधान्०" से पति के साथ पत्नी अभिमर्शन करे ॥१३॥ पति पत्नी के हाथ को "गृह्णामि हस्तं०" से पकड़े ॥१४॥ "त्रीन्वरान् वृणीष्व०" से दाता प्रैष को देकर पत्नी को देवे। "तौ वृणन्तौ त्रयो वरा०" इस आधी ऋचा से प्रतिपत्नी अनुमंत्रण करे। दाता सब कर्मों में समृद्धि द्वारा

वृणीते ॥१६॥ यावपरौ तावेव पत्नी ॥१७॥ एतौ ग्रावाणावयं ग्रावेत्युलूखलमुसलं शूर्पं प्रक्षालितं चर्मण्याधाय ॥१८॥ गृहाण ग्रावाणावित्युभयं गृह्णाति ॥१९॥ साकं सजातैरिति व्रीहीनुलूखल आवपति ॥२०॥ वनस्पतिरिति मुसलमुच्छ्रयति ॥२१॥ निर्भिन्ध्यंशून् ग्राहिं पाप्मानमित्यवहन्ति ॥२२॥ इयं ते धीतिर्वर्षवृद्धमिति शूर्पं गृह्णाति ॥२३॥ ऊर्ध्वं प्रजां विश्वव्यचा इत्युदूहन्तीम् ॥२४॥ परा पुनीहि तुषं पलावानिति निष्पुनतीम् ॥२५॥ पृथग्रूपाणीत्यवक्षिणतीम् ॥२६॥ त्रयो लोका इत्यवक्षीणानभिमृशतः ॥ २७ ॥ पुनरायन्तु शूर्पमित्युद्वपति ॥२८॥ उपश्वस इत्यपवेवेक्ति ॥२९॥ पृथिवीं त्वा पृथिव्यामिति कुम्भीमालिम्पति ॥३०॥ अग्ने चरुरित्यधिश्रयति ॥३१॥ अग्निः पचन्निति पर्यादधाति ॥३२॥ ऋषिप्रशिष्टेत्युदकमपकर्षति ॥३३॥ शुद्धाः पूताः पूताः

यह पहिला वर ॥१५॥१६॥ जो दो वर शेष रहे उनको पत्नी ॥१७॥ "एतौ ग्रावाणावयं ग्राव०" से उलूखल, मुसल, शूर्प को प्रक्षालित करके चर्म में धर कर ॥१८॥ "गृहाण ग्रावाणौ०" से दोनों को पत्नी लेवे ॥१९॥ "साकं सजातैः" से व्रीहियों को उलूखल में डाले ॥२०॥ "वनस्पतिः" से मुसल को उठावे ॥२१॥ "निर्भिन्ध्यंशून्ग्राहिं पाप्मानं०" से व्रीहियों को कूटे ॥२२॥ "इयं ते धीतिर्वर्षं०" से शूर्प को पकड़े ॥२३॥ "ऊर्ध्वं प्रजां विश्वव्यचा०" से सूप से साफ करे ॥२५॥ "पृथग्रूपाणि०" से अलग २ तुष और अन्न को करे ॥२६॥ "त्रयो लोका०" से साफ को अभिमर्शन करे ॥२७॥ "पुनरायन्तु शूर्पं०" से उद्वपन करे ॥२८॥ "उपश्वस०" से जल को अलग २ कर धरे । "पृथिवीं त्वा पृथिव्यां०" इत्यादि से कुम्भी को सब ओर से लीपे ॥२९॥३०॥ "अग्ने चरुः" से अधिश्रयण करे ॥३१॥ "अग्निः पचन्०" से सब ओर डाले ॥३२॥ "ऋषिप्रशिष्ट०" से जल को निकाल लेवे ॥३३॥ "शुद्धाः पूताः पूताः पवित्रैः" से जल में

पवित्रैरिति पवित्रे अन्तर्धाय ॥ ३४ ॥ उदकमासिञ्चति ॥३५॥ ब्रह्मणा शुद्धाः संख्याता स्तोका इत्यापस्तासु निक्त्वा तण्डुलानावपति ॥३६॥ उरुः प्रथस्वोद्योधन्तीति श्रपयति ॥३७॥ प्रयच्छ पर्शुमिति दर्भाहाराय दात्रं प्रयच्छति ॥३८॥ ओषधीर्दान्तु पर्वन्नित्युपरि पर्वणां लुनाति ॥३९॥ नवं बर्हिरिति बर्हिस्तृणाति ॥४०॥ उदेहि वेदिं धर्ता ध्रियस्वेत्युद्वासयति ॥ ४१ ॥ अभ्यावर्त्तस्वेति कुम्भीं प्रदक्षिणमावर्तयति ॥४२॥ वनस्पते स्तीर्णमिति बर्हिषि पात्रीं निदधाति ॥४३॥ अंसध्रीमित्युपदधाति ॥४४॥ उपस्तृणीहीत्याज्येनोपस्तृणाति ॥४५॥ उपास्तरीरित्युपस्तीर्णामनुमन्त्रयते ॥४६॥२॥६१॥

अदितेर्हस्तां सर्वान् समागा इति मन्त्रोक्तम् ॥१॥ तत उदकमादाय पात्र्यामानयति ॥२॥ दर्व्या कुम्भ्यां ॥३॥ दर्विकृते तत्रैव प्रत्यानयति ॥४॥ दर्व्योत्तममपादाय

पवित्र डालकर जल का सेक करे ॥३४॥३५॥ "ब्रह्मणा शुद्धाः संख्याता स्तोका०" से उनमें जल डाल कर चावलों को आवपन करे ॥३६॥ "उरुः प्रथस्वोद्योधन्ति०" से पकावे ॥३७॥ "प्रयच्छ पर्शुं०" दर्भ लाने वाले के लिये हसुआ देवे ॥३८॥ और "ओषधीर्दान्तु पर्वन्०" से दर्भ को गाँठ से ऊपर ही काटे ॥ ३९ ॥ "नवं बर्हिः०" से कुशों को बिछावे ॥४०॥ "उदेहि वेदिं धर्ता ध्रियस्व०" से उद्वासन करे ॥४१॥ "अभ्यावर्तस्व०" से कुम्भी को प्रदक्षिण आवर्तन करे ॥४२॥ "वनस्पते स्तीर्णं०" से कुश पर पात्री को धरे ॥४३॥ "अंसध्रीं०" से रक्खे ॥४४॥ "उपस्तृणीहि०" से आज्य से उपस्तीर्ण करे ॥४५॥ "उपास्तरीः" बिछाये हुए को अनुमंत्रण करे ॥४६॥२॥६१॥ यह एकसठवी कंडिका समाप्त हुई ॥

"अदितेर्हस्तां सर्वान्समागा०" से पत्नी को दर्वी पकड़ावे ॥१॥ तब जल लाकर पात्री में लावे ॥२॥ दर्वी से कुम्भी में डाले ॥३॥ उस दर्वी के जल को वहीं लाकर धरे ॥४॥ दर्वी में का लाया जल को, यजमान

दाय तत्सुहृद्दक्षिणतोऽग्नेरुदङ्मुख आसीनो धारयति ॥५॥ अथोद्धरति ॥६॥ उद्धृते यदुपादाय धारयति तदु-त्तरार्धं आदधाति ॥७॥ अनुत्तराधरताया ओदनस्य यदुत्तरं तदुत्तरमोदन एवौदनः ॥८॥ षष्ट्यां शरत्स्विति पश्चादग्नेरुपसादयति ॥९॥ निधिं निधिपा इति त्रीणि काण्डानि करोति ॥१०॥ यद्यज्जायेति मन्त्रोक्तम् ॥११॥ सा पत्यावन्वारभते ॥१२॥ अन्वारब्धेष्वत ऊर्ध्वं करोति ॥१३॥ अग्नी रक्ष इति पर्यग्नि करोति ॥१४॥ बभ्रेरध्वर्यो इदं प्रापमित्युपर्यापानं करोति ॥ १५ ॥ बभ्रेर्ब्रह्मन्निति ब्रूयादनध्वर्युम् ॥१६॥ घृतेन गात्रा सिञ्च सर्पिरिति सर्पिषा विष्यन्दयति ॥१७॥ वसोर्या धारा आदित्येभ्यो अङ्गिरोभ्य इति रसैरुपसिञ्चति ॥१८॥ प्रियं प्रियाणामित्युत्तरतोऽग्नेर्धेन्वादीन्यनुमन्त्रयते॥१९॥ताम-स्यासरत्प्रथमेति यथोक्तं दोहयित्वोपसिञ्चति ॥२०॥ अस्यासरत् प्रथमा धोक्ष्यमाण सर्वान् यज्ञान् बिभ्रती

का सुहृत् लेकर अग्नि के दक्षिण भाग में उत्तर मुख बैठकर धारण किया रहे ॥५॥ अब उद्धरण करे ॥६॥ अनुत्तराधारता के ओदन के जो उत्तर है वही उत्तर ओदन, ओदन है ॥७॥८॥ "षष्ट्यां शरत्सु०" से अग्नि के पश्चिम भाग में उसको लाकर धरे ॥९॥ "निधिं निधिपा०" से तीन काण्ड करे ॥१०॥ "यज्जाया०" से मन्त्रोक्त क्रिया करे ॥११॥ पत्नी पति द्वारा अन्वारब्ध होकर कर्म करे ॥ १२ ॥ १३ ॥ "अग्नी रक्ष०" से पर्यग्नि करे ॥१४॥ "बभ्रेरध्वर्यो इदं प्रापं०" से ओदन के ऊपर गर्त्त करे ॥१५॥ "बभ्रेर्ब्रह्मन्०" से अनध्वर्यु को कहे "घृतेन गात्रा सिञ्च सर्पिषि०" से घृत द्वारा विष्यन्दन करे ॥१६॥१७॥ "वसोर्या धारा आदि-त्येभ्यो अङ्गिरोभ्यः" से रस द्वारा सिञ्चन करे ॥१८॥ "प्रियं प्रियाणां०" से अग्नि के उत्तर में धेनु आदिकों को अनुमंत्रण करे ॥१९॥ "अस्या-सरत्०" आधी ऋचा से अभिसरन्ती गौ को अनुमंत्रण करे । "उप-

वैश्वदेवी ॥ उप वत्सं सृजत वाश्यते गौर्व्यसृष्ट सुमना हिंकृणोति ॥ बधान वत्समभि धेहि भुञ्जती निज्य गोधुगुपसीद दुग्धि । इरामस्मा ओदनं पिन्वमाना कीलालं घृतं मदमन्नभागम् ॥ सा धावतु यमराजः सवत्सा सुदुघां पथा प्रथमेह दत्ता ॥ अतूर्णदत्ता प्रथमेदमागन् वत्सेन गां संसृज विश्वरूपामिति ॥२१॥ इदं मे ज्योतिः समग्नय इति हिरण्यमधिदधाति ॥२२॥ एषा त्वचामित्यमोतं वासोऽग्रतः सहिरण्यं निदधाति ॥२३॥३॥६२॥

यदक्षेष्विति समानवसनौ भवतः ॥ १ ॥ द्वितीयं तत्पापचैलं भवति तन्मनुष्याधमाय दद्यादित्येके ॥२॥ शृतं त्वा हव्यमिति चतुर आर्षेयान् भृग्वङ्गिरोविद उप-

---

वत्सं०" असृष्ट सुमना हिंकृणोति०" से हिंकार करती हुई गौ के छोटे वत्स को बांधे (उसके पैर में बांधे) । "वाश्यते गौः०" से वाश्यमाना गौ को नियुक्त करे । "गोधुगुपसीद०" से ब्राह्मण दूहने के लिये गौ को लावे । "दुग्धि०" इत्यादि पद के साथ आधी ऋचा से गौ को दूहे । "सा धावतु०" आधी ऋचा से छोड़ी हुई गौ को अनुमंत्रण करे । "अतूर्णदत्त०" से आधी ऋचा से पुनः बच्चे के साथ गौ को कर देवे ॥१८॥१९॥२०॥२१॥ इस प्रकार दूह कर, दूध के साथ ओदन को सींच कर "इदं मे ज्योतिः" से दाता को पाद बचवावे, और सोना उसमें डलवावे । दाता सूक्त पढ़कर सबको सम्पातवन्त करे या "श्राम्यत" प्रभृति से दाता, पत्नी, अपत्य इनको अन्वारम्भ करावे । और "एषा त्वचा०" इस ऋचा से बुने हुए वस्त्र को आगे धरे उसमें सोना भी धरे ॥२३॥३॥६२॥ यह बासठवी कंडिका समाप्त हुई ।

"यदक्षेषु०" इससे समान वस्त्र पहन ओढ़े दोनों रहे ॥१॥ कोई २ आचार्य कहते हैं कि दूसरा वस्त्र पाप चैल होता है अतएव इसको किसी अधम मनुष्य को देवे ॥२॥ अब अथर्ववेद में ब्राह्मणों को बुलाने का समय । "दाता सोम राजन्०" ऋचा से आर्षेयगुण युक्त चार भृग्वङ्गिरोविद् ब्राह्मणों को बुलाकर । "शृतं त्वा हव्यं" से यज्ञ कराने के लिये

सादयति ॥ शुद्धाः पूता इति मन्त्रोक्तम् ॥ ४ ॥ पर्कं क्षेत्राद्धर्षं वनुष्वेस्यपकर्षति ॥ ५ ॥ अग्नौ तुषानिति तुषानावपति ॥ ६ ॥ परः कम्बूकानिति सव्येन पादेन फलीकरणानपोहति ॥ ७ ॥ तन्वं स्वर्गो इत्यन्यानावपति ॥ ८ ॥ अग्ने प्रेहि समाचिनुष्वेस्याज्यं जुहुयात् ॥ ९ ॥ एष सवानां संस्कारः ॥ १० ॥ अथैलुप्तानि निवर्तन्ते ॥ ११ ॥ यथासवं मन्त्रं सन्नमयति ॥ १२ ॥ लिङ्गं परिहितस्य लिङ्गस्यानन्तरं कर्मकर्मानुपूर्वेण लिङ्गं परीक्षेत ॥१३॥ लिङ्गेन वा ॥१४॥ कर्मोत्पत्त्यानुपूर्वं प्रशस्तम् ॥१५॥ अतथोत्पत्तेर्यथालिङ्गम् ॥ १६ ॥ समुच्चयस्तुल्यार्थानां विकल्पो वा ॥ १७ ॥ अथैतयोर्विभागः ॥ १८ ॥ सूक्तेन पूर्वं सम्पातवन्तं करोति ॥ १९ ॥ आम्यत इतिप्रभृतिभिर्वा सूक्तेनाभिमन्त्र्याभिनिगद्य दद्याद्दाता वाच्य-

---

पास रक्खे ॥३॥ "शुद्धाः पूताः०" से मंत्रोक्त क्रिया करे ॥४॥ "पर्कं-क्षेत्राद्धर्षं वनुषु०" से अपकर्षण करे ॥५॥ "अग्नौ तुषान्०" से अग्नि में तुषों को डाले ॥६॥ "परः कम्बूकान्०" से वाम पग से फली करण को दूर करे ॥७॥ "तन्वं स्वर्ग" से अन्य वस्तुयें जो उसमें हों निकाल फेके ॥८॥ "अग्ने प्रेहि०" से आज्य की आहुति करे ॥९॥ अब दाता ऋत्विजों को व्रत निवेदन करके साविक व्रत को तीन रात्रि यथा शास्त्र विहित इत्यादि ऋत्विग्गण सुनावें। यह सवों का संस्कार है ॥१०॥ अर्थ लुप्तों की निवृत्ति हुई ॥११॥ सवके अनुसार मंत्र को संयमन करे ॥१२॥ लिङ्ग परिहित का, लिङ्ग के अनन्तर कर्म और कर्मानुपूर्व से लिङ्ग की परीक्षा करे ॥१३॥ या लिङ्ग से ही परीक्षा करे ॥१४॥ कर्म की उत्पत्ति के अनुपूर्व परीक्षा करना अच्छा है ॥१५॥ कर्म की उत्पत्ति यदि असत्य हो तो लिङ्गानुसार परीक्षा करे ॥१६॥ या एक ही अर्थवालों के समुच्चय से विकल्प पक्ष माने ॥१७॥ अब इन दोनों पक्षों के विभाग को कहते हैं ॥१८॥ सूक्त से पहिले सम्पातवन्त करे ॥१९॥ या "आम्यत" इत्यादि से करे। सूक्त से अभिमंत्रण करके, निगद करके वाच्यमान

मानः ॥२०॥ अनुवाकेनोत्तरं सम्पातवन्तं करोति ॥२१॥ प्राच्यै त्वा दिश इतिप्रभृतिभिर्वानुवाकेनाभिमन्त्र्याभिनिगद्य दद्याद्दाता वाच्यमानः ॥ २२ ॥ यथासवमन्यान्पृथग्वेति प्रकृतिः ॥ २३ ॥ सर्वं यथोत्पत्त्याचार्याणां पञ्चौदनवर्जम् ॥ २४ ॥ प्रयुक्तानां पुनरप्रयोगम् ॥२५॥ एके सहिरण्यां धेनुं दक्षिणां ॥२६॥ गो दक्षिणां वा कौरुपथिः ॥ २७ ॥ सम्पातवतोऽभिमन्त्र्याभिनिगद्य दद्याद्दाता वाच्यमानः ॥ २८ ॥ एतं भागमेतं सधस्था उलूखल इति संस्थितहोमाः ॥ २९ ॥ आपवते ॥ ३० ॥ अनुमन्त्रणं च ॥३१॥४॥६३॥

आशानामिति चतुःशरावम् ॥ १ ॥ यद्राजान इत्यवेक्षति ॥ २ ॥ पदस्नातस्य पृथक्पादेष्वपूपान् निदधाति ॥३॥ नाभ्यां पञ्चमम् ॥ ४ ॥ उन्नह्यन्वसनेन सहिरण्यं सम्पातवन्तम् ॥ ५ ॥ आनयैतमित्यपराजिता-

---

दाता देवे ॥२०॥ अनुवाक से उत्तर सम्पातवन्त करे ॥२१॥ "प्राच्यै त्वा दिश०" इत्यादि से, या अनुवाक से अनुमंत्रण करके अभिनिगदन करके वाच्यमानदाता दाता देवे ॥२२॥ या यथासव अन्यों को अलग २ देवे यह 'प्रकृति' है ॥२३॥ कर्मोत्पत्ति पक्ष के सब ही आचार्यों के मत से पञ्चौदन को छोड़ कर है ॥२४॥ प्रयुक्तों का फिर अप्रयोग होगा ॥२५॥ किन्हीं आचार्य्यों के मत से सोना सहित धेनु दक्षिणा में देवे ऐसा है ॥२६॥ कौरुपथि आचार्य के मत से केवल गौ ही दक्षिणा देवे ॥२७॥ सम्पात वाले को अभिमंत्रण एवं अभिनिगदन करके वाच्यमान दाता देवे ॥२८॥ "एतं भागमेतं सधस्था उलूखलः" से संस्थित होमों को करे ॥२९॥ आवपन और अनुमंत्रण करे ॥३०॥३१॥४॥६३॥ यह तिरसठवी कंडिका समाप्त हुई ॥

"आशानां०" से चार पुरवा को लाकर धरे ॥१॥ "यद्राजान०" से अवेक्षण करे ॥२॥ पदस्नात के अलग २ पादों पर अपूपों को धरे ॥३॥ नाभि पर पञ्चम को ॥४॥ कपड़े से उन्नहन करता हुआ कपड़े से सोने के साथ सम्पातवन्त को ॥५॥ और "आनयैतं०" से पश्चिम

दजमानीयमानमनुमन्त्रयते ॥६॥ इन्द्राय भागमित्यग्निं परिणीयमानम् ॥ ७ ॥ ये नो द्विषन्तीति संज्ञप्यमानम् ॥ ८ ॥ प्रपद इति पदः प्रक्षालयन्तम् ॥ ९ ॥ अनु छ्य श्यामेनेति यथापरु विशसन्तम् ॥ १० ॥ ऋचा कुम्भी-मित्यधिश्रयन्तम् ॥११॥ आसिञ्चेत्यासिञ्चन्तम् ॥१२॥ अवधेहीत्यवदधतम् ॥ १३ ॥ पर्याधत्तेति पर्यादधतम् ॥ ॥ १४ ॥ शृतो गच्छत्वित्युद्वासयन्तम् ॥ १५ ॥ उत्का-मात इति पश्चादग्नेर्दर्भेषूद्धरन्तम् ॥१६॥ उद्धृतमजमन-ज्मीत्याज्येनानक्ति ॥१७॥ पञ्चौदनमिति मन्त्रोक्तम् ॥१८॥ ओदनान् पृथक्पादेषु निदधाति ॥ १९ ॥ मध्ये पञ्चमम् ॥ २० ॥ दक्षिणं पश्चार्द्धं यूषेनोपसिच्य ॥ २१ ॥ शृत-मजमित्यनुबद्धशिरःपादं श्वेतस्य चर्म ॥ २२ ॥ अजो हीति सूक्तेन सम्पातवन्तं यथोक्तम् ॥ २३ ॥ उत्तरो-

---

दिशा से बकरे को लाते हुए को अनुमंत्रण करे ॥६॥ "इन्द्राय भागं०" से अग्नि को परिणीय करते हुए को अनुमंत्रण करे ॥७॥ "ये नो द्विषन्ति०" से संज्ञपन करने वाले को अनुमंत्रण करे ॥८॥ "प्रपदः" से पैरों को प्रक्षालन करते हुए को अभिमंत्रण करे ॥९॥ परु के अनुसार हनन करने वाले को अनुमंत्रण करे ॥१०॥ "ऋचा कुम्भीं०" से पकाने वाले को अनुमंत्रण करे ॥११॥ "आसिञ्च०" से अभिसिञ्चन करते हुए को अभिमंत्रण करे ॥१२॥ "अवधेहि०" से अवधान करनेवाले को अभिमं-त्रण करे। "पर्य्याधत्त०" से पर्य्यादधत को अनुमं० "शृतो गच्छतु०" से उद्वासन करते हुए को अनु० "उत्कामत०" से अग्नि के पश्चिम भाग में दर्भों पर उद्धरण करते हुए को अनुमंत्रण करे ॥१३॥१४॥१५॥१६॥ "उद्धृतमजमनज्मि०" से आज्य को मिलावे ॥१७॥ "पञ्चौदनं०" से मन्त्रोक्त करे ॥१८॥ ओदनों को अलग पादों में धरे ॥१९॥ मध्य में पाचवें को धरे ॥२०॥ दक्षिण पश्चार्ध को यूष से उपसेचन करके। "शृतमजं०" से बांधे हुए शिर पैर वाले का यह चर्म है ॥२१॥॥२२॥ "अजो हि०" इस सूक्त से सम्पात वाले को धरे ॥२३॥ उत्तर दिशा में

ऽमोतं तस्याग्रतः सहिरण्यं निदधाति ॥२४॥ पञ्च रुक्मेति मन्त्रोक्तम् ॥ २५ ॥ धेन्वादीन्युत्तरतः सोपधानमास्तरणं वासो हिरण्यञ्च ॥ २६ ॥ आनयैतमिति सूक्तेन सम्पातवन्तम् ॥ २७ ॥ आञ्जनान्तं शतौदानायाः पञ्चौदनेन व्याख्यातम् ॥२८॥५॥६४॥

अघायतामित्यत्र मुखमपिनह्यमानमनुमन्त्रयते ॥१॥ सपत्नेषु वज्रं ग्रावा त्वैष इति निपतन्तम् ॥ २ ॥ वेदिष्ट इति मन्त्रोक्तमास्तृणाति ॥ ३ ॥ विंशत्योदनासु श्रयणीषु शतमवदानानि वध्रीसन्नद्धानि पृथगोदनेषूपर्यादधाति ॥ ४ ॥ मध्यमायाः प्रथमे रन्ध्रिण्यामिक्षां दशमेऽभितः सप्तसप्तापूपान् परिश्रयति ॥ ५ ॥ पञ्चदशे पुरोडाशौ ॥ ६ ॥ अग्रे हिरण्यम् ॥७॥ अपो देवीरित्यग्रत उदकुम्भान् ॥८॥ बालास्त इति सूक्तेन सम्पातवतीम् ॥ ९ ॥ प्रदक्षिणमग्निमनुपरिणीयोपवेशनप्रक्षा-

---

अमोत के आगे सोना सहित धरे ।।२४।। "पञ्च रुक्म०" से मंत्रोक्त करे ।।२५।। धेनु आदिकों को उत्तर दिशा में उपधान के सहित बिछावन, वस्त्र और सोना देवे ।।२६।। "आनयैतं०" इस सूक्त से सम्पात वाले को लावे ।। २७।। आञ्जन तक के कर्मों का व्याख्यान शतौदन का पञ्चौदन के साथ किया गया जानो ।।२८।।५।।६४।। यह चौसठवी कंडिका समाप्त हुई ।।

"अघायतां०" से मुख को बांधने वाले को अनुमंत्रण करे ।।१।। "सपत्नेषु वज्रं ग्रावा त्वैष०" से गिरते हुए को अनुमंत्रण करे ।।२।। "वेदिष्ट०" से मंत्रोक्त वस्तु को आस्तरण करे ।।३।। बीस पकने वाले ओदनों में १०० अवदानों को वध्रीसंनद्धों को, अलग ओदनों पर धरे ।।४।। मध्यमा के पहिले में रन्ध्रिणी आमिक्षा को दशम में सात २ अपूपों को परिश्रयण करे ।५।। पन्द्रहवें में दो पुरोडाशों को धरे ।।६।। आगे सोना को ।।७।। "अपो देवीः" से अग्रभाग में उदकुम्भों को धरे ।।८।। "बालास्त०" इस सूक्त से सम्पात वाली करे ।।९।। अग्नि की प्रदक्षिणा करता हुआ अनुपरिणीय, उपवेशन, प्रक्षालन, आचमन कहे

लनाचमनमुक्तम् ॥१०॥ पाणावुदकमानीय ॥११॥ अथा-मुष्यौदनस्यावदानानां च मध्यात्पूर्वार्द्धाच्च द्विरवदायोप-रिष्टादुदकेनाभिघार्य जुहोति सोमेन पूतो जठरे सीद ब्रह्मणामार्षेयेषु निदध ओदन त्वेति ॥१२॥ अथ प्राश्ना-ति ॥१३॥ अग्नेष्ट्वास्येन प्राश्नामि बृहस्पतेर्मुखेन । इन्द्र-स्य त्वा जठरे सादयामि वरुणस्योदरे । तद्यथा हुत-मिष्टं प्राश्नीयाद्देवास्मा त्वा प्राश्नाम्यास्मास्यास्मन्नास्मानं मे मा हिंसीरिति प्राशितमनुमन्त्रयते ॥ १४ ॥ योऽग्नि-र्नृमणा नाम ब्राह्मणेषु प्रविष्टः । तस्मिन्म एष सुहुतो-ऽस्त्वोदनः स मा मा हिंसीत्परमे व्योमन् ॥ सो अस्म-भ्यमस्तु परमे व्योमन्निति दातारं वाचयति ॥१५॥ वीक्ष-णान्तं शतौदनायाः प्रातर्जपेन व्याख्यातम् ॥१६॥६॥६५॥

वाङ्म आसन्निति मन्त्रोक्तान्यभिमन्त्रयते ॥ १ ॥ बृहता मनो द्यौश्च मे पुनर्मैत्विन्द्रियमिति प्रतिमन्त्रयते ॥ २ ॥ प्रतिमन्त्रिते व्यवदायाश्नन्ति ॥ ३ ॥ शतौदनायां द्वादशं शतं दक्षिणाः ॥ ४ ॥ अधिकं ददतः कामप्रं सम्प-द्यते ॥ ५ ॥ ब्रह्मास्येत्योदने ह्रदान्प्रतिदिशं करोति ॥६॥

गये जानो ॥१०॥ हाथ में जल लाकर ॥११॥ अब अमुष्यौदन के अव-दानों का और मध्य पूर्वार्ध से दो बार लेकर ऊपर से जल से अभिघा-रण कर आहुति देवे । "सोमेन पूतो०" इत्यादि से ॥१२॥ अब प्राशन करे "अग्नेष्ट्वास्येन०" इत्यादि से प्राशन करके अनुमंत्रण करे । "यो-ऽग्निर्नृमणा०" इत्यादि से दाता को वचवावे ॥१३॥१४॥१५॥ शतौद-नाका व्याख्यान वीक्षण तक किया गया जानो ॥१६॥६॥६५॥ यह पैसठवी कंडिका समाप्त हुई ॥

"वाङ्म आसन्०" से मंत्रों में कहे हुओं का अनुमंत्रण करे ॥१॥ "बृहता मनो०" इत्यादि से प्रतिमंत्रण करे॥२॥ प्रतिमंत्रित होने पर उसे लेकर खावे ॥३॥ शतौदना में १२०० दक्षिणा देनी चाहिये ॥४॥ अधिक देने से "कामप्रं" की प्राप्ति होती है ॥५॥ "ब्रह्मास्य०" से ओदन

उपर्योपानम् ॥७॥ तदभितश्चतस्रो दिश्याः कुल्याः ॥८॥ ता रसैः पूरयति ॥९॥ पृथिव्यां सुरयाद्भिराण्डीकादिवन्ति मन्त्रोक्तानि प्रतिदिशं निधाय ॥ यमोदनमित्यतिमृत्युम् ॥ ११ ॥ अनड्वानित्यनड्वाहम् ॥ १२ ॥ सूर्यस्य रश्मीनिति कर्कीं सानूबन्ध्यां ददाति ॥ १३ ॥ आयं गौः पृश्निरयं सहस्रमिति पृश्निं गाम् ॥१४॥ देवा इमं मधुना संयुतं यवमिति पौनःशिलं मधुमन्थं सहिरण्यं सम्पातवन्तम् ॥१५॥ पुनन्तु मा देवजनाः इति पवित्रं कृशरम् ॥ १६ ॥ कः पृश्निमित्युर्वराम् ॥१७॥ साहस्र इत्यृषभम् ॥ १८ ॥ प्रजापतिश्चेत्यनड्वाहम् ॥ १९ ॥ नमस्ते जायमानायै ददामीति वशामुदपात्रेण सम्पातवता सम्प्रोक्ष्याभिमन्त्र्याभिनिगद्य दद्याद्दाता वाच्यमानः ॥ २० ॥ भूमिष्ट्वेत्येनां प्रतिगृह्णाति ॥२१॥ उपमितामिति यच्छालया सह दास्यन् भवति तदन्तर्भवत्यपिहितम् ॥२२॥

में प्रति दिशा में पोखर बनावे ॥६॥ और उसके ऊपर गर्त्त करे ॥७॥ उसके सम्मुख चार दिशा कुल्या करे ॥८॥ उनको रसों से पूरा करे ॥९॥ पृथिवी पर सुरा, जल और आण्डीकादि वाले करे जैसा मंत्र में कहा गया है प्रदिशा में धरे ॥१०॥- "यमोदनं०" से अतिमृत्यु को ॥११॥ "अनड्वान्०" से अनड्वाह को ॥१२॥ 'सूर्य्यस्य रश्मीन्०" कर्की सानुबन्ध्या देवे ॥१३॥ "आयं गौः पृश्निरयं सहस्रं०" से पृश्नि गौ को ॥१४॥ "देवा इमं मधुना संयुतं यवं०" से पौनः शिल को, मधुमन्थ को, सोने के साथ सम्पातवन्त करे ॥१५॥ "पुनन्तु मा देवजना०" से कृशर को पवित्र करे ॥१६॥ "कः पृश्नि०" से उर्वरा को और "साहस्रः" से ऋषभ को, "प्रजापतिश्च०" से अनडुह को ॥१७॥१८॥१९॥ "नमस्ते जायमानायै ददामि०" से वशा को उदपात्र से सम्पात वाला से संप्रोक्षण करके अभिमंत्रण करके अभिनिगद करके वाच्यमान दाता देवे ॥२०॥ "भूमिष्ट्वा०" से इसको प्रतिग्रहण करे ॥२१॥ "उपमितां०" से जिस

मन्त्रोक्तं तु प्रशस्तम् ॥२३॥ इटस्य ते विचृतामीति द्वार-मवसारयति ॥२४॥ प्रतीचीं त्वा प्रतीचीन इत्युदपात्र-मग्निमादाय प्रपद्यन्ते ॥२५॥ तदन्तरेव सूक्तेन सम्पात-वत्करोति ॥२६॥ उदपात्रेण सम्पातवता शालां सम्प्रो-क्ष्याभिमन्त्र्याभिनिगद्य दद्याद्दाता वाच्यमानः ॥ २७ ॥ अन्तरा द्यां च पृथिवीं चेत्येनां प्रतिगृह्णाति ॥२८॥ उप-मितामिति मन्त्रोक्तानि प्रचृतति ॥२९॥ मा नः पाशमित्य-भिमन्त्र्य धारयति ॥३०॥ नास्यास्थीनीति यथोक्तम् ॥३१॥ सर्वमेनं समादायेत्यद्भिः पूर्णे गर्ते प्रविध्य संवपति ॥ ३२ ॥ शतौदनां च ॥३३॥७॥६६॥

शाला के साथ देना होवे उसके भीतर धर ढाक देवे ॥२२॥ मंत्र में कहा हुआ तो अच्छा होता है ॥२३॥ "इटस्य ते विचृतामि०" से द्वार को पसारे ॥२४॥ "प्रतीचीं त्वा प्रतीचीनः" से उदपात्र को, अग्नि को लेकर जावे ॥२५॥ उसके भीतर ही सूक्त से सम्पात वाला करे ॥२६॥ उद-पात्र से सम्पात वाला से शाला को संप्रोक्षण, अभिमंत्रण और निगदन करके वाच्यमान दाता देवे ॥२७॥ "अन्तरा द्यां च पृथिवीं च०" से इसको लेवे ॥२८॥ "उपमितां०" से मंत्रों में कहे हुओं को बखेरे ॥२९॥ "मा नः पाशं०" से अभिमंत्रण करके धारण करे ॥३०॥ "ना-स्यास्थीनि०" मंत्रोक्त कर्मों को करे ॥३१॥ इसको सब लेकर "सर्वमेनं सम्पादय०" से पूर्ण गर्त्त में डाल कर संवपन करे ॥ ३२ ॥ और शतौ-दना को भी ॥३३॥ अब यहाँ सव यज्ञों को भली भाँति समझने के लिये व्याख्या करते हैं—बाईस प्रकार के सव होते हैं। अब इनकी गिनती की जाती है "अग्ने जायमानस्व०" इस अर्थ सूक्त से ब्रह्मौदन देवे ॥ १ ॥ "पुमान् पुंसः०"इस अनुवाक से स्वर्गौदन को देवे ॥२॥ "आशानां०"से चार पुरवा सव को॥३॥ "यद्राजानं०"सूक्त से अविसव को ॥४॥ "अजो ह्यग्नेरजनिष्ट०" सूक्त से अजौदन सव को ॥५॥ "आनयैतां०" इस अर्थ सूक्त से पञ्चौदन सव को ॥६॥ "अघायतां०" इस अर्थ सूक्त से शतौदन सव को ॥७॥ "ब्रह्मास्य शीर्षं०" इस सूक्त से ब्रह्मास्यौदन सव को ॥८॥

सम्भृतेषु साविकेषु सम्भारेषु ब्राह्मणमृत्विजं वृणीत ॥ १ ॥ ऋषिमार्षेयं सुधातुदक्षिणमनैमित्तिकम् । एष ह वा ऋषिरार्षेयः सुधातुदक्षिणो यस्य त्र्यवराध्यांः पूर्वपुरुषा विद्याचरणवृत्तशीलसम्पन्नाः ॥ ३ ॥ उदगयन इत्येके ॥ ४ ॥ अथात ओदनसवानामुपाचारकल्पं व्याख्यास्यामः ॥ ५ ॥ सवान् दत्त्वाग्नीनादधीत ॥ ६ ॥ सार्ववैदिक इत्येके ॥ ७ ॥ सर्वे वेदा द्विकल्पाः ॥ ८ ॥

"यमोदनं०" इस सूक्त से अतिमृत्यु सव को ॥९॥ "अनड्वान्दधार०" इस सूक्त से अनडुह सव को ॥१०॥ "सूर्यस्य रश्मीन्०" इस सूक्त के तीन ऋचाओं द्वारा कर्क सव ॥११॥ "आयं गौः" इस सूक्त की तीन ऋचाओं से पृश्नि सव ॥१२॥ "अयं सहस्रं०" इन दो ऋचाओं से पृश्नि गौ सव ॥१३॥ "देवा इमं०" इस ऋचा से पौनःशिल सव ॥१४॥ "पुनन्तु मा०" इस सूक्त से पवित्र सव को ॥१५॥ "कः पृश्निं०" ऋचा से उर्वरा सव ॥१६॥ "साहस्रं त्वेष०" इस सूक्त से ऋषभ सव ॥१७॥ "प्रजापतिश्च०" सूक्त से अनडुह सव ॥१८॥ "नमस्ते जायमानायै" इस अर्थ सूक्त से वशा सव ॥१९॥ "ददामि०" इस अनुवाक से वशासव ॥२०॥ "उपमितां०" इस अर्थ सूक्त से शालासव ॥२१॥ "तस्यौदनस्य०" इस अर्थ सूक्त से बृहस्पति सव ॥२२॥ अभिचार काम का ॥२३॥ बाईस सव यज्ञ संहिता में पढ़े जाते हैं । स्वर्गौदनतन्त्र से सब सव यज्ञों को करे या ब्रह्मौदन तंत्र से; क्योंकि स्वर्गब्रह्मौदन दोनों तन्त्र (प्रक्रियायें) हैं ॥७॥६६॥ यह छियासठवी कंडिका समाप्त हुई ॥

ओदन यज्ञ के लिये सामग्रियों के जुट जाने पर ब्राह्मण ऋत्विज को वरण करे ॥१॥ इन्हीं ऋषि को जिनमें आर्षेय गुण सम्पन्न हैं, वह हैं सुधातु दक्षिण, इन्हीं विना निमित्त वरण करना चाहिये ॥२॥ या यही ऋषि आर्षेय सुधातु दक्षिण हैं जिनके तीन से अधिक पूर्व पुरुष विद्या, आचरण, वृत्त, शील से सम्पन्न हुए हैं ॥३॥ इस यज्ञ के लिये उत्तरायण है—ऐसा अनेक आचार्यों की सम्मति है ॥४॥ अब ओदन सवों का उपचार कल्प कहेंगे ॥५॥ सवों को देकर अग्नि का आधान करे ॥६॥ सार्ववैदिक—यह है ऐसा बहुत से आचार्य कहते हैं ॥७॥ सब ही वेद

मासपरार्ध्यो दीक्षा द्वादशरात्रो वा ॥ ९ ॥ त्रिरात्र इत्येके ॥ १० ॥ हविष्यभक्षाः स्युर्ब्रह्मचारिणः ॥११॥ अधः शयीरन् ॥१२॥ कर्तृदातारावा समापनात्कामं न भुञ्जीरन् सन्तताश्चेत् स्युः ॥१३ अहनि समाप्तमित्येके ॥१४॥ यात्रार्थं दातारौ वा दाता केशश्मश्रुरोमनखानि वापयीत ॥१५॥ केशवर्जं पत्नी ॥१६॥ स्नातावहतवसनौ सुरभिणौ व्रतवन्तौ कर्मण्यावुपवसतः ॥१७॥ श्वो भूते यज्ञोपवीती शान्त्युदकं कृत्वा यज्ञवास्तु च सम्प्रोक्ष्य ब्रह्मौदनिकमग्निं मथित्वा ॥ १८ ॥ यद्देवा देवहेडनं यद्विद्वांसो यदविद्वांसोऽपमित्यप्रतीत्तमित्येतैस्त्रिभिः सूक्तैरन्वारब्धे दातरि पूर्णहोमं जुहुयात् ॥१९॥ पूर्वाह्णे बाह्यतः शान्तवृक्षस्येध्मं प्राञ्चमुपसमाधाय ॥२०॥ परिसमुह्य पर्युक्ष्य परिस्तीर्य बर्हिरुदपात्रमुपसाद्य परिचर-

---

द्विकल्प हैं ॥८॥ मास, पक्ष या १२ रात्र तक दीक्षा ग्रहण करे ॥९॥ किन्हीं के मत में तीन रात ॥१०॥ ब्रह्मचारी दीक्षाकाल में हविष्य भक्षण करे ॥११॥ भूमि पर सोवे ॥१२॥ कर्त्ता और दाता बिना समाप्ति के अपनी इच्छा से भोजन न करे; यदि लगातार कार्य्य हों ॥१३॥ दिन ही में समाप्त करें—किन्हीं की सम्मत्ति है ॥१४॥ यात्रा के प्रयोजन से दाता पति पत्नी केश, श्मश्रु, रोम और नखों को कटवावे ॥१५॥ केश को छोड़ कर पत्नी (केवल नख कटवावे) ॥१६॥ स्नान करके अखण्ड नये वस्त्रों को पहन कर सुगन्ध चन्दनादि अनुलेपन कर, व्रती होकर कर्म निमित्त उपवास रहें ॥१७॥ प्रातः होने पर यज्ञोपवीती हो शान्त्युदक करके और यज्ञवास्तु को संप्रोक्षण करके ब्रह्मौदनिक अग्नि को मथ कर ॥१८॥ "यद्देवा देवहेडनं, यद्विद्वाँसो यदविद्वांसोऽपं०" और "अप्रतीत्तं०" इत्यादि तीनों सूक्तों से दाता के अन्वारब्ध करने पर पूर्ण होम करें ॥१९॥ पूर्वाह्ण समय बाहर से शान्तवृक्ष के इध्मों को पूर्व कर उपसमाधान करके ॥२०॥ परिसमूहन, पर्युक्षण और परिस्तरण करके कुश

णेनाज्यं परिचर्य ॥२१॥ निस्यान्पुरस्ताद्धोमान् हुत्वाज्यभागौ च ॥२२॥ पश्चादग्नेः पल्पूलितविहितमौक्षं वानडुहं वा रोहितं चर्म प्राग्ग्रीवमुत्तरलोम परिस्तीर्य ॥२३॥ पवित्रे कुरुते ॥२४॥ दर्भावप्रच्छन्नप्रान्तौ प्रक्षाल्यानुलोममनुमार्ष्टि ॥२५॥ दक्षिणं जान्वाच्यापराजिताभिमुखः प्रह्वो वा मुष्टिना प्रसृतिनाञ्जलिना यस्यां श्रपयिष्यन्स्यात्तया चतुर्थम् ॥२६॥ शरावेण चतुःशरावं देवस्य त्वा सवितुः प्रसव ऋषिभ्यस्त्वार्षेयेभ्यस्त्वैकर्षये त्वा जुष्टं निर्वपामि ॥२७॥८॥६७॥

वसवस्त्वा गायत्रेण च्छन्दसा निर्वपन्तु । ऊर्जमक्षितमक्षीयमाणमुपजीव्यासमिति दातारं वाचयति ॥१॥ रुद्रास्त्वा त्रैष्टुभेन च्छन्दसा । आदित्यास्त्वा जागतेन च्छन्दसा । विश्वे त्वा देवा आनुष्टुभेन च्छन्दसा निर्वपन्तु । ऊर्जमक्षितमक्षीयमाणमुपजीव्यासमिति दातारं वाचयति ॥२॥ निरुप्तं सूक्तेनाभिमृशति ॥३॥ स्वर्गब्रह्मौदनौ

और उदपात्र को लाकर परिचरण आज्य को ठीक करके ॥२१॥ नित्य पुरस्तात् होमों को करके और आज्य की दो आहुति करके ॥२२॥ अग्नि के पश्चिम पल्पूलित विहित औक्ष या अनड्वान का लाल चर्म प्राग्ग्रीव उत्तर लोम कर बिछावे । पवित्रे से मार्जन करे ॥२३॥२४॥ बिना टूटे दो दर्भों को प्रक्षालन करके अनुलोमों को मार्जन करे ॥२५॥ दहिने जंघे को टेक कर पश्चिमाभिमुख हो निहुड़ कर या मुट्ठी से अंजुलि पसार कर जिसमें पकाना होगा उसके चौथे को ॥२६॥ पुरवा से "चतुःशरावं देवस्य त्वा सवितुः" इत्यादि से निर्वपन करे ॥२७॥८॥६७॥ यह सदसठवि कंडिका समाप्त हुई ॥

"वसवस्त्वा० इत्यादि आहुति करके दाता से "ऊर्जमक्षित०" इत्यादि बचवावे ॥१॥ "रुद्रास्त्वा०" इत्यादि से आहुति देकर दाता को "ऊर्जमक्षित०" इत्यादि को बचवावे ॥२॥ आहुति शेष को सूक्त से अभिमर्शन करे ॥३॥ स्वर्ग और ब्रह्मौदन तन्त्र से कर्म करे ॥४॥ (यदि एक

तन्त्रम् ॥४॥ सन्निपाते ब्रह्मौदनमितमुदकमासेचयेद्विभागम् ॥५॥ यावन्तस्तण्डुलाः स्युर्नावसिञ्चेन्न प्रतिषिञ्चेत् ॥६॥ यद्यवसिञ्चेन्मयि वर्चो अथो यश इति ब्रह्मा यजमानं वाचयति ॥७॥ अथ प्रतिषिञ्चेत् ॥८॥ आप्यायस्व सं ते पयांसीति द्वाभ्यां प्रतिषिञ्चेत् ॥९॥ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य सङ्गथे ॥ सं ते पयांसि समुयन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः । आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्वेति ॥१०॥ तत्र चेदुपाधिमात्रायां नखेन न लवणस्य कुर्यात्तेनैवास्य तद्वृथान्नं सम्पद्यते ॥११॥ अहतं वासो दक्षिणत उपशेते ॥१२॥ तत्सहिरण्यम् ॥१३॥ तत्र द्वे उदपात्रे निहिते भवतः ॥१४॥ दक्षिणमन्यदन्तरमन्यत् ॥१५॥ अन्तरं यतोऽधिचरिष्यन् भवति ॥१६॥ बाह्यं जाज्ञायनम् ॥१७॥ तत उदकमादाय पात्र्यामानयति ॥१८॥

साथ अनेक पदार्थ हों तो संनिपात कहते हैं ।) संनिपात की दशा में ब्रह्मौदन को विभाग (अलग २ करके) कर जल से सेचन करे ५॥ जितने तण्डुल हों उन सबको न अवसेचन करे न प्रतिषेचन करे ॥६॥ यदि अवसेचन करे तो "मयि वर्चो अथो यशः" । इसको ब्रह्मा यजमान को बचवावे ॥७॥ और प्रतिषिञ्चन करे तो "आप्यायस्व, सं ते पयांसि०" इन दो ऋचाओं से प्रतिषिञ्चन करे ॥८॥९॥ "आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य संगथे ॥ सं ते पयांसि समुयन्तु वाजाः संवृष्णान्यभिमातिषाहः । आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व" इति । यदि वहां उपाधि मात्रा में नख से लवण का न करे उसीसे इसका वह अन्न वृथा हो जाता है ॥११॥ अखण्ड नये वस्त्र पहन कर दक्षिण दिशा में सोवे ॥१२॥ उसके साथ स्वर्ण को देवे ॥१३॥ वहाँ दो पात्र निहित हैं ॥१४॥ दक्षिण में एक और अन्दर में अन्य है ॥१५॥ भीतर में जिस कारण काम करना होगा ॥१६॥ बाहर में जाज्ञायन है ॥१७॥ इसके अनन्तर जल लाकर पात्री में लावे

दर्व्या कुम्भ्याम् ॥१९॥ दर्विकृते तत्रैव प्रत्यानयति ॥२०॥ दर्व्योत्तममपादाय तत्सुहृद्दक्षिणतोऽग्नेरुदङ्मुख आसीनो धारयति ॥२१॥ अथोद्धरति ॥२२॥ उद्धृते यदपादाय धारयति तदुत्तरार्ध आधाय रसैरुपसिच्य प्रतिग्रहीत्रे दातोपवहति ॥२३॥ तस्मिन्नन्वारब्धं दातारं वाचयति ॥२४॥ तन्त्रं सूक्तं पच्छः स्नानेन यौ ते पक्षौ यदतिष्ठः ॥२५॥ यौ ते पक्षावजरौ पतत्रिणौ याभ्यां रक्षांस्यपहं-स्योदन । ताभ्यां पथ्यास्म सुकृतस्य लोकं यत्र ऋषयः प्रथमजाः पुराणाः ॥ यदतिष्ठो दिवस्पृष्ठे व्योमन्नध्योदन । अन्वायन्सत्यधर्माणो ब्राह्मणा राधसा सह ॥२६॥ क्रम-ध्वमग्निना नाकं पृष्ठात् पृथिव्या अहमन्तरिक्षमारुहं स्वर्यन्तो नापेक्षन्त उरुः प्रथस्व महता महिम्नेदं मे ज्योतिः सत्याय चेति तिस्रः समग्नय इति सार्धमेतया ॥२७॥ अत ऊर्ध्वं वाचिते हुते संस्थितेऽमूं ते ददामीति नाम-ग्राहमुपस्पृशेत् ॥२८॥ सदक्षिणं कामस्तदित्युक्तम् ॥२९॥ ये भक्षयन्त इति पुरस्ताद्धोमाः ॥३०॥ अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरुथ्यः ॥ तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ॥ गयस्फानो

॥१८॥ दर्वी से कुम्भी में ॥१९॥ दर्वि में रखने से वहीं प्रत्यानयन करना पड़ता है ॥२०॥ दर्वी से अन्तिम जल को लाकर उसका सुहृत् अग्नि के दक्षिण में उत्तर मुख बैठकर धारण करे ॥२१॥ तत्र सूक्त को पढ़ २ करके "स्नानेन यौ ते पक्षौ यदतिष्ठः" इत्यादि। इसके साथ आधी ऋचा से ॥२५॥२६॥२७॥ इसके पश्चात् बचवाने पर एवं संस्थित होम हो जाने पर "अमूं ते ददामि०" से नामग्राह को स्पर्श करे ॥२८॥ दक्षिणा सहित "कामस्तत्०" से कहा गया है ॥२९॥ "ये भक्षयन्त:०" से पुर-स्तात् होम करे ॥३०॥ "अग्ने त्वं नो०" इत्यादि से आज्यभाग की दो,

अमीवहा वसुवित् पुष्टिवर्धनः । सुमित्रः सुमनो भवेस्याज्यभागौ ॥३१॥ पाणावुदकमानीयेत्युक्तम् ॥३२॥ प्रतिमन्त्रणान्तम् ॥३३॥ प्रतिमन्त्रिते ऽयवदायाश्नन्ति ॥३४॥ इदावत्सरायेति व्रतविसर्जनमाज्यं जुहुयात् ॥३५॥ समिधोऽभ्यादध्यात् ॥३६॥ तत्र श्लोकौ । यजुषा मथिते अग्नौ यजुषोपसमाहिते ॥ सवान् दत्त्वा सवाग्नेस्तु कथमुत्सर्जनं भवेत् ॥ वाचयित्वा सवान् सर्वान् प्रतिगृह्य यथाविधि ॥ हुत्वा सन्नतिभिस्तत्रोत्सर्गं कौशिकोऽब्रवीत् ॥३७॥ प्राञ्चोऽपराजितां वा दिशमवभृथाय व्रजन्ति ॥३८॥ अपां सूक्तैराप्लुत्य प्रदक्षिणमावृत्याप उपस्पृश्यानवेक्षमाणाः प्रत्युदाव्रजन्ति ॥३९॥ ब्राह्मणान् भक्तेनोपेप्सन्ति ॥४०॥ यथोक्ता दक्षिणा यथोक्ता दक्षिणा ॥४१॥९॥६८॥

इत्यथर्ववेदे कौशिकसूत्रे अष्टमोऽध्यायः समाप्तः ॥८॥

पित्र्यमग्निं शमयिष्यञ्ज्येष्ठस्य चाविभक्तिन एका-

आहुतियाँ करे ॥३१॥ हाथ में जल लावे यह कहा गया ॥३२॥ प्रतिमंत्रण के अन्त में ॥३३॥ प्रतिमंत्रण करके लाकर भोजन करे ॥३४॥ "इदावत्सराय०" से व्रत का विसर्जन और आज्य की आहुति देवे ॥३५॥ समिधों को डाले ॥३६॥ इसमें श्लोक हैं। यजुर्वेद के मंत्र से अग्नि में मथन हुआ और उसीके मंत्र से अग्नि में आहुति हुई। सवों को देकर कैसे सवाग्नि का उत्सर्जन हो। सब सवों को बचवा कर यथाविधि प्रतिग्रहण कर और संनति ऋचाओं से आहुति देकर वहाँ उत्सर्जन होगा—यह कौशिकाचार्य कहते हैं ॥३७॥ पूर्व या पश्चिम में अवभृथ के लिये जावें ॥३८॥ अपां सूक्तों से नहाकर प्रदक्षिण घूमकर जल छूकर पीछे को न देखते हुए वापस आवें ॥३९॥ ब्राह्मणों को यथेच्छ भोजन करावें ॥४०॥ और यथोक्त दक्षिणा देवें ॥४१॥९॥६८॥

अथर्ववेद के कौशिक सूत्र के अष्टम अध्याय का भाषानुवाद समाप्त हुआ ॥ ८ ॥

जिस घर का पिता मर जावे और उसकी सम्पत्ति का बाट उसके

ग्निमाधास्यन् ॥१॥ अमावास्यायां पूर्वस्मिन्नुपशाले गां द्विहायनीं रोहिणीमेकरूपां बन्धयति ॥२॥ निशि शामूलपरिहितो ज्येष्ठोऽन्वालभते ॥३॥ पत्न्यहतवसना ज्येष्ठम् ॥४॥ पत्नीमन्वञ्च इतरे ॥५॥ अथैनानभिव्याहारयत्यध्रिगो शमीध्वम्॥ सुशमि शमीध्वम्। शमीध्वमध्रिगा३ उ इति त्रिः ॥६॥ अयमग्निः सत्पतिर्नडमारोहेत्यनुवाकं महाशान्तिं च शान्त्युदक आवपते ॥७॥ अग्ने अक्रव्यादिति भ्रष्ट्राद्दीपं धारयति ॥८॥ भूमेश्चोपदग्धं समुत्खाय ॥९॥ आकृतिलोष्टवल्मीकेनास्तीर्य ॥१०॥ शकृत्पिण्डेनाभिलिप्य ॥११॥ सिकताभिः प्रकीर्याभ्युक्ष्य ॥१२॥ लक्षणं कृत्वा ॥१३॥ पुनरभ्युक्ष्य ॥१४॥ पश्चाल्लक्षणस्याभिमन्थनं निधाय ॥१५॥ गोऽश्वाजावीनां पुंसां लोमभिरास्तीर्य व्रीहियवैश्च शकृत्पिण्डमभिविमृज्य प्राञ्चौ

पुत्रों में न हुआ हो तो उसमें ज्येष्ठ पुत्र पिता के स्थान में अधिकारी होगा। उस घर के औपासन अग्नि करने की इच्छा वाला अमावास्या तिथि को शाला के पूर्व स्थान में—उपशाला में दो वर्ष की गौ को जो, रोहिणी एक रंग की हो उसको बांधे ॥१॥२॥ रात्रि में शामूल पहन कर ज्येष्ठ पुत्र अन्वालम्भन करे ॥३॥ पत्नी अखण्ड नये वस्त्र को पहन कर ज्येष्ठ को और इतर पुरुष पत्नी को अन्वञ्च करे ॥४॥५॥ अब पत्नी को अभिव्याहार करे "अध्रिगो शमीध्वम् । सुशमीध्वम् । शमीध्वमध्रिगा३उ०" तीन् बार कहे ॥६॥ "अयमग्निः सत्पतिर्नडमारोह०" इस अनुवाक से महाशान्ति को और शान्त्युदक में आवपन करे ॥७॥ "अग्ने अक्रव्यात्०" से भडभूँजे के घर से अग्नि लाकर धारण करे ॥८॥ और अदग्ध भूमि को खनन कर जोते खेत की मिट्टी और दीमक की मिट्टी से भरकर बराबर करे ॥९॥१०॥ एवं गोबर से लीपकर बालु से छींट कर अभ्युक्षण करके उस पर रेखा खैंचे ॥११॥१२॥१३॥ पुनः अभ्युक्षण करके रेखा के पश्चिम भाग में अग्नि मन्थन को धरे ॥१४॥१५॥ गौ, घोड़ा, या बकरे (पुरुष) के लोमों से आस्तरण कर व्रीहि और जौ से गोबर

दर्भौ निदधाति ॥१६॥ वृषणौ स्थ इत्यभिप्राण्यारण्यौ ॥१७॥ तयोरुपर्यधरारणिम् ॥१८॥ दक्षिणतो मूलान् ॥१९॥ पश्चात् प्रजननामुर्वश्यसीत्यायुरसीति ॥२०॥ मूलत उत्तरारणिमुपसन्धाय ॥२१॥ पृतनाजितमित्याहूय ॥२२॥ अभिदक्षिणं ज्येष्ठस्त्रिरभिमन्थत्यों भूर्गायत्रं छन्दोऽनुप्रजायस्व त्रैष्टुभं जागतमानुष्टुभमों भूर्भुवःस्वर्जनदोमिति ॥२३॥ अत ऊर्ध्वं यथाकामम् ॥२४॥१॥६९॥

मन्थामि त्वा जातवेदः सुजातं जातवेदसम् ॥ स नो जीवेष्वा भज दीर्घमायुश्च धेहि नः ॥ जातोऽजनिष्ठा यशसा सहाग्ने प्रजां पशूंस्तेजो रयिमस्मासु धेहि ॥ आनन्दिनो मोदमानाः सुवीरा अनामयाः सर्वमायुर्गमेम ॥ उद्दीप्यस्व जातवेदोऽव सेदिं तृष्णां क्षुधं जहि ॥ अपास्मत्तम उच्छत्स्वपहीतमुखो जह्यप दुर्हार्दिशो जहि॥ इहैवैधि धनसनिरिह त्वा समिधीमहि । इहैधि पुष्टिवर्धन इह त्वा समिधीमहीति ॥१॥ प्रथमया मन्थति ॥२॥ द्वितीयया जातमनुमन्त्रयते ॥ ३ ॥ तृतीययोद्दीपयति

अभिमार्जन करके पूर्वाग्र कुशाओं को धरे ॥१६॥ "वृषणौ स्थ०" दोनों अरणियों को लावे और उनमें अधरारणि को दक्षिण की ओर मूल करके धरे और पश्चात् "प्रजननामुर्वश्यसीत्यायुरसि०" से मूल उत्तर करके उसके ऊपर धर कर ॥२१॥ "पृतनाजितं०" कह कर पुकारे ॥२२॥ सम्मुख दक्षिण में होकर ज्येष्ठ "ओंभूर्गायत्रं छन्दोऽनुप्रजायस्व त्रैष्टुभं जागतमानुष्टुभं भूर्भुवःस्वर्जनदों०" इन तीन ऋचाओं से मन्थन करे ॥२३॥ इसके पश्चात् अपनी इच्छानुसार मन्थन कर अग्नि उत्पादन करे ॥२४॥१॥६९॥ यह उनहत्तरवि कण्डिका समाप्त हुई ।

"मन्थामि त्वा०" इत्यादि ॥१॥ प्रथमा ऋचा से मन्थन करे । द्वितीया से उत्पन्नाग्नि को अनुमंत्रण करे और तृतीया से अग्नि को

॥४॥ चतुर्थ्योपसमादधाति ॥५॥ यत्त्वा क्रुद्धा इति चों भूर्भुवः स्वर्जनदोमित्यङ्गिरसां त्वा देवानामादित्यानां व्रतेनादधे ॥ द्यौर्महासि भूमिर्भूम्ना तस्यास्ते देव्यदिति-रुपस्थेऽन्नादायान्नपस्याया दधदिति ॥६॥ लक्षणे प्रतिष्ठा-प्योपोत्थाय ॥७॥ अथोपतिष्ठते ॥८॥ अग्ने गृहपते सुगृह-पतिरहं त्वयाग्ने गृहपतिना भूयासम् ॥ सुगृहपतिस्त्वं मयाग्ने गृहपतिना भूयाः । अस्थूरि णौ गार्हपत्यानि दीदिहि शतं समा इति ॥९॥ व्याकरोमीति गार्हपत्य-क्रव्यादौ समीक्षते ॥१०॥ शान्तमाज्यं गार्हपत्यायोप-निदधाति ॥११॥ माषमन्थं क्रव्यादम् ॥१२॥ उप त्वा नमसेति पुरोऽनुवाक्या ॥१३॥ विश्वाहा त इति पूर्णा-हुतिं जुहोति ॥१४॥ यो नो अग्निरिति सह कर्त्रा हृद-यान्यभिमृशन्ते ॥१५॥२॥७०॥

अंशो राजा विभजतीमावग्नी विधारयन् ॥ क्रव्या-दं निर्णुदामसि हव्यवाडिह तिष्ठत्त्विति विभागं ज-पति ॥१॥ सुगार्हपत्य इति दक्षिणेन गार्हपत्ये समिध-मादधाति ॥२॥ यः क्रव्यात्तमशीशममिति सव्येन नड-

---

जलावे ॥२॥३॥४॥ और चौथी से अग्न्याधान करे ॥५॥ "यत्त्वा क्रुद्धा०" और "ॐ भूर्भुवः०" इत्यादि से रेखा पर प्रतिष्ठापन करके और उठ कर उपस्थान करे ॥६॥७॥८॥ "अग्ने गृहपते०" इत्यादि ॥९॥ और "व्याक-रोमि०" इन दोनों से गार्हपत्य और क्रव्याद अग्नि को देखे ॥१०॥ शान्त आज्य को गार्हपत्य के लिये धरे ॥११॥ माष (उड़ीद) का मन्थ क्रव्याद के लिये ॥१२॥ "उप त्वा नमस०" पुरोऽनुवाक्या ॥१३॥ "विश्वाहात०" से पूर्णाहुति देवे ॥१४॥ "यो नो अग्निः" से कर्त्ता के साथ हृदयों को यजमान एवं पत्नी अभिमर्शन करे ॥१५॥ २॥७०॥ यह सत्तरवि कण्डिका समाप्त हुई ।

"अंशो राजा०" इत्यादि से विभाग को जप करे ॥१॥ "सुगार्ह-पत्य०" से दक्षिण से गार्हपत्य अग्नि में समिद् का आधान करे ॥२॥

मयीं क्रव्यादि ॥३॥ अपावृत्येति मन्त्रोक्तं बाह्यतो निधाय ॥४॥ नडमारोह समिन्धत इषीकां जरतीं प्रत्यञ्चमर्कमित्युपसमादधाति ॥ ५ ॥ यद्यग्निर्यो अग्निरविः कृष्णा मा नो रुरोः शुचिद्भिदः शिवो नो अस्तु भरतो रराणः अतिव्याधी व्याधो अग्रभोष्ट क्रव्यादो अग्नीञ्छमयामि सर्वानिति शुक्त्या माषपिष्टानि जुहोति ॥६॥ सीसं दर्व्यामवधायोद्धृत्य मन्थं जुह्वञ्छमयेत् ॥७॥ नडमारोहेति चतस्रोऽग्ने अक्रव्यादिमं क्रव्याद्यो नो अश्वेष्वन्येभ्यस्त्वा हिरण्यपाणिमिति शमयति ॥८॥ दक्षिणतो जरत्कोष्ठे शीतं भस्माभिविहरति ॥९॥ शान्त्युदकेन सुशान्तं कृत्वावदग्धं समुत्खाय ॥१०॥ परं मृत्यो इत्युत्थापयति ॥११॥ क्रव्यादमिति तिसृभिर्ह्रीयमाणमनुमन्त्रयते ॥१२॥ दीपाद्याभिनिगदनात्प्रतिहरणेन व्याख्यातम् ॥१३॥ अविः कृष्णेति निदधाति ॥१४॥ उत्तमवर्जं ज्येष्ठस्याञ्जलौ सीसानि ॥१५॥ अस्मिन्वयं यद्रिप्रं सीसे

"यः क्रव्यात्तमशीशमं०" से नडमयी क्रव्यादि अग्नि में समिद् डाले ॥३॥ "अपावृत्य०" से मंत्रोक्त को बाहर से डाले ॥४॥ "नडमारोह०" इत्यादि से समिधों का आधान करे ॥५॥ "यद्यग्निर्यो०" इत्यादि से शुक्ति द्वारा माषपिष्टों की आहुति देवे ॥६॥ और सीस को दर्वी में डालकर मन्थ को मिलाकर आहुति करता हुआ शमन करे ॥७॥ "नडमारोह०" से चार और "अग्ने अक्रव्यादिमं०" इत्यादि से आहुति देता हुआ शमन करे ॥८॥ दक्षिण में जरत्कोष्ठ में शीत को भस्म से दूर करे ॥९॥ शान्त्युदक से सुशान्त करके अवदग्ध को गर्त्त से खने, और "परं मृत्यो०" से उठावे ॥११॥ "क्रव्यादं०" इन तीन ऋचाओं से ले जाते को अनुमंत्रण करे ॥१२॥ दीप आदि, का अभिनिगदन से प्रतिहरण द्वारा व्याख्यात हुआ जानो ॥१३॥ "अविः कृष्णा०" निदधान करे ॥१४॥ अन्तिम को छोड़कर जेठेकी अञ्जली में सीसों

मृड्ढ्वमित्यभ्यवनेजयति ॥१६॥ कृष्णोर्णया पाणि-पादान्निमृज्य ॥१७॥ इमा जीवा उदीचीनैरिति मन्त्रोक्तम् ॥१८॥ त्रिः सप्तेति कूद्या पदानि योपयित्वा नदीभ्यः ॥१९॥ मृत्योः पदमिति द्वितीयया नावः ॥२०॥ परं मृत्यो इति प्राग्दक्षिणं कूदीं प्रविध्य ॥२१॥ सप्त नदीरूपाणि कारयित्वोदकेन पूरयित्वा ॥२२॥ आरोहत सवितुर्नावमेतां सुत्रामाणं महीमूष्विति सहिरण्यां सयवां नावमारोहयति ॥२३॥ अश्मन्वती रीयत उत्तिष्ठता प्र तरता सखाय इत्युदीचस्तारयति ॥२४॥३॥७१॥

उत्तरतो गर्तं उदक्प्रस्रवणेऽश्मानं निदधात्यन्तश्छिन्नम् ॥१॥ तिरो मृत्युमित्यश्मानमतिक्रामति ॥२॥ ता अधरादुदीचीरित्यनुमन्त्रयते ॥३॥ निस्सालामिति शालानिवेशनं सम्प्रोक्ष्य ॥४॥ ऊर्जं बिभ्रदिति प्रपादयति

को देवे ॥१५॥ "अस्मिन्वयं०" से अभ्यवनेजन करे ॥१६॥ काले सूत से हाथ पैर को निमार्जन करके ॥१७॥ "इमा जीवा उदीचीनैः" से पूर्व मुख आवें ॥१८॥ "त्रिःसप्त०" से कूदी से पगों को छिपा कर नदियों तक जावे ॥१९॥ "मृत्योः पदं०" द्वितीया कूदीसे पैरों को छिपाकर सात नदी नाव तक जावे ॥२०॥ पूर्व दक्षिण कोण में कूदी को फेक देवे । "परं मृत्योः पदं०" मंत्र पढ़कर ॥२१॥ सात नदियों समान रूप बनाकर उनको जल से भर देवे ॥२२॥ "आरोहत सवितुः" इत्यादि से नाव पर सोना में जौ मिलाकर नाव पर डालकर तब उस पर चढ़े ॥२३॥ "अश्मन्वती०" इत्यादि को जपता हुआ नाव में बैठे और उत्तर की ओर पार होवे ॥२४॥३॥७१॥ यह एकहत्तरवि कण्डिका समाप्त हुई ।

उस गर्त्त के उत्तर ढालुआ भूमि में पत्थर को जल में धरे ॥१॥ "तिरो मृत्युं०" से पत्थर पर चढ़े ॥२॥ "ता अधरादुदीचीः" से अनुमंत्रण करे ॥३॥ "निःसालां०" से शाला के घरको संप्रोक्षण करके ॥४॥ "ऊर्जं बिभ्रत्०" से सब लोग शाला में प्रवेश करें । कोई २

॥५॥ वैश्वदेवीमिति वत्सतरीमालम्भयति ॥६॥ इममिन्द्रमिति वृषभम् ॥७॥ अनड्वाहमहोरात्रे इति तल्पमालम्भयति ॥ ८ ॥ आरोहतायुरित्यारोहति ॥९॥ आसीना इत्यासीनामनुमन्त्रयते ॥१०॥ पिञ्जूलीराञ्जनं सर्पिषि पर्यस्येमा नारीरिति स्त्रीभ्यः प्रयच्छति ॥११॥ इमे जीवा अविधवाः सुजामय इति पुम्भ्य एकैकस्मै तिस्रस्तिस्रस्ता अध्यध्युदधानं परिवृत्य प्रयच्छति ॥१२॥ परं मृत्यो व्याकरोम्यारोहतान्तर्धिः प्रत्यश्वमर्कं ये अग्नयो नमो देववधेभ्योऽग्नेऽभ्यावर्तिन्नग्ने जातवेदः सह रय्या पुनरूर्जेति ॥१३॥ अग्नेऽभ्यावर्तिन्नभि न आ ववृत्स्व । आयुषा वर्चसा सन्या मेधया प्रजया धनेन ॥ अग्ने जातवेदः शतं ते सहस्रं त उपावृतः ॥ अधा पुष्टस्येशानः पुनर्नो रयिमा कृधि ॥ सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्न्या विश्वतस्परि ॥ पुनरूर्जा ववृत्स्व पुनरग्न इषायुषा ॥ पुनर्नः पाह्यंहसः ॥१४॥ शर्करान्स्वयमातृणाञ्छणरज्जुभ्यां विबध्य धारयति ॥१५॥ समया

घर के द्वार पर महाशान्ति को चौगुने ऊँचे स्वर से बोले ॥५॥ "वैश्वदेवी०" से वत्सतरी को छूवे ॥६॥ "इममिन्द्रं०" से वृषभ या अनडुह को स्पर्श करे ॥७॥ "अनड्वाहमहोरात्रे०" से तल्प को स्पर्श करे ॥८॥ "आरोहतायुः०" से आरोहण करे ॥९॥ "आसीना०" से बैठे हुओं को अनुमंत्रण करे ॥१०॥ पिञ्जुली में आञ्जन और घृत को एक २ करके "इमा नारी०" से स्त्रियों को देवे ॥११॥ "इमे जीवा अविधवाः सुजामय०" से पिञ्जुली को जलघट पर घुमाकर यजमानादि पुरुषों को देवे। एक २ पुरुष के लिये तीन २ देवे ॥१२॥ "परं मृत्यो०" इत्यादि से ॥१३॥ "अग्नेऽभ्यावर्तिन्नभि न०" इत्यादि मंत्रों से आज्य की आहुतियाँ देवे ॥१४॥ स्वयं छिद्रित शर्कराओं को बांध कर अग्नि पर धरे ॥१५॥ और

खेन जुहोति ॥१६॥ इमं जीवेभ्य इति द्वारे निदधाति ॥१७॥ जुहोत्येतयर्चा आयुर्दावा धनदावा बलदावा पशुदावा पुष्टिदावा प्रजापतये स्वाहेति ॥१८॥ षट्सम्पातं माता पुत्रानाशयते ॥१९॥ उच्छिष्टं जायाम् ॥२०॥ संवत्सरमग्निं नोद्वायान्न हरेन्नाहरेयुः ॥२१॥ द्वादशरात्र इत्येके ॥२२॥ दश दक्षिणा ॥२३॥ पश्चादग्नेर्वाग्यतः संविशति ॥२४॥ अपरेद्युरग्निं चेन्द्राग्नी च यजेत ॥२५॥ स्थालीपाकाभ्यामग्निं चाग्नीषोमौ च पौर्णमास्याम् ॥२६॥ सायंप्रातर्व्रीहीनावपेद्यवान्वाग्नये स्वाहा प्रजापतये स्वाहेति ॥२७॥ सायं सूर्याय स्वाहा प्रजापतये स्वाहेति ॥२८॥ प्रातर्द्वादशरात्रेऽग्निं पशुना यजेत ॥२९॥ स्थालीपाकेन वोभयोर्विरिष्यति ॥३०॥ संवत्सरतम्यां शान्त्युदकं कृत्वा ॥३१॥ घृताहुतिर्नो भवाग्ने अक्रव्याहुति-

---

स्वयं आहुति करे ॥१६॥ "इमं जीवेभ्यः" से द्वार पर धरे ॥१७॥ "जुहोति०" इस ऋचा से और "आयुर्दावा" इत्यादि से आहुति देवे ॥१८॥ छः सम्पातों को माता पुत्रों को खिलावे ॥१९॥ यजमान स्वयं खाकर उच्छिष्ट अपनी पत्नी को देवे ॥२०॥ यह आवसथ्याधान पूरा हुआ। साल भर तक अग्नि को पुतावे और न किसी को देवे और न आप लेवे ॥२१॥ कोई २ बारह रात्रि में कहते हैं ॥२२॥ दश दक्षिणा देवे ॥२३॥ यजमान अग्नि के पश्चिम भाग में बैठे ॥२४॥ और दूसरे दिन अग्नि और इन्द्राग्नी को यजन करे ॥२५॥ सायं प्रातः स्थालीपाक से अग्नि और अग्नीषोम को पौर्णमासी तिथि में आहुतियाँ करे ॥२६॥ "सायं प्रातः व्रीहियों या यवों से" "अग्नये स्वाहा। प्रजापतये स्वाहा" से सायंकाल में और "सूर्याय स्वाहा। प्रजापतये स्वाहा" से प्रातःकाल में आहुतियाँ देवे ॥२७॥२८॥ १२ रात्रि के प्रातःकाल में अग्नि को पशु से यजन करे। ॥३० ॥ स्थालीपाक से या दोनों से अलग २ करे ॥३०॥ वर्ष के अन्त में उस अग्नि में शान्त्युदक करके। 'घृताहुतिर्नो' इत्यादि से घी की आहुति

घृताहुतिं त्वा वयमक्रव्याहुतिमुपनिषदेम जातवेद इति चतुर उदपात्रे सम्पातानानीय ॥३२॥ तानुल्लप्य ॥३३॥ पुरस्तादग्नेः प्रत्यङ्ङासीनो जुहोति । हुते रमस्व हुतभाग एधि मृडास्मभ्यं मोत हिंसीः पशून्न इति ॥३४॥ यद्युद्वायाद्भस्मनारणिं संस्पृश्य तूष्णीं मथित्वोद्दीप्य ॥३५॥ पूर्णहोमं हुत्वा ॥३६॥ संनतिभिराज्यं जुहुयाद् व्याहृतिभिर्वा ॥३७॥ संसृष्टे चैवं जुहुयात् ॥३८॥ अग्नावनुगते जायमाने ॥३९॥ आनडुहेन शकृत्पिण्डेनाग्न्यायतनानि परिलिप्य ॥४०॥ होम्यमुपसाद्य ॥४१॥ प्राणापानाभ्यां स्वाहा समानव्यानाभ्यां स्वाहोदानरूपाभ्यां स्वाहेत्यात्मन्येव जुहुयात् ॥४२॥ अथ प्रातरुत्थायाग्निं निर्मथ्य यथास्थानं प्रणीय यथापुरमग्निहोत्रं जुहुयात् ॥४३॥ सायमाशप्रातराशौ यज्ञावृत्विजौ ॥४४॥४॥७२॥

पुरोदयादस्तमयाच्च पावकं प्रबोधयेद्गृहिणी शुद्धहस्ता ।

देकर सम्पातों को चार उदपात्रों में लावे और अग्नि के पूर्व में पश्चिम मुख बैठकर आहुति करे ॥३१॥३२॥३३॥ "हुते रमस्व" इत्यादि से आहुति करे ॥३४॥ यदि अग्नि बुत जावे तो, उसके भस्म से अरणि को संस्पर्श कराकर तूष्णीं अरणि द्वारा अग्नि मथकर प्रज्वलित करके पूर्ण होम कर लेवे ॥३५॥३६॥ संनति मंत्रों से व्याहृति से आज्य की आहुति करे ॥३७॥ मिले हुए होने पर इस प्रकार आहुति देवे ॥३८॥ यदि अग्नि गत होने लगे तो, बैल के गोबर से अग्नि के वेदी को लीप कर होम की सामग्री लाकर ॥३९॥४०॥४१॥ "प्राणापानाभ्यां स्वाहा०" इत्यादि अपने आत्मगत अग्नि की आहुतियाँ देवे ॥४२॥ तब प्रातःकाल उठकर अरणियों से अग्नि मथ कर यथा स्थान अग्नि प्रणयन करके यथापुर अग्नि होत्र की आहुति करे ॥४३॥ सायंकाल और प्रातः काल के भोजन यज्ञ कराने वाले दोनों ऋत्विजों को देवे ॥४४॥४॥७२॥ यह बहत्तरवि कण्डिका समाप्त हुई ।

समतीते सन्धिवर्णेऽथ हावयेत्सुसमिद्धे पावक आहुती-षहिः ॥१॥ अग्नये च प्रजापतये च रात्रावादित्यश्च दिवा प्रजापतिश्च। उदकं च समिधश्च होमे होमे पुरो वरम् ॥२॥ होम्यैः समिद्भिः पयसा स्थालीपाकेन सर्पिषा सायम्प्रात-र्होम एतेषामेकेनापि सिध्यति ॥३॥ अभ्युद्धृतो हुतोऽग्निः प्रमादादुपशाम्यति । मथिते व्याहृतोर्जुहुयात् पूर्णहोमौ यथर्त्विजौ ॥४॥ वनस्पतिभ्यो वानस्पत्येभ्य ओषधि-भ्यो वीरुद्भ्यः सर्वेभ्यो देवेभ्यो देवजनेभ्यः पुण्यज-नेभ्य इति प्राचीनं तदुदकं निनीयते ॥५॥ स्वधा प्रपिताम-हेभ्यः स्वधा पितामहेभ्यः स्वधा पितृभ्य इति दक्षिणतः॥६॥ तार्क्ष्यायारिष्टनेमयेऽमृतं मह्यमिति पश्चात् ॥७॥ सोमाय सप्तर्षिभ्य इत्युत्तरतः ॥८॥ परिमृष्टे परिलिप्ते च पर्वणि व्रातपतं हावयेदन्नमग्नौ। भूयो दत्त्वा स्वयमल्पं च भुक्त्वा

जब सूर्योदय और सूर्यास्त के समय घर की स्त्री (मालकिनी) अपने हाथों को जल से धोकर, शौचादि से निवृत्त होके शुद्ध हाथों से अग्नि को जगावे ॥ और दोनों सन्धिकाल बीत जावे तो घरके बाहर अग्नि में आहुतियाँ देवे ॥१॥ रात्रि में "अग्नये च प्रजापतये च"। और दिन में आदित्य प्रजापति के नाम आहुतियाँ करे। जल और समिद् प्रत्येक होम में पूरे और उत्तम लावे ॥२॥ होम करने की वस्तु समित्, दूध, स्थालीपाक और घृत। सायं प्रातः इनकी आहुति करे या इनमें से किसी एक से करे ॥३॥ अभ्युद्धृत, यदि प्रमाद से बुत जावे तो, अरणियों द्वारा मथितोत्पन्न अग्नि में व्याहृति से और पूर्ण होम भी करे जैसा दोनों ऋत्विज कहें ॥४॥ "वनस्पतिभ्यो" इत्यादि से पूर्व की ओर आहुतियाँ करे और जल लावे ॥५॥ और "स्वधा प्रपितामहेभ्यः" इत्यादि से दक्षिण में, "तार्क्ष्याय०" से पश्चिम दिशा में और "सोमाय सप्तर्षिभ्यः" से उत्तर दिशा में आहुतियाँ देवे ॥६॥७॥८॥ मार्जन और लीपने पर (भूमिको) व्रतपति को अन्न की आहुति अग्नि में करे॥ थोड़ा या बहुत दूसरों को अन्न देकर आप भोजन अपराह्न में करे—यह याज्ञिक व्रत है ॥९॥

पराह्णे व्रतमुपैति याज्ञिकम् ॥ ९ ॥ अनशनं ब्रह्मचर्यं च भूमौ शुचिरग्निमुपशेते सुगन्धिः ॥१०॥ अग्नीषोमाभ्यां दर्शन इन्द्राग्निभ्यामदर्शने ॥ आग्नेयं तु पूर्वं नित्यमन्वाहार्यं प्रजापतेः ॥११॥ अर्धाहुतिस्तु सौविष्टकृती सर्वेषां हविषां स्मृता ॥ आनुमती वा भवति स्थालीपाकेष्वथर्वणाम् ॥१२॥ उभौ च संधिजौ यौ वैश्वदेवौ यथऋत्विजौ । वर्जयित्वा सबर्हिषः साज्या यज्ञाः सदक्षिणाः ॥१३॥ यथाशक्ति यथाबलं हुतादोऽन्ये अहुतादोऽन्ये ॥ वैश्वदेवं हविरुभये संचरन्ति ॥१४॥ ते सम्यञ्च इह मादयन्तामिषमूर्जं यजमाना यमिच्छत । विश्वे देवा इदं हविरादित्यासः सपर्यत ॥ अस्मिन्यज्ञे मा व्यथिष्यमृताय हविष्कृतम् ॥१५॥ वैश्वदेवस्य हविषः सायम्प्रातर्जुहोति । सायमाशप्रातराशौ यज्ञावेतौ स्मृतावुभौ ॥१६॥ अप्रतिभुक्तौ शुचिकार्यौ च नित्यं वैश्वदेवौ जानता यज्ञश्रेष्ठौ । नाश्रोत्रियो नानवनिक्तपाणिर्ना-

---

उपवास रहना और ब्रह्मचर्य से रहना पवित्र होकर, अग्नि के पास सोवे और सुगन्ध युक्त रहे ॥१०॥ दर्शन में अग्नीषोमों से, अदर्शन में इन्द्राग्नी से ॥ आग्नेय को पहिले नित्य और उसके पश्चात् प्रजापति की ॥११॥ सौविष्ट कृत की आधी आहुति यह नियम सब ही होमों का है ॥ या अथर्ववेदियों का होम आनुमती स्थालीपाक से होता है ॥१२॥ और जो दोनों सन्धि समय बलि, वैश्वदेव यथा ऋत्विज । सबर्हिष को छोड़ कर आज्य के साथ होता है और दक्षिणा के साथ सब यज्ञ होते हैं ॥१३॥ शक्ति एवं बल के अनुसार हुताद, अन्य अहुताद, अन्य वैश्वदेव हवि दोनों समय करते हैं ॥१४॥ "ते सम्यञ्च" इत्यादि को पढ़े ॥१५॥ वैश्वदेव की हवि को सायं प्रातःकाल आहुतियाँ करे और सायंकाल एवं प्रातःकाल का भोजन पवित्र बनावे ये दोनों यज्ञ हैं—यह धर्मशास्त्र में कहा है ॥१६॥ दोनों यज्ञों को श्रेष्ठ जानकर विना भोजन किये पवित्रता से नित्य भोजन बनावे ॥ न अवैदिक, न जल से साफ किये

मन्त्रविज्जुहुयान्नाविपश्चित् ॥१७॥ बीभत्सवः शुचिकामा हि देवा नाश्रद्दधानस्य हविर्जुषन्ते । ब्राह्मणेन ब्रह्मविदा तु हावयेन्न स्त्रीहुतं शूद्रहुतं च देवगम् ॥१८॥ यस्तु विद्यादाज्यभागौ यज्ञान्मन्त्रपरिक्रमान् । देवताज्ञानमावृत आशिषश्च कर्म स्त्रिया अप्रतिषिद्धमाहुः ॥१९॥५॥७३॥

तयोर्बलिहरणम् ॥१॥ अग्नय इन्द्राग्निभ्यां वास्तोष्पतये प्रजापतयेऽनुमतय इति हुत्वा ॥२॥ निष्क्रम्य बहिः प्रचीनं ब्रह्मणे वैश्रवणाय विश्वेभ्यो देवेभ्यः सर्वेभ्यो देवेभ्यो विश्वेभ्यो भूतेभ्यः सर्वेभ्यो भूतेभ्य इति बहुशो बलिं हरेत् ॥३॥ द्विः प्रोक्षन्प्रदक्षिणमावृत्यान्तरुपातीत्य द्वारे ॥४॥ द्वार्ययोर्मृत्यवे धर्माधर्माभ्याम् ॥५॥ उदधाने धन्वन्तरये समुद्रायौषधिवनस्पतिभ्यो द्यावापृथिवीभ्या-

---

हाथ, न विना मंत्रजाने और न अपण्डित आहुतियाँ करे ॥ १७ ॥ देवगण विभत्सु, और शुचि की कामना वाले होते हैं इसलिये श्रद्धाहीन व्यक्ति की आहुति नहीं ग्रहण करते हैं । ब्राह्मण और ब्रह्म के जानने वाले से ही हवन करावे । स्त्री एवं शूद्र की दी आहुतियाँ देवताओं तक नहीं पहुँचतीं ॥१८॥ जो आज्यभागों को जानता है, यज्ञों को और मंत्रपरिक्रमों को एवं देवताज्ञान से आवृत्त हो और आशीर्वाद देना जानता हो ॥ इनके करने का अधिकार स्त्रियों को नहीं है ॥१९॥५॥७३॥ यह तिहत्तरवी कण्डिका समाप्त हुई ।

स्त्री पुरुष के बलि हरण को कहते हैं । गृही के घर जो कुछ अन्न दोनों समय खाने के लिये पकता है—उस अन्न से देवतादिकों के लिये उपहार दिया जाता है उसको बलि कहते हैं ॥ "अग्नय०" इत्यादि से आहुति देकर ॥२॥ घर से बाहर होकर, पूर्व दिशा में पूर्वमुख हो "ब्रह्मणे०" इत्यादि से बहुत बलि देवे ॥३॥ दो वार प्रदक्षिण घुम २ कर दोनों द्वार पर "धर्माधर्माभ्याम्" से बलियाँ देवे ॥४॥५॥ जलधरने के स्थान में "धन्वन्तरये०" इत्यादि से बलियाँ देवे ॥६॥ इसी प्रकार

मिति ॥६॥ स्थूणावंशयोर्दिग्भ्योऽन्तर्देशेभ्य इति ॥७॥ स्रक्तिषु वासुकये चित्रसेनाय चित्ररथाय तक्षोपतक्षाभ्यामिति ॥८॥ समन्तमग्नेराशायै श्रद्धायै मेधायै श्रियै ह्रियै विद्याया इति ॥९॥ प्राचीनमग्नेः गृह्याभ्यो देवजामिभ्य इति ॥१०॥ भूयोऽभ्युद्धृत्य ब्राह्मणान् भोजयेत् ॥११॥ तदपि श्लोको वदति ॥ मा ब्राह्मणाग्रतः कृतमश्नीयाद्विषवदन्नमन्नकाम्या । देवानां देवो ब्राह्मणो भावो नामैष देवतेति ॥१२॥ आग्रयणे शान्त्युदकं कृत्वा यथर्तु तण्डुलानुपसाद्य ॥१३॥ अप्सु स्थालीपाकं श्रपयित्वा पयसि वा ॥१४॥ सजूर्ऋतुभिः सजूर्विधाभिः सजूरग्नये स्वाहा। सजूरिन्द्राग्निभ्यां सजूर्द्यावापृथिवीभ्यां सजूर्विश्वेभ्यो देवेभ्यः सजूर्ऋतुभिः सजूर्विधाभिः सजूः सोमाय स्वाहेत्येकहविर्वा स्यान्नाना हवींषि वा ॥१५॥ सौम्यं तन्वच्छ्यामाकं शरदि ॥१६॥ अथ यजमानः प्राशित्रं गृह्णीते ॥१७॥ प्रजापतेष्ट्वा ग्रहं गृह्णामि । मह्यं भूत्यै मह्यं पुष्ट्यै

"स्थूणावंशयोर्दिग्भ्योऽन्तर्देशेभ्यः" । बलियाँ देवे ॥७॥ चार दिशाओं के कोणों में—"वासुकये०" इत्यादि से बलि देवे ॥८॥ और अग्नि के चारों ओर "श्रद्धायै" इत्यादि से बलि देवे ॥९॥ अग्नि के पूर्व भाग में "गृह्याभ्यो देवजामिभ्यः" से बलि देवे ॥१०॥ अधिक अन्न निकाल कर ब्राह्मणों को भोजन करावे ॥११॥ इसको भी श्लोक कहता है—ब्राह्मण के भोजन करने के पहिले गृही भोजन न करे क्योंकि वह अन्न विष के समान हो जाता है । देवताओं का देव ब्राह्मण हैं, यह भावमय देवता है ॥१२॥ अग्रहण मास में शान्त्युदक करके यथाऋतु तण्डुलों को लाकर जल या दूध में स्थालीपाक पकाकर "सजूर्ऋतुभिः" इत्यादि आहुतियाँ एक हवि की देवे या विभिन्न हवियों की हों ॥१५॥ शरद्ऋतु में सौम्य श्यामाक की आहुति ॥१६॥ अब यजमान प्राशित्र ग्रहण करे ॥१७॥ "प्रजापतेष्ट्वा०" इत्यादि मन्त्र से ग्रहण करे ॥१८॥ अब प्राशन करे

मह्यं श्रियै मह्यं ह्रियै मह्यं यशसे मह्यमायुषे मह्यमन्नाय मह्यमन्नाद्याय मह्यं सहस्रपोषाय मह्यमपरिमितपोषायेति ॥१८॥ अथ प्राश्नाति । भद्रान्नः श्रेयः समनैष्ट देवास्त्वयावसेन समशीमहि त्वा । स नः पितो मधुमाँ आविवेश शिवस्तोकाय तन्वो न एहीति ॥१९॥ प्राशितमनुमन्त्रयते । अमोऽसि प्राण तदृतं ब्रवीम्यमासि सर्वाङ्सि प्रविष्टः । स मे जरां रोगमपनुद्य शरीरादनामयैधि मा रिषाम इन्दो इति ॥२०॥ वत्सः प्रथमजो ग्रीष्मे वासः शरदि दक्षिणा ॥२१॥ शक्त्या वा दक्षिणां दद्यात् ॥२२॥ नातिशक्तिर्विधीयते नातिशक्तिर्विधीयत इति ॥२३॥ ॥६॥७४॥ इत्यथर्ववेदे कौशिकसूत्रे नवमोऽध्यायः समाप्तः ॥६॥

अथ विवाहः ॥१॥ ऊर्ध्वं कार्तिक्या आ वैशाख्याः ॥२॥ यथाकामी वा ॥३॥ चित्रापक्षं तु वर्जयेत् ॥४॥

"भद्रान्नः श्रेयः" इत्यादि से प्राशन करके अनुमंत्रण करे—"अमोऽसि प्राण०" इत्यादि ॥१६॥२०॥ ग्रीष्मऋतु में वत्स देवे और शरदृऋतु में दक्षिणा वस्त्र देवे ॥२१॥ या जैसी शक्ति हो वैसी दक्षिणा देवें ॥ २२ ॥ शक्ति के बाहर अधिक न देवे—॥२३॥६॥७४॥ यह चौहत्तरवि कण्डिका समाप्त हुई ॥

अथर्ववेद के कौशिक सूत्र के नवम अध्यायका भाषानुवाद पूरा हुआ ॥९॥

अब विवाह के विषय में उपदेश करेंगे । विवाह के लिये उपयुक्त सामग्रियां पहिले से एकत्र कर रक्खे । जैसे खिचड़ी, सम्पुट, पाकरवृक्ष की शाखा, कलश, सर्वौषधि, दही, जेठीमधु, विष्टर, अर्घपात्र, मधुपर्कपात्र, धूसर, पाळो, इत्यादि ॥१॥ कार्त्तिक मास से वैशाख मास तक विवाह करने का समय हो ॥ या जब चाहे तब विवाह करे ॥२॥३॥

मघासु हन्यन्ते गावः फल्गुनीषु व्युह्यत इति विज्ञायते मङ्गलश्च ॥५॥ सत्येनोत्तभिता पूर्वापरमित्युपदधीत ॥६॥ पतिवेदनं च ॥७॥ युवं भगमिति संभलं सानुचरं प्रहिणोति ॥८॥ ब्रह्मणस्पत इति ब्रह्माणम् ॥९॥ तद्विवृहाच्छङ्कमानो निशि कुमारीकुलाद्बलीकान्यादीप्य ॥१०॥ देवा अग्र इति पञ्चभिः सकृत्पूल्यान्यावापयति ॥११॥ अनृक्षरा इति कुमारीपालं प्रहिणोति ॥१२॥ उदाहारस्य प्रतिहितेषुरग्रतो जघनतो ब्रह्मा ॥१३॥ यो अनिध्म

चित्रानक्षत्र में विवाह न करे ॥४॥ आर्ष विवाह में कन्या वाले को एक या दो गौ, या एक बैल या दो बैल देना किन्हीं आचार्यों का मत है। सो आर्ष विवाह में कन्या वालों को देने केलिये यदि गो मिथुन किसी से उसके घर से पति के घर लाने के लिये कैसे ही लाने पड़ें तो मघा नक्षत्र में लेवे और आर्ष विवाह भी मघा नक्षत्र में करे और सेनाव्यूह के लिये और आर्ष विवाह की बहू को उसके घर से लाने के लिये, ३ पूर्वा फाल्गुनी और उत्तराफाल्गुनी नक्षत्र श्रेष्ठ हैं और मंगल भी है ॥५॥ "सत्येनोत्तभिता०" इत्यादि १६ मंत्र और "पूर्वापरं०" इत्यादि दो इन १८ मंत्रों से आज्य की आहुतियां देवे ॥६॥ "आनो अग्न" इत्यादि सूक्त से आगम कृशर दूसरे घर से तिल मिला हुआ लाकर धरे और उसे अभिमंत्रितकर कुमारी को उस भात को चखवावे ॥७॥ और "युवं भगं०" इत्यादि से शोभन अलंकृत पुरुषको संचर हस्त नौकर सहित को लावे ॥८॥ "ब्रह्मणस्पत०" इत्यादि से कुमारी के पास भेजकर वर के गुणों को कहवावे ॥९॥ यदि ब्रह्मा को रात्रि में शङ्का (भय) हो तो कुमारी के घर दीप जलाकर "देवा अग्र०" इत्यादि ५ मंत्रों से एकपूल्या की आहुति करे ॥१०॥११॥ "अनृक्षरा०" से कुमारी रक्षा के लिये भेजे। यदि वह १० वर्ष से अधिक उमर की हो तो "देवा अग्र०" इत्यादि ५ मंत्रों से कुमारी लाजा की एक आहुति देवे। कुमारी की रक्षा के लिये धनुर्धारी पुरुष को लावे। आगे २ धनुर्धर, पीछे २ आचार्य और बीच में जल लिया हुआ-उदक हार ॥१२॥१३॥ जल के पास जाकर "यो

इत्यप्सु लोगं प्रविध्यति ॥१४॥ इदमहमित्यपोह्य ॥१५॥ यो भद्र इत्यन्वीपमुदच्य ॥१६॥ आस्यै ब्राह्मणा इति प्रयच्छति ॥१७॥ आव्रजतामग्रतो ब्रह्मा जघनतोऽधिज्यधन्वा ॥१८॥ बाह्यतः प्लक्षोदुम्बरस्योत्तरतोऽग्नेः शाखायामासजति ॥१९॥ तेनोदकार्थान्कुर्वन्ति ॥२०॥ ततश्चान्वासेचनमन्येन ॥२१॥ अन्तरुपातीत्यार्यमणमिति जुहोति ॥२२॥ प्र त्वा मुञ्चामीति वेष्टं विचृतति ॥२३॥ उशतीरित्येतया त्रिराधापयति ॥२४॥ सप्तभिरुष्णाः सम्पातवतीः करोति ॥२५॥ यदासन्द्यामिति पूर्वयोरुत्तरस्यां स्रक्त्यां तिष्ठन्तीमाप्लावयति ॥२६॥ यच्च वर्चो यथा सिन्धुरित्युत्क्रान्तामन्येनावसिञ्चति ॥२७॥१॥७५॥

यद् दुष्कृतमिति वाससाङ्गानि प्रमृज्य कुमारीपालाय प्रयच्छति ॥१॥ तुम्बरदण्डेन प्रतिपाद्य निर्व्रजेत्

अनिश्म०" इत्यादि से जल में एक मट्टी का ढेला फेंके ॥१४॥ "इदमहं०" इत्यादि से नदी में बैठकर घट को जलसे भर लेवे ॥१५॥ "यो भद्र०" इत्यादि को पढ़ कर ॥१६॥ "आस्यै ब्राह्मणा०" इत्यादि से उदक हार को जलभरा कलश देवे ॥१७॥ मार्ग में जाते समय कुमारी के आगे ब्रह्मा, धनुर्धर पीछे ॥१८॥ घर में जाने पर वेदि के बाहर पाकर की शाखापर-अग्नि के उत्तर भाग में जलभरे कलश को स्थापन करे ॥१९॥ उसी से जल का काम करे ॥२०॥ यदि कलश में जल थोड़ा हो तो दूसरे जल से सेचन करे ॥२१॥ "अन्तरुपाती०" इत्यादि से वेदि में प्रवेश कर आहुति देवे ॥२२॥ "प्र त्वा मुञ्चामि०" इत्यादि से कुमारी के केशों को लपेट कर बांधे ॥२३॥ "उशतीः०" इत्यादिसे तीन समिधों को अग्नि में डाले ॥२४॥ "उशतीः०" इत्यादि ७ मंत्रों से उष्णजल के ढार से "यदासन्द्यां०" पूर्वोत्तर कोण में खड़ी कुमारी को शिर से स्नान करावे ॥२५॥२६॥ "यच्च वर्चो यथा०" से उस जगह से जाती हुई अन्य स्थान में ठण्ढे जल से उसे सिक्त करे ॥२७॥१॥७५॥ यह पचहत्तरवी कण्डिका पूरी हुई ॥

"यद् दुष्कृतं०" इत्यादि से वस्त्र से कुमारी को सब अङ्गों को पोंछे

॥२॥ तद्वन आसजति ॥ ३ ॥ या अकृन्तंस्त्वष्टा वास इत्यहतेनाच्छादयति ॥४॥ कृत्रिम इति शतदतैषीकेण कङ्कतेन सकृत्प्रलिख्य ॥५॥ कृतयाममिस्यवसृजति ॥६॥ आशासाना सं त्वा नह्यामीत्युभयतः पाशेन योक्त्रेन सन्नह्यति ॥७॥ इयं वीरुदिति मदुघमणिं लाक्षारक्तेन सूत्रेण विग्रथ्यानामिकायां बध्नाति ॥८॥ अन्ततो ह मणिर्भवति बाह्यो ग्रन्थिः ॥९॥ भगस्त्वेत इति हस्तेगृह्य निर्णयति ॥१०॥ शाखायां युगमाधाय दक्षिणतोऽन्यो धारयति ॥११॥ दक्षिणस्यां युगधुर्युत्तरस्मिन्युगतर्द्मनि दर्भेण विग्रथ्य शं त इति ललाटे हिरण्यं संस्तभ्य जपति ॥१२॥ तर्द्म समयावसिञ्चति ॥१३॥ उपगृह्योत्तरतोऽग्नेरङ्गादङ्गादिति निनयति ॥१४॥ स्योनमिति शकृत्पिण्डे

और तुम्बर दण्डके साथ वस्त्र को कुमारी के रक्षक को देकर चला जावे ॥१॥२॥ और कुमारी वन में जाकर उसे फेंक देवे ॥३॥ "या अकृन्तंस्त्वष्टा" मंत्र से अन्य नये अखण्ड वस्त्र को अभिमंत्रितकर यज्ञोपवीत की भांति बांह में बांध लेवे ॥४॥ "कृत्रिम०" इत्यादि से १०० दांतवाली कंघी से एक बार केशों को प्रलेखन करे ॥५॥ और "कृतयाम०" इत्यादि से अवसृजन करे॥६॥ "आशासाना०" इत्यादि से कमर इजरबन बांधे ॥७॥ "इयं वीरुद्" से मदुघ मणि को लाख के लाल रंग से सूत को रंग कर उससे मणि को गांथ कर अनामिका अङ्गुली में पुण्य दिन के अन्त में बांधे ॥८॥ गाँठ के अन्त में मणि हो एवं बाहर ग्रंथि हो ॥९॥ "भगस्त्वेत०" इत्यादि से कुमारी के दहिने हाथ को पकड़ कर कौतुक गृह से बाहर निकाले ॥१०॥ शाखा पर गाड़ी का जूआ धरकर दक्षिण से अन्य पुरुष जूआ को पकड़े रहे, दहिने जूआ के धुरी को उत्तर वाले जूआ के छेद में वह डाभ से गांथकर कुमारी के ललाट में सोना बांध कर "शं त०" मंत्र का जप करे और छिद्र में जल सींचे ॥११॥१२॥१३॥ और अग्नि के उत्तर भाग में जाकर, "अङ्गात्०" आदि मंत्र से जल को लावे ॥१४॥ और 'स्योनम्' इत्यादि मंत्र से गोबर के पिण्ड पर पत्थर

ऽश्मानं निदधाति ॥१५॥ तमातिष्ठेत्यास्थाप्य ॥१६॥ इयं नारीति ध्रुवां तिष्ठन्तीं पूल्यान्यावापयति ॥१७॥ त्रिरविच्छिन्दन्तीं चतुर्थीं कामाय ॥१८॥ येनाग्निरिति पाणिं ग्राहयति ॥१९॥ अर्यम्ण इत्यग्निं त्रिः परिणयति ॥२०॥ सप्त मर्यादा इत्युत्तरतोऽग्नेः सप्त लेखा लिखति प्राच्यः ॥२१॥ तासु पदान्युत्क्रामयति ॥२२॥ इषे त्वा सुमङ्गलि प्रजावति सुसीम इति प्रथमम् ॥२३॥ ऊर्जे त्वा रायस्पोषाय त्वा सौभाग्याय त्वा साम्राज्याय त्वा संपदे त्वा जीवातवे त्वा सुमङ्गलि प्रजावति सुसीम इति सप्तमं सखा सप्तपदी भवेति ॥२४॥ आरोह तल्पं भगस्ततक्षेति तल्प उपवेशयति ॥२५॥ उपविष्टायाः सुहृत्पादौ प्रक्षालयति ॥२६॥ प्रक्षाल्यमानावनु मन्त्रयते ॥ इमौ पादौ सुभगौ सुशेवौ सौभाग्याय कृणुतां नो अघाय। प्रक्षाल्यमानौ सुभगौ सुपत्न्याः प्रजां पशून्दीर्घमायुश्च धत्तामिति ॥२७॥ अहं विष्यामि प्र त्वा

को धरे॥ उस पर कुमारी को बिठलाकर "इयं नारी०" इत्यादि मंत्र से कुमारी से अग्नि में लावा और पुल्यों को डलवावे और "येनाग्नि०" मंत्र से वर कुमारी का पाणिग्रहण करे ॥१५॥१६॥१७॥१८॥ एवं "अर्यम्ण०" इत्यादि मंत्र से अग्नि की तीन वार परिक्रमा करे ॥ पुनः अग्नि के उत्तर भाग में पश्चिम को "सप्त मर्यादा०" इत्यादि मंत्र से वर सात रेखायें खींचे "उन पर कुमारी को सात पग इस भांति वर वाक्य पढता जावे और कुमारी पहिले दहिना पग आगे रखकर पीछे वाम पग रखती चले"—"इषे त्वा सुमङ्गलि प्रजावति सुसीम०" इससे पहिला पग और ऊर्जे त्वा०"इत्यादि से सप्तम पग धरवाता हुआ "सखा सप्तपदी भव०" अन्त में पढ़े॥ और तब वर कुमारी को "आरोह तल्पं०" इत्यादि मंत्र पढ़कर शय्या पर बिठलावे ॥१९॥२०॥२१॥२२॥२३॥२४॥२५॥ शय्या पर बैठी हुई कुमारी के पैरों को दासी स्त्री धोवे और "इमौ पादौ

मुञ्चामीति योक्त्रं विचृतति ॥२८॥ अपरस्मिन् भृत्याः संरभन्ते ॥२९॥ ये जयन्ति ते बलीयांस एव मन्यन्ते ॥३०॥ बृहस्पतिनेति सर्वसुरभिचूर्णान्यृचर्चा काम्पील-पलाशेन मूर्ध्न्यावपति ॥३१॥ उद्यच्छध्वं भगस्ततक्षा-भ्रातृघ्नीमित्येकैकयोस्थापयति ॥३२॥ प्रतितिष्ठेति प्रति-ष्ठापयति ॥३३॥२॥७६॥

सुकिंशुकं रुक्मप्रस्तरणमिति यानमारोहयति ॥१॥ एमं पन्थां ब्रह्मापरमित्यग्रतो ब्रह्मा प्रपद्यते ॥२॥ मा विदन्ननृक्षरा अध्वानमित्युक्तम् ॥३॥ येदं पूर्वेति तेना-न्यस्यामूढायां वाधूयस्य दशां चतुष्पथे दक्षिणैरभि-तिष्ठति ॥४॥ स चेदुभयोः शुभकामो भवति सूर्यायै देवे-भ्य इत्येतामृचं जपति ॥५॥ समृच्छत स्वपथोऽनवयन्तः सुसीमकामावुभे विराजावुभे सुप्रजसावित्यतिक्रम-

---

सुभगौ" इत्यादि मंत्र से वर अनुमंत्रण करे ॥ २६॥ २७ ॥ "अहं विष्यामि०" मंत्र से आचार्य कुमारी के कमर से योक्त्र को खोले और दूसरी ओर नौकर गण खोलने में रोके इसमें जो जीते वे ही बलवान माने जावे ॥२८॥२९॥३० "बृहस्पतिना" मंत्र से सब सुरभि चूर्णों को काम्पील के पत्ते से कुमारी के शिर पर डाले ॥३१॥ "उद्यच्छ-ध्वं भगस्ततक्षाभ्रातृघ्नी०" इत्यादि मंत्र पढ़२ कर एक २ को शिर पर से उठाता जावे और वर "प्रतितिष्ठ०" से शिर पर धरता जावे ॥३३॥२ ॥७६॥ यह छिहत्तरवी कण्डिका पूरी हुई ।

"सुकिंशुकं रुक्मप्रस्तरणं०" इत्यादि मंत्र से वर वधू को सवारी पर सवार करावे ॥१॥ मार्ग में वर वधू के साथ आगे आगे पुरोहित जावे ॥२॥ मार्ग में चलते समय "माविदन्ननृक्षरा०" इत्यादि दो मंत्रों को पढ़ कर दाहिना पैर पहिले उठाकर चले ॥३॥ यदि मार्ग में चौराहे पर दूसरे की ब्याही हुई कुमारी और वर के कपड़े का किनारा चौराहे से दक्षिण भाग में पड़ा हो तो दोनों की भलाई समझ कर "सूर्यायै-देवेभ्य०" इत्यादि मंत्र जप करे ॥४॥५॥ और "समृच्छत स्वपथो०"

यतोऽन्तरा ब्रह्माणम् ॥६॥ य ऋते चिदभिश्रिष इति यानं संप्रोक्ष्य विनिष्कारयति ॥७॥ सा मन्दसानेति तीर्थे लोगं प्रविध्यति ॥८॥ इदं सु म इति महावृक्षेषु जपति ॥९॥ सुमङ्गलीरिति वध्वीक्षीः प्रति जपति ॥१०॥ या ओषधय इति मन्त्रोक्तेषु॥११॥ ये पितर इति श्मशानेषु ॥१२॥ प्र बुध्यस्वेति सुप्तां प्रबोधयेत्॥१३॥ संकाशयामीति गृहसंकाशे जपति ॥१४॥ उद्व ऊर्मिरिति यानं सम्प्रोक्ष्य विमोचयति ॥१५॥ उत्तिष्ठेत इति पत्नी शालां सम्प्रोक्षति ॥१६॥ स्योनमिति दक्षिणतो वलीकानां शकृत्पिण्डेऽश्मानं निदधाति ॥१७॥ तस्योपरि मध्यमपलाशे सर्पिषि चत्वारि दूर्वाग्राणि ॥१८॥ तमातिष्ठेत्यास्थाप्य ॥१९॥ सुमङ्गली प्रतरणीह प्रियं मा हिंसिष्टं ब्रह्मापरमिति प्रत्यृचं प्रपादयति ॥२०॥ सुहृत्पूर्णकंसेन

इत्यादि मंत्र से ब्राह्मण को, "य ऋतेचिदभिश्रिष०" मंत्र से सवारी को जल से भलीभांति प्रोक्षण कर साफ कर देवे ॥६॥७॥ और रास्ते में यदि तीर्थ मिले तो वहाँ "सा मन्दसान०" को पढ़ कर मट्टी का ढेला फेक देवे ॥८॥ वृक्षों को देखने पर "इदं सु म०" का जप करे ॥९॥ 'सुमङ्गलीः' को वधू को देखने वाली स्त्री को देखने पर जप करे ॥१०॥ "या ओषधय०" का जप करे- जहाँ तहाँ ॥११॥ मरघट मिलने पर "ये पितर०" इत्यादि का जप करे ॥१२॥ "प्रबुध्यस्व०" पढकर सोती हुई वधू को जगावे ॥१३॥ संकाशयामि०" का जप जब वर के घर पास आ जावे तब करे ॥१४॥ "उद्व ऊर्मिः०" इत्यादि को पढ़कर सवारी को जल से धोकर उसमें दुलहिन उतार लेवे ॥१५॥ "उत्तिष्ठेत०" मंत्र को वर पढ़े एवं पत्नी शाला को प्रोक्षण करे ॥१६॥ और दक्षिणभाग में बैल के गोबर के पिण्ड पर "स्योनं०" मंत्र से पत्थर को धर उसपर कर मध्यम पलाश के काठ में घृत धर और "तमातिष्ठ०" मंत्र से दूर्वा के अग्रभागों धरकर "सुमङ्गली०" इत्यादि ऋचाओं में से प्रत्येक ऋ० से ब्रह्मा वधू को एक पग चलवावे और उसे कोई सुहृत कांसे के पात्र से अग्नि की चारों ओर

प्रतिपादयति ॥२१॥ अघोरचक्षुरित्यग्निं त्रिः परिणयति ॥२२॥ यदा गार्हपत्यं सूर्यायै देवेभ्य इति मन्त्रोक्तेभ्यो नमस्कुर्वतीमनुमन्त्रयते ॥२३॥३॥७७॥

शर्म वर्मेति रोहितचर्माहरन्तम् ॥१॥ चर्म चोपस्तृणीथनेत्युपस्तृणन्तम् ॥२॥ यं बल्बजमिति बल्बजं न्यस्यन्तम् ॥३॥ उप स्तृणीहीत्युपस्तृणन्तम् ॥४॥ तदा रोहत्विस्यारोहयति ॥५॥ तत्रोपविश्येत्युपवेशयति ॥६॥ दक्षिणोत्तरमुपस्थं कुरुते ॥७॥ सुज्यैष्ठ्य इति कल्याणनामानं ब्राह्मणायनमुपस्थ उपवेशयति ॥ ८ ॥ वितिष्ठन्तामिति प्रमदनं प्रमायोत्थापयति ॥९॥ तेन भूतेन तुभ्यमग्रे शुम्भनी अग्निर्जनविन्मह्यं जायामिमामदात्सोमो वसुविन्मह्यं जायामिमामदात्पूषा जातिविन्मह्यं जायामिमामदादिन्द्रः सहीयान्मह्यं जायामिमामदादग्नये जनविदे स्वाहा सोमाय वसुविदे स्वाहा पूष्णे जातिविदे स्वाहेन्द्राय सहीयसे स्वाहेत्यागच्छतः ॥१०॥ सविता प्रसवानामि-

"अघोरचक्षुः०" से तीन वार परिक्रमण करावे ॥१७—२२॥ और घर के कुल देवता को बहू नमस्कार करती समय कर्त्ता "यदा गार्हपत्यं०" इत्यादि मं० से अनुमंत्रण करे ॥२३॥३॥७७॥ यह सतहत्तरवी कण्डिका पूरी हुई ।

"शर्मवर्म०" इत्यादि मंत्र से लाल बैल के चर्म को लाते हुए पढ़े, "चर्म चोपस्तृणीथन०" इत्यादि मंत्र से चर्म बिछाते समय पढ़े । और तृणों को लाते समय "यं बल्वजं०" इत्यादि पढ़े । जमीन पर प्रथम तृणों को बिछाकर उस पर चर्म को बिछावे । "आरोहतु" कह कर उसपर आरोहण कराकर "तत्रोपविश०" से उसपर उसे बिठलावे और कल्याण-वाचक नाम वाले ब्राह्मणायन के उत्तर मुख गोद में "सुज्यैष्ठ्य०" मंत्र से वर-वधू को बिठाकर "वितिष्ठन्ताम्०" से कुमार के लिये फल, मोदकादि देकर तब उसे उठावे ॥१—९॥ "तेन भूतेन०" इत्यादि मंत्रों से वर वधू के आते समय आहुतियां देवे । एवं "सविता

ति मूर्ध्नोः संपातानानयति ॥११॥ उदपात्र उत्तरान् ॥१२॥ शुम्भन्याञ्जल्योर्निनयति ॥१३॥ तेन भूतेनेति समशनम् ॥१४॥ रसानाशयति स्थालीपाकं च ॥१५॥ यवानामाज्यमिश्राणां पूर्णाञ्जलिं जुहोति ॥१६॥४॥७८॥

सप्त मर्यादा इति तिसृणां प्रातरावपते ॥१॥ अक्ष्यौ नाविति समाञ्जाते ॥२॥ महीमू ष्विति तल्पमालम्भयति ॥३॥ आरोह तल्पमित्यारोहयति ॥४॥ तत्रोपविश्येत्युपवेशयति ॥५॥ देवा अग्र इति संवेशयति ॥६॥ अभित्वेत्यभिच्छादयति ॥७॥ सं पितराविति समावेशयति ॥८॥ इहेमाविति त्रिः सन्नुदति ॥९॥ मदुघमणिमौक्षेऽपनीयेयं वीरुदमोऽहमिति संस्पृशतः ॥१०॥ ब्रह्म-

---

प्रसवानां०" इत्यादि से दोनों के शिरों पर आहुतियों का ढार देवे ॥१०॥११॥ "तेन भूतेन०" से रसों और स्थाली पाक का दोनों को भोजन करावे ॥१२॥१३॥१४॥१५॥ और आठ ऋ० वाले कल्पजसूक्त, एवं "आगच्छत०" इत्यादि ३ ऋ० वाले सूक्त और "सविता प्रसवानां०" सूक्त–इन सूक्तों से यव मिले आज्य की अञ्जुलियों से वर वधू हवन करें और सम्पातों को वर वधू के शिर पर डालते जावें ॥१६॥४॥७८॥ यह अठहत्तरवी कण्डिका पूरी हुई ।

"सप्त मर्य्यादा०" इत्यादि ऋ० से प्रातःकाल आहुति करें । "अक्ष्यौ नौ०" से दोनों परस्पर एक दूसरे को कज्जल से नेत्रों में अञ्जन करें ॥१॥२॥ और "महीमूषु०" से शय्या को स्पर्श करें । "आरोह तल्प०" कहने पर शय्यापर चढ़ावें "तत्रोपविशेत्" कहने पर–उन्हें बिठलावे और "देवा अग्रे०" पढ़कर दोनों को शय्या पर संवेशन करावे ॥६॥ "अभित्वामनुजातेन०" से दोनों को वस्त्र ओढ़ा देवे ॥७॥ "संपितरौ०" इत्यादि ४ ऋचाओं से दोनों को एक दूसरे के मुख सम्मुख करे ॥८॥ "इहेमौ०" से एक दूसरे के कण्ठ को ग्रहण करे ॥९॥ मदुघ-मणि को सुगन्ध में डालकर पीसकर उबटन बनाकर "इयं वीरुत्०" इस सूक्त से दोनों को उबटन लगावे ॥ "अमोऽहं०" इस दो ऋचा से अक्षत पढ़कर

जज्ञानमित्यङ्गुष्ठेन ऽयचस्करोति ॥११॥ स्योनाद्योनेरित्यु-त्थापयति॥१२॥परिधापनीयाभ्यामहतेनाच्छादयति॥१३॥ बृहस्पतिरिति शष्पेणाभिघार्य व्रीहियवाभ्यामभिनि-धाय दर्भपिञ्जूल्या सीमन्तं विचृतति ॥१४॥ शणशक-लेन परिवेष्ट्य तिस्रो रात्रीः प्रति सुप्तास्ते ॥१५॥ अनु-वाकाभ्यामन्वारब्धाभ्यामुपदधीत ॥१६॥ इहेदसाथेत्येत-या शुल्कमपाकृत्य ॥१७॥ द्वाभ्यां निवर्तयतीह मम राध्य-तामत्र तवेति ॥१८॥ यथा वा मन्यन्ते ॥१९॥ परा देही-ति वाधूयं ददतमनुमन्त्रयते ॥२०॥ देवैर्दत्तमिति प्रति-गृह्णाति ॥२१॥ अपास्मत्तम इति स्थाणावासजति ॥२२॥

एक दूसरे को कण्ठ ग्रहण करे और "ब्रह्म जज्ञानं०" से वर वधू के नाभि प्रदेश को (जननेन्द्रिय को) स्पर्श करे ॥१०॥११॥ "स्योनाद्योनेः०" से दोनों को उठावे ॥१२॥ "या अकृन्तनत्वष्टा वासो०" इत्यादि दो ऋ० से दोनों के अखण्ड नये वस्त्रों को ओढ़ा देवे ॥ "बृहस्पति०" इत्यादि मंत्र से शष्प द्वारा अभिघारण कर व्रीहि और यवों का दर्भ पिञ्जुलि से वधू के मांग को (सीमन्त) केशों को शिर के बीचो बीच दोनों ओर फाड़कर सज देवे ॥१३॥१४॥ शण के टुकड़े से वधू के जूड़े को लपेट कर बान्ध देवे और तीन रात्रि दोनों साथ सोवें ॥१५॥ सब कर्म-काण्डों में आज्य की आहुति होती है। परन्तु तन्त्र की विधि है "आज्य, समिध, पुरोडाश, व्रीहि, यव, तिल आदि में से किसी एक से आहुति देवे। अतएव आज्य आदि १३ हविष्य वस्तुओं में से-किसी एक की "सत्येनोत्तभित०" इन दो अनुवाकों से आहुतियाँ देवे ॥१६॥ यदि चतुर्थी कर्म के भीतर वधू रजस्वला हो जावे तो उसका प्रायश्चित करे ॥ "इहे-दसाथ०" ऋचा से वर वधू को अलग २ दहेज देवे ॥१७॥ "द्वाभ्यां निवर्तयतीह०" इत्यादि वर पढ़े ॥१८॥ या जैसा चाहें वैसा करें ॥१९॥ "परादेहि०" से बहू को पहनने को वस्त्र देते समय अनुमंत्रण करे। और "देवैर्दत्तं०" से वस्त्र को ग्रहण करे ॥२०॥२१॥ "अपास्मत्तम०" से वस्त्र को वर वधू के शरीरों पर डाल देवे ॥२२॥ "यावतीः कृत्या०"

यावतीः कृत्या इति व्रजेत् ॥२३॥ या मे प्रियतमेति वृक्षं प्रतिच्छादयति ॥२४॥ शुम्भन्याप्लुत्य ॥२५॥ ये अन्ता इत्याच्छादयति ॥२६॥ नवं वसान इत्याव्रजति ॥२७॥ पूर्वापरं यत्र नाधिगच्छेद्ब्रह्मापरमिति कुर्यात् ॥२८॥ गौर्दक्षिणा प्रतीवाहः ॥२९॥ जीवं रुदन्ति यदीमे केशिन इति जुहोति ॥३०॥ एष सौर्यो विवाहः ॥३१॥ ब्रह्मापरमिति ब्राह्मयः ॥३२॥ आवृतः प्राजापत्याः प्राजापत्याः ॥३३॥५॥७६॥ इत्यथर्ववेदे कौशिकसूत्रे दशमोऽध्यायः समाप्तः ॥१०॥

अथ पितृमेधं व्याख्यास्यामः ॥१॥ दहननिधानदेशे-परिवृक्षाणि निधानकाल इति ब्राह्मणोक्तम् ॥२॥ दुर्बली-

---

से वस्त्रों को लेकर चले ॥२३॥ "या मे प्रियतम०" से वस्त्र से वृक्ष को ढाके, "नवं वसान०" पढ़कर आवें, यदि पुरोहित विवाह कर्म कराने में पूर्वापर कर्म का अनुक्रम न जाने तो "ब्रह्मापरं०" इत्यादि ऋ० से कर्म करावे और अभ्यातानादि उत्तर तंत्र, हस्तहोम, मंत्रों का विकल्प और यदि पूर्वस्थण्डिल में अग्नि करे तो उत्तर तंत्र करना चाहिये और "कामस्तदग्र०" इत्यादि काम सूक्त का जप करे ॥२४—२८॥ कर्त्ता (पुरोहित) को गौदक्षिणा देवे ॥२९॥ यदि वधू पिता घर पर रोवे तो "जीवं रुदन्ति०" इत्यादि से आहुतियाँ देवे ॥३०॥ यह "सौर्यविवाह" कहलाता है ॥३१॥ "ब्रह्मापरं०" इत्यादि से जो विवाह होता है वह "ब्राह्मय" विवाह कहलाता है ॥३२॥ विना मंत्र के जो विवाह होता है वह प्राजापत्यविवाह होता है या शूद्र का विवाह है ॥३३॥५॥७६॥ इय उन्यासीवी कण्डिका समाप्त हुई ।

यह अथर्ववेद के कौशिक सूत्र का दशम अध्याय समाप्त हुआ ॥१०॥

अब अन्त्येष्टि कर्म्म को कहेंगे । वृक्ष रहित प्रदेश में दहन स्थान बनावे—ऐसा ब्राह्मण ग्रन्थ में लिखा है ॥१॥२॥ जब पित आदि दुर्बल

भवन्तं शालातृणेषु दर्भानास्तीर्य स्योनास्मै भवेत्यवरोहयति ॥३॥ मन्त्रोक्तावनुमन्त्रयते ॥४॥ यत्ते कृष्ण इत्यवदीपयति ॥५॥ आहिताग्नौ प्रेते सम्भारान् सम्भरति ॥६॥ आज्यं च पृषदाज्यं चाजं च गां च ॥७॥ वसनं पञ्चमम् ॥८॥ हिरण्यं षष्ठम् ॥९॥ शरीरं नान्वालभते ॥१०॥ अन्यं चेष्टन्तमनुमन्त्रयते ॥११॥ शान्त्युदकं करोत्यसकलं चातनानां चान्वावपते ॥१२॥ शान्त्युदकोदकेन केशश्मश्रुरोमनखानि संहारयन्ति ॥१३॥ आप्लावयन्ति ॥१४॥ अनुलिम्पन्ति ॥१५॥ स्रजोऽभिहरन्ति ॥१६॥ एवं स्नातमलंकृतमहतेनावाग्दशेन वसनेन प्रच्छादयत्येतत्ते देव एत-

---

अर्थात् मृत्यु को प्राप्त हो जावें या मरणापन्न हो जावें (यह संस्कार आहिताग्नि और एकाग्नि का है) तो अग्निशाला या आवसथ्यशाला में शाला तृणों को बिछाकर उस पर दर्भ तृणों को डालकर "स्योनास्मै भव०" इत्यादि से मृत वा मरणापन्न को उस बिछाये तृणों पर अवरोहण करावे ॥३॥४॥ "यत्ते कृष्ण०" से दीप जला देवे ॥५॥ यदि काक, पिपीलिका, सर्प, व्याघ्र, सींग वाले जन्तु, श्वापद, आदि जन्तुओं के सींग, नख, दन्त आदि के काटने से मनुष्य का मृत्यु होवे, तो उसका प्रायश्चित्त इस प्रकार होगा "यत्ते कृष्णः शकुनि०" इत्यादि ३ ऋचा से अग्नि को अभिमंत्रित कर दंशित-व्रण को उससे जला देवे ॥६॥ आहिताग्नि के मरने पर वक्ष्यमाण सामग्रियों को एकत्र कर रक्खे ॥६॥ शुद्ध अग्नि, दर्भ, तिल, घृत, हिरण्य शकल, चन्दनकाठ, गोपीचन्दन, तुलसी, पिष्ट, ताम्रपात्र, गोबर, कुदार, अखण्ड नयावस्त्र, सूत ॥७॥८॥९॥ सात कुलों के भीतर के व्यक्तियों को अन्य लोग बिना शुद्ध हुए नहीं स्पर्श करते हैं ॥१०॥ चेष्टा करते हुए अन्य व्यक्ति को अनुमंत्रण करे ॥११॥ कर्त्ता सकल प्रतीकत्रय से और ओषधित्रय से मातृ नाम प्रतीकत्रय को शान्त्युदक में आवपन करे ॥१२॥ शान्ति जल से, शिरके केश, दाढ़ी, मूँछ, लोम और नखों को कटवावे ॥१३॥ और प्रेत शरीर को जलाशय में डुबाकर स्नान करावें ॥१४॥ श्मशान भूमि को लीपे और स्रज से अग्नि को लावे ॥१४॥१५॥१६॥ इस भाँति नहवा धोलाकर के अखण्ड

त्वा वासः प्रथमं न्वागन्निति ॥१७॥ अपेममित्यग्निषु जुहोति ॥१८॥ उखाः कुर्वन्ति ॥१९॥ ताः शकृदाभ्यन्तरं लिम्पन्ति शुष्केण वा पूरयन्ति ॥२०॥ ताः पृथगग्निभिः संतापयन्त्या शकृदादीपनात् ॥२१॥ तेषां हरणानुपूर्वमाहवनीयं प्रथमं ततो दक्षिणाग्निं ततो गार्हपत्यम् ॥ ॥२२॥ अथ विदेशे प्रेतस्या रोहत जनित्रीं जातवेदस इति पृथगरणीष्वग्नीन्समारोपयन्ति ॥२३॥ तेषु यथोक्तं करोति ॥२४॥ अपि वान्यवत्साया वा संधिनीक्षीरेणैकशलाकेन वा मन्थेनाग्निहोत्रं जुहोत्या दहनात् ॥२५॥ दर्शपूर्णमासयोः कृष्णकतण्डुलानां तस्या आज्येन नान्तं न बर्हिः ॥२६॥ पलालानि बर्हिः ॥२७॥ तिलिपञ्ज्या इध्माः ॥२८॥ ग्रहानाज्यभागौ पुरस्ताद्धोमसंस्थितहोमानुद्धृत्य ॥२९॥ प्राणापानावरुद्ध्यै निधनाभिर्जुहुयात् ॥३०॥ अथो-

---

चीरे द्वार नये वस्त्र से "एतत्ते देव०" मंत्र से प्रेत को ढाक देवे ॥१७॥ "अपेमं०" मंत्र से अग्नि में आहुतियाँ देवे ॥१८॥ और "उखायें" तय्यार करे ॥१९॥ उखाओं को गोबर से लीप देवे या सूखे गोबर से उनको भर देवे ॥२०॥ उनमें एकही बार में अग्नि डाल कर सूखे गोबर को जलावे ॥२१॥ उनका हरणानुक्रम से आहवनीय अग्नि को पहिले। तब दक्षिणाग्नि को और अन्त में गार्हपत्याग्नि को ॥२२॥ यदि देशान्तर में मृत्यु हो तो आहिताग्नि का कर्म इस भाँति करे। "प्रेतस्यारोहत०" मंत्र से अरणी द्वारा अग्नि उत्पन्न कर उनमें यथोक्त प्रकार से कर्म करे ॥२३॥२४॥ अथवा अन्य वत्सा को गौ के पास धरकर जो दूध दूहा जाता—ऐसी गौ के दूध से एक शला का द्वारा या मन्थ से अग्निहोत्र की आहुति करे जब तक प्रेत का दाह होता रहे ॥२५॥ दर्शपूर्णमास में काले चावलों की उक्त गौ के दूध से न अन्त में न बाहर आहुति करे ॥२६॥ पलालों से बर्हि होम करे ॥२७॥ तिल के डांठ का इध्म करे ॥२८॥ ग्रह होम, आज्यभाग के होम, पुरस्तात् होम, संस्थित होमों को निकाल कर, प्राण, अपान वायु को रोककर निधनाग्नि से आहुति करे ॥२९॥३०॥

भयोरुत्तिष्ठेत्युत्थापयति ॥३१॥ प्रच्यवस्वेति त्रिः संहापयति यावत्कृत्वश्चोत्थापयति ॥३२॥ एवमेव कूदीं जघने निबध्य ॥३३॥ इमौ युनज्मीति गावौ युनक्ति पुरुषौ वा ॥३४॥ उत्तिष्ठ प्रेहि प्रच्यवस्वोदन्वतीत एतेऽग्नीषोमेदं पूर्वमिति हरिणीभिर्हरेयुरति द्रवेत्यष्टभिः ॥३५॥ इदं त इत्यग्निमग्रतः ॥३६॥ प्रजानत्यघ्न्य इति जघन्यं गामेधमग्निं परिणीय ॥३७॥ स्योनास्मै भवेत्युत्तरतोऽग्नेः शरीरं निदधाति ॥३८॥ अध्वर्यव इष्टिं निर्वपन्ति ॥३९॥ तस्यां यथादेवतं पुरस्ताद्धोमसंस्थितहोमानुद्धृत्य ॥४०॥ प्राणापानावरुद्ध्यै निधनाभिर्जुहुयात् ॥४१॥ अथोभयोरपेत ददामीति शान्त्युदकं कृत्वा सम्प्रोक्षणीभ्यां काम्पीलशाखया दहनं सम्प्रोक्ष्य ॥४२॥ उदीरतामित्युद्धृत्याभ्युक्ष्य लक्षणं कृत्वा पुनरभ्युक्ष्य प्राग्दक्षिणमेधश्चिन्वन्ति ॥४३॥ इयं नारीति पत्नीमुपसंवेशयति ॥४४॥ उदीर्ष्वेत्यु-

अथ यत्रैतानि वर्षाणि वर्षन्ति घृतं मांसं मधु च यद्धिरण्यं यानि चाप्यन्यानि घोराणि वर्षाणि वर्षन्ति तत्पराभवति कुलं वा ग्रामो वा जनपदो वा ॥१॥ तत्र राजा भूमिपतिर्विद्वांसं ब्रह्माणमिच्छेत् ॥२। एष ह वै विद्वान्यद्भृग्वङ्गिरोवित् ॥३॥ एते ह वा अस्य सर्वस्य शमयितारः पालयितारो यद्भृग्वङ्गिरसः ॥४॥ स आहोपकल्पयध्वमिति ॥५॥ तदुपकल्पयन्ते कंसमहते वसने शुद्धमाज्यं शान्ता ओषधीर्नवमुदकुम्भम् ॥६॥ त्रीणि पर्वाणि कर्मणः पौर्णमास्यमावास्ये पुण्यं नक्षत्रम् ॥७॥ अपि चेदेव यदा कदाचिदार्ताय कुर्यात् ॥८॥ स्नातोऽहतवसनः सुरभिर्व्रतवान् कर्मण्य उपवसत्येकरात्रं त्रिरात्रं षड्रात्रं द्वादशरात्रं वा ॥९॥ द्वादश्याः प्रातर्यत्रैवादः पतितं भवति तत

में शब्द हो, कुम्भ के रखने सक्तुधानी या उखा या अनिङ्गिता विकसित हो, ये अद्भुत् कार्य्य हैं ॥४३॥१॥९३॥ यह तिरानबेवीं कण्डिका खतम हुई ॥

जहाँ वर्षा में ये पदार्थ वर्षें घृत, मांस, मधु, सोना, और भी जो घोर वस्तुओं की वृष्टि हो वहाँ अत्यन्त दुःख होता है, चाहे कुल, ग्राम, जनपद क्यों न हो सबको कष्ट होता है ॥१॥ ऐसे स्थान में, राजा, भूमिपति विद्वान् ब्राह्मण की इच्छा करे ॥२॥ विद्वान् वही है जो भृगु-आङ्गिरस विद्या को जानने वाला हो ॥ ३ ॥ इन सारे अद्भुत् कार्य्यों की शान्ति करने एवं लोगों को बचाने वाले आङ्गिरस विद्या के विद्वान् ही हैं ॥४॥ राजा ने कहा इसकी तय्यारी करो ॥ ५ ॥ उसकी तय्यारी में कटोरा, अखण्ड नये वस्त्र, शुद्ध घृत, शान्ता ओषधी, नया जलकलश ॥६॥ इसके करने के तीन समय हैं । पौर्णमासी, अमावास्या और शुभ नक्षत्र ॥७॥ या आतुरता वश जब कभी चाहे तब ही करे ॥८॥ स्नान कर नये अखण्ड वस्त्र पहन कर सुगन्धित पदार्थों का सेवन, व्रतवान्, कर्मण्य, उपवास रहे एक रात्रि, ३ रात्रि, छः रात्रि, या १२ रात्रि ॥९॥ द्वादशी के प्रातःकाल जहाँ ही वह पड़े वहीं उत्तर अग्नि का आधान करके ॥१०॥

उत्तरमग्निमुपसमाधाय ॥१०॥ परिसमुह्य पर्युक्ष्य परि-स्तीर्य बर्हिरुदपात्रमुपसाद्य परिचरणेनाज्यं परिचर्य ॥११॥ निस्यान्पुरस्ताद्धोमान् हुत्वाज्यभागौ च ॥१२॥ अथ जुहोति ॥१३॥ घृतस्य धारा इह या वर्षन्ति पक्वं मांसं मधु च यद्धिरण्यम् ॥ द्विषन्तमेता अनुयन्तु वृष्ट-योऽपां वृष्टयो बहुलाः सन्तु मह्यम् ॥ लोहितवर्षं मधु-पांसुवर्षं यद्वा वर्षं घोरमनिष्टमन्यत् ॥ द्विषन्तमेते अनुयन्तु सर्वे पराञ्चो यन्तु निवर्तमानाः ॥ अग्नये स्वाहेति हुत्वा ॥१४॥ दिव्यो गन्धर्व इति मातृनामभि-र्जुहुयात् ॥१५॥ वरमनड्वाहं ब्राह्मणः कर्त्रे दद्यात् ॥१६॥ सीरं वैश्योऽश्वं प्रादेशिको ग्रामवरं राजा ॥१७॥ सा तत्र प्रायश्चित्तिः ॥१८॥२॥९४॥

अथ यत्रैतानि यक्षाणि दृश्यन्ते तद्यथैतन्मर्कटः श्वापदो वायसः पुरुषरूपमिति तदेवमाशङ्क्यमेव भव-ति ॥१॥ तत्र जुहुयात् ॥२॥ यन्मर्कटः श्वापदो वायसो यदीदं राष्ट्रं जातवेदः पताति पुरुषरक्षसमिषिरं यत्प-

---

परिसमूहन, पर्युक्षण, परिस्तरण करके बर्हिः, एवं जलपात्र को लाकर परिचरण द्वारा आज्य की परिचर्या करके ॥११॥ नित्य पुरस्तात् होमों को करके और आज्यभाग की दो आहुतियाँ करके ॥१२॥ अब हवन करे "घृतस्य धारा इह०" इत्यादि से अग्नये स्वाहा से आहुति करके ॥१३॥१४॥ "दिव्यो गन्धर्व०" से मातृनामों से आहुतियाँ देवे । ब्राह्मण को दक्षिणा में बैल देवे ॥१५॥१६॥ वैश्य दक्षिणा में सीर देवे और प्रादेशिक हो तो दक्षिणा में घोड़ा देवे । एवं राजा अच्छा ग्राम दक्षिणा में देवे ॥१७॥ यही उसकी प्रायश्चित्ति है ॥१८॥२॥९४॥ यह चौरानबेवी कण्डिका खतम हुई ॥

जहाँ यक्षों को देखे—जैसे कि मर्कट, श्वापद, वायस, पुरुष रूप तब ही आशङ्का होती है ॥१॥ तब वहाँ आहुति करे ॥२॥ "यन्मर्कटः

तातिं । द्विषन्तमेते अनुयन्तु सर्वे पराञ्चो यन्तु निवर्तमानाः ॥ अग्नये स्वाहेति हुत्वा ॥३॥ दिव्यो गन्धर्व इति मातृनामभिर्जुहुयात् ॥४॥ सा तत्र प्रायश्चित्तिः ॥५॥३॥९५॥

अथ ह गोमायू नाम मण्डूकौ यत्र वदतस्तद्यन्मन्यन्ते मां प्रति वदतो मां प्रति वदत इति तदेवमाशङ्क्यमेव भवति ॥१॥ तत्र जुहुयात् ॥२॥ यद्द् गोमायू वदतो जातवेदोऽन्यया वाचाभि जज्ञ्भातः ॥ रथन्तरं बृहच्च सामैतद्द्विषन्तमेतावभि नानदैताम् ॥ रथन्तरेण त्वा बृहच्छमयामि बृहता त्वा रथन्तरं शमयामि ॥ इन्द्राग्नी त्वा ब्रह्मणा वावृधानावायुष्मन्तावुत्तमं त्वा कराथः ॥ इन्द्राग्निभ्यां स्वाहेति हुत्वा ॥३॥ दिव्यो गन्धर्व इति मातृनामभिर्जुहुयात् ॥४॥ सा तत्र प्रायश्चित्तिः ॥५॥४॥९६॥

अथ यत्रैतत्कुलं कलहि भवति तन्निर्ऋतिगृहीतमित्याचक्षते ॥१॥ तत्र जुहुयात् ॥२॥ आरादरातिमिति द्वे ॥३॥ अयाश्चाग्नेऽस्यनभिशस्तिश्च सत्यमित्त्वमया असि ।

श्वापदो वायसो यदीदं राष्ट्रं जातवेदः पताति०" इत्यादि आहुति देवे ॥ ॥ ३ ॥ "दिव्यो गन्धर्वः" और मातृनामों से आहुति देवे, यही उसकी प्रायश्चित्ति है ॥ ५ ॥ ३ ॥ ९५ ॥ यह पंचानवेवी कण्डिका खतम हुई ।

अब गोमायू नाम दो मण्डूक जहाँ बोलते हैं, उसे वह समझते हैं कि मेरे प्रति बोलते हैं, मेरे प्रति बोलते हैं—यही सन्देह का स्थल है ॥ ॥ १ ॥ वहां आहुति देवे ॥ २ ॥ "यद्द् गोमायू वदतो०" इत्यादि से आहुतियां देकर ॥ ३ ॥ "दिव्यो गन्धर्वः" से एवं मातृनामों से आहुति देवे ॥ ४ ॥ यही उसकी प्रायश्चित्ति है ॥ ५ ॥ ४ ॥ ९६ ॥ यह छानवेवी कण्डिका खतम हुई ।

अब—जिस कुल में नित्य कलह हुआ करता है, उस कुल को निर्ऋति ने पकड़ा है जानो ॥ १ ॥ वहां आहुति देवे ॥ २ ॥ "आराद्रातिं०" से दो आहुतियां देवे ॥ ३ ॥ "अयाश्चाग्नेऽस्यनभिशस्तिश्च०"

अयासा मनसा कृतोऽयास्यं हव्यमूहिषे ॥ अयानो धेहि भेषजम् ॥ स्वाहेत्यग्नौ जुहुयात् ॥४॥ तत्रैवैतान् होमाञ्जुहुयात् ॥५॥ आरादग्निं क्रव्यादं निरूहज्जीवातवे ते परिधिं दधामि । इन्द्राग्नी त्वा ब्रह्मणा वावृधानावायुष्मन्तावुत्तमं त्वा कराथः ॥ इन्द्राग्निभ्यां स्वाहेति हुत्वा ॥ ६ ॥ अपेत एतु निर्ऋतिरित्येतेन सूक्तेन जुहुयात् ॥७॥ अपेत एतु निर्ऋतिर्नेहास्या अपि किञ्चन । अपास्याः सत्वनः पाशान्मृत्यूनेकशतं नुदे ॥ ये ते पाशा एकशतं मृत्यो मर्त्याय हन्तवे । तांस्ते यज्ञस्य मायया सर्वा अप यजामसि ॥ निरितो यन्तु नैर्ऋत्या मृत्यव एकशतं परः ॥ सेधामैषां यत्तमः प्राणं ज्योतिश्च दध्महे ॥ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभ्यो अस्मान् वरुणः सोम इन्द्रो विश्वे मुञ्चन्तु मरुतः स्वर्काः ॥ ब्रह्म आजदुदगादन्तरिक्षं दिवं च ब्रह्मावाघूष्टामृतेन मृत्युम् । ब्रह्मोपद्रष्टा सुकृतस्य साक्षाद्ब्रह्मास्मदप हन्तु शमलं तमश्च ॥८॥ वरमनड्वाहमिति समानम् ॥९॥५॥९७॥

अथ यत्रैतद्भूमिचलो भवति तत्र जुहुयात् ॥ १ ॥ अच्युता द्यौरच्युतमन्तरिक्षमच्युता भूमिर्दिशो अच्युता इमाः । अच्युतोऽयं रोधावरोधाद्ध्रुवो राष्ट्रे प्रति तिष्ठाति जिष्णुः ॥ यथा सूर्यो दिवि रोचते यथान्तरिक्षं मातरि-

---

इत्यादि से आहुति देकर ॥ ४ ॥ वही इन होमों को भी देवे ॥ ५ ॥ "आरादग्निं क्रव्यादं०" इस सूक्त से आहुति देवे ॥ ६ ॥ ७ ॥ "अपेत एतु०" इत्यादि से आहुतियां देवे ॥ ८ ॥ दक्षिणा में कर्त्ताको बैल देवे ॥ ९ ॥ ५ ॥ ९७ ॥ यह सत्तानबेवी काण्डिका खतम हुई ॥

जहां भूकम्प होवे वहां आहुति देवे ॥ १ ॥ "अच्युता द्यौरच्युत०"

श्वाभिवस्ते। यथाग्निः पृथिवीमा विवेशैवायं ध्रुवो अच्युतो अस्तु जिष्णुः। यथा देवो दिवि स्तनयन्वि राजति यथा वर्षं वर्षकामाय वर्षति। यथापः पृथिवीमा विविशुरेवायं ध्रुवो अच्युतो अस्तु जिष्णुः॥ यथा पुरीषं नद्याः समुद्रमहोरात्रे अप्रमादं क्षरन्ति॥ एवा विशः संमनसो हवं मेऽप्रमादमिहोपा यन्तु सर्वाः॥ दृंहतां देवी सह देवताभिर्ध्रुवा दृढाच्युता मे अस्तु भूमिः। सर्वंपाप्मानमपनुद्यास्मदमित्रान्मे द्विषतोऽनुविध्यतु॥ पृथिव्यै स्वाहेति हुत्वा॥२॥ आ त्वाहार्षं ध्रुवा द्यौः सत्यं बृहदित्येतेनानुवाकेन जुहुयात्॥३॥ सा तत्र प्रायश्चित्तिः॥४॥६॥९८॥

अथ यत्रैतदादित्यं तमो गृह्णाति तत्र जुहुयात्॥१॥ दिव्यं चित्रमृतूया कल्पयन्तमृतूनामुग्रं भ्रमयन्नुदेति। तदादित्यः प्रतरन्नेतु सर्वत आप इमां लोकाननुसंचरन्ति॥ ओषधीभिः संविदानाविन्द्राग्नी स्वाभिरक्षताम्॥ ऋतेन सत्यवाकेन तेन सर्वं तमो जहि॥ आदित्याय स्वाहेति हुत्वा॥२॥ विषासहिं सहमानमित्येतेन सूक्तेन जुहुयात्॥३॥ रोहितैरुपतिष्ठते॥४॥ सा तत्र प्रायश्चित्तिः॥५॥७॥९९॥

इत्यादि से आहुति देकर॥ २॥ "आ त्वाहार्षं ध्रुवा द्यौः०" इत्यादि अनुवाकसे आहुति देवे॥ ३॥ यही उसकी प्रायश्चित्ति है॥ ४॥ ६॥ ॥ ९८॥ यह अट्ठानबेवी कण्डिका खतम हुई॥

जहां सूर्य्य ग्रहण होता है, वहां आहुति देवे॥ १॥ "दिव्यं चित्रमृतूया०" इत्यादिसे आहुति देकर॥ २॥ "विषासहिं०" इत्यादि सूक्त से आहुति देवे॥ ३॥ "रोहितैः" से उपस्थान करे॥ ४॥ यह उसकी प्रायश्चित्ति है॥ ५॥ ७॥ ९९॥ यह निन्यानबेवी कण्डिका खतम हुई॥

अथ यत्रैतच्चन्द्रमसमुपप्लवति तत्र जुहुयात् ॥१॥ राहू राजानं स्सरति स्वरन्तमैनमिह हन्ति पूर्वः । सहस्रमस्य तन्व इह नाश्याः शतं तन्वो विनश्यन्तु ॥ चन्द्राय स्वाहेति हुत्वा ॥२॥ शकधूमं नक्षत्राणीत्येतेन सूक्तेन जुहुयात् ॥३॥ सा तत्र प्रायश्चित्तिः ॥४॥८॥१००॥

अथ यत्रैतदौषसी नोदेति तत्र जुहुयात् ॥१॥ उदेतु श्रीरुषसः कल्पयन्ती पूल्यान्कृत्वा पलित एतु चारः । ऋतून्बिभ्रती बहुधा विरूपान्मह्यं भव्यं विदुषी कल्पयाति ॥ औषस्यै स्वाहेति हुत्वा ॥ दिव्यो गन्धर्व इति मातृनामभिर्जुहुयात् ॥ ३ ॥ सा तत्र प्रायश्चित्तिः ॥ ॥४॥६॥१०१॥

अथ यत्रैतत्समा दारुणा भवति तत्र जुहुयात् ॥१॥ या समा रुशत्येति प्राजापत्यान्वि धूनुते । तृप्तिं यां देवता विदुस्तां त्वा सङ्कल्पयामसि ॥ व्याधकस्य मातरं हिरण्यकुक्षीं हरिणीम् ॥ तां त्वा सङ्कल्पयामसि ॥ यत्ते घोरं यत्ते विषं तद्द्विषत्सु नि दध्मस्यमुष्मिन्निति ब्रूयात् ॥२॥ शिवेनास्माकं समे शान्त्या सहायुषा समायै स्वा-

---

जहां चन्द्रग्रहण होता है, वहां आहुति करे ॥ १ ॥ "राहू राजानं०" इत्यादि से आहुति करके ॥ २ ॥ "शकधूमं नक्षत्राणि०" इत्यादि सूक्त से आहुति करे ॥ ३ ॥ यह उसकी प्रायश्चित्ति है ॥ ४ ॥ ८ ॥ १०० ॥ यह सौवी कण्डिका खतम हुई ॥

अब जहां जहां उषा का उदय नहीं होता है, वहां आहुति देवे ॥१॥ "उदेतु श्रीरुषसः०" इत्यादि आहुति देकर ॥ २ ॥ "दिव्यो गन्धर्वः०" से और मातृनामों से आहुतियाँ देवे ॥ ३ ॥ यह उसकी प्रायश्चित्ति है ॥ ४ ॥ ९ ॥ १०१ ॥ यह एक सौ एकवी कण्डिका खतम हुई ॥

अब जहां का संवत्सर दारुण (दुःखप्रद वर्ष) होता है, वहां आहुति देवे ॥ १ ॥ "या समा रुशत्येति०" इत्यादि से आहुति

हेति हुत्वा ॥३॥ समास्त्वाग्न इत्येतेन सूक्तेन जुहुयात् ॥४॥ सा तत्र प्रायश्चित्तिः ॥५॥१०॥१०२॥

अथ यत्रैतदुपतारकाः शङ्कन्ते तत्र जुहुयात् ॥ १ ॥ रेवतीः शुभ्रा इषिरा मदन्तीस्त्वचो धूममनु ताः संविशन्तु । परेणापः पृथिवीं सं विशन्त्वाप इमां लोकाननु संचरन्तु ॥ अद्भ्यः स्वाहेति हुत्वा ॥ २ ॥ समुत्पतन्तु प्रनभस्वेति वर्षाजुंहुयात् ॥ ३ ॥ सा तत्र प्रायश्चित्तिः ॥४॥११॥१०३॥

अथ यत्रैतद्ब्राह्मणा आयुधिनो भवन्ति तत्र जुहुयात् ॥१॥ य आसुरा मनुष्या आत्तधन्वः पुरुषमुखाश्वरानिह । देवा वयं मनुष्यास्ते देवाः प्रविशामसि । इन्द्रो नो अस्तु पुरोगवः स नो रक्षतु सर्वतः । इन्द्राय स्वाहेति हुत्वा ॥२॥ मा नो विदन्नमो देववधेभ्य इत्येताभ्यां सूक्ताभ्यां जुहुयात् ॥ ३ ॥ सा तत्र प्रायश्चित्तिः ॥४॥१२॥१०४॥

देकर ॥ २ ॥ ३ ॥ "समास्त्वाग्न०" इस सूक्त से आहुति देवे ॥ ४ ॥ यह उसकी प्रायश्चित्ति है ॥ ५ ॥ १० ॥ १०२ ॥ यह एक सौ दूसरी कण्डिका समाप्त हुई ।

अब जहां यह उपतारकाओं की शङ्का होती है, तहां आहुति देवे ॥ ॥ १ ॥ "रेवतीः शुभ्रा इषिरा०" इत्यादि से आहुति देवे ॥ ३ ॥ यह उसकी प्रायश्चित्ति है ॥ ४ ॥ ११ ॥ १०३॥ यह एक सौ तीसरी कण्डिका खतम हुई ।

अब जहां ब्राह्मणलोग अस्त्रधारी होते हैं, तहां आहुति देवे ॥ १ ॥ "य आसुरा मनुष्या०" इत्यादि से आहुति देकर ॥ २ ॥ "मा नो विदन्नमो०" इत्यादि दो सूक्तों से आहुति देवे ॥ ३ ॥ यह उसकी प्रायश्चित्ति है ॥ ४ ॥ १२ ॥ १०४ ॥ यह एक सौ चारवी कण्डिका खतम हुई ।

अथ यत्रैतद्दैवतानि नृत्यन्ति च्योतन्ति हसन्ति गायन्ति वाऽन्यानि वा रूपाणि कुर्वन्ति य आसुरा मनुष्या मा नो विदन्नमो देववधेभ्य इत्यभयैर्जुहुयात् ॥ १ ॥ सा तत्र प्रायश्चित्तिः ॥२॥१३॥१०५॥

अथ यत्रैतल्लाङ्गले संसृजतः पुरोडाशं श्रपयित्वा ॥१॥ अरण्यस्यार्धमभिव्रज्य ॥२॥ प्राचीं सीतां स्थापयित्वा ॥ ३ ॥ सीताया मध्ये प्राञ्चमिध्ममुपसमाधाय ॥४॥ परिसमुह्य पर्युक्ष्य परिस्तीर्य बर्हिः शम्याः परिधीन्कृत्वा ॥५॥ अथ जुहोति । चित्तिरसि पुष्टिरसि श्रीरसि प्राजापत्यानां तां त्वाहं मयि पुष्टिकामो जुहोमि स्वाहा ॥६॥ कुमुद्वती पुष्करिणी सीता सर्वाङ्गशोभनी । कृषिः सहस्रप्रकारा प्रत्यष्ठा श्रीरियं मयि ॥ उर्वीं त्वाहुर्मनुष्याः श्रियं त्वा मनसो विदुः । आशयेऽन्नस्य नो धेह्यनमीवस्य शुष्मिणः ॥ पर्जन्यपत्नि हरिण्यभिजितास्यभि नो वद ॥ कालनेत्रे हविषो नो जुषस्व तृप्तिं नो धेहि द्विपदे चतुष्पदे ॥ याभिर्देवा असुरानकल्पयन् यातून्मनून् गन्धर्वान् राक्षसांश्च । ताभिर्नो अद्य सुमना

अब जहां देवता (या मूर्तियां) नाचतीं, इधर उधर चलती, हँसती, गाती हैं या अन्यान्य रूपों को धारण करती हैं—वहां "य आसुरा०" इत्यादि से आहुति देवे ॥ १ ॥ यह उसकी प्रायश्चित्ति है ॥ २ ॥ १३ ॥ ॥ १०५ ॥ यह एक सौ पांचवीं कण्डिका खतम हुई ॥

अब जहां लाङ्गल में बैल के पुच्छ का संसर्ग हो जावे या हल से हल का। वहां पुरोडाशको पकाकर ॥१॥ अरण्य के आधे भाग में जाकर ॥ २ ॥ पूर्व मुख सीता को स्थापन करके ॥ ३ ॥ सीता के मध्य भाग में पूर्वाभिमुख इध्मों का उपसमाधान करके ॥ ४ ॥ परिसमूहन, पर्युक्षण, परिस्तरण करके बर्हि, शम्या, परिधियों को करके ॥ ५ ॥ आहुति देवे । "चित्तिरसि पुष्टिरसि०" इत्यादि आहुतियाँ देवे ॥ ६ ॥ "कुमुद्वती पुष्क-

उपा गहि सहस्रापोषं सुभगे रराणा ॥ हिरण्यस्र-क्वुष्करिणी श्यामा सर्वाङ्गशोभनी ॥ कृषिर्हिरण्यप्रकारा प्रत्यष्टा श्रीरियं मयि ॥ अश्विभ्यां देवि सह संविदाना इन्द्रेण राधेन सह पुष्ट्या न आ गहि ॥ विशस्त्वा रासन्तां प्रदिशोऽनु सर्वा अहोरात्रार्धमासमासा आर्तवा ऋतुभिः सह ॥ भर्त्री देवानामुत मर्त्यानां भर्त्री प्रजानामुत मानुषाणाम् ॥ हस्तिभिरितरासैः क्षेत्रसारथिभिः सह । हिरण्यैरश्वैरा गोभिः प्रत्यष्टा श्रीरियं मयि ॥७॥ अत्र शुनासीराण्यनुयोजयेत् ॥ ८ ॥ वरमनड्वाहमिति समानम् ॥९॥१४॥१०६॥

अथ यत्रैतत्सृजन्त्योर्वा कृन्तन्त्योर्वा नाना तन्तू संसृजतो मनायै तन्तुं प्रथममित्येतेन सूक्तेन जुहुयात् ॥१॥ मनायै तन्तुं प्रथमं पश्येदन्या अतन्वत । तन्नारीः प्रब्रवीमि वः साध्वीर्वः सन्तूर्वरीः ॥ साधुर्वस्तन्तुर्भवतु साधुरेतु रथो वृतः ॥ अथो ह्योर्वरीर्यूयं प्रातर्वोढवे धावत ॥ खर्गला इव पत्वरीरपामुग्रमिवायनम् । पतन्तु पत्वरीरिवोर्वरीः साधुना पथा ॥ अवाच्यौ ते तोतुद्येते तोदेनाश्वतराविव ॥ प्र स्तोममुर्वरीणां शशयानामस्ताविषम् ॥ नारी पञ्चमयूखं सूत्रवत्कृणुते वसु ॥ अरिष्टो अस्य वस्ता प्रेन्द्र वास उतोदिर ॥२॥ वासः कर्त्रे दद्यात्

रिणी०" इत्यादि से आहुति देवे ॥ ७ ॥ यहां शुनासीरों की अनुयोजना करे ॥ ८ ॥ कर्त्ता को दक्षिणा में बैल देवे ॥ ९ ॥ १४ ॥ १०६ ॥ यह एकसौ छहवी कण्डिका खतम हुई ॥

अब जहां सूतों के कातने या बिनने में सूत परस्पर संसृज होकर टूट जावे या बेकाम हो जाया करे वहां आहुति करे ॥१॥ "मनायै तन्तुं प्रथमं०" इत्यादि से आहुति करे ॥ २ ॥ कर्त्ता को दक्षिणा में वस्त्र देवे ॥ ३ ॥ यह -

॥३॥ सा तत्र प्रायश्चित्तिः ॥४॥१५॥१०७॥

अथ यत्रैतदग्निनाग्निः संसृज्यते भवतं नः समनसौ समोकसाविस्येतेन सूक्तेन जुहुयात् ॥ १ ॥ भवतं नः समनसौ समोकसावरेपसौ । मा हिंसिष्टं यज्ञपतिं मा यज्ञं जातवेदसौ शिवौ भवतमद्य नः ॥ अग्निनाग्निः संसृज्यते कविर्बृहस्पतिर्युवा । हव्यवाड् जुह्वास्यः ॥ त्वं ह्यग्ने अग्निना विप्रो विप्रेण सन्सता। सखा सख्या समिध्यसे ॥ पाहि नो अग्न एकया पाहि न उत द्वितीयया। पाहि गीर्भिस्तिसृभिरूर्जांपते पाहि चतसृभिर्वसो ॥ समीची माहनी पातामायुष्मस्या ऋचो मा सस्सि। तनूपात्साम्नो वसुविदं लोकमनुसंचराणि ॥२॥ रुक्मं कर्त्रे दद्यात् ॥३॥ सा तत्र प्रायश्चित्तिः ॥४॥१६॥१०८॥

अथ यत्रैतद्यमसूर्यमौ जनयति तां शान्त्युदकेनाभ्युक्ष्य दोहयित्वा ॥ १ ॥ तस्या एव गोर्दुग्धे स्थालीपाकं श्रपयित्वा ॥२॥ प्राञ्चमिध्ममुपसमाधाय ॥३॥ परिसमुह्य पर्युक्ष्य परिस्तीर्य बर्हिरुदपात्रमुपसाद्य ॥ ४ ॥ एकैक-

---

उसकी प्रायश्चिति है ॥ ४ ॥ १५ ॥ १०७ ॥ यह एक सौ सातवी कण्डिका समाप्त हुई ॥

अब जहां जहां अग्नि से अग्नि का संघर्ष हो जावे वहां "भवतं नः समनसौ समोकसौ" इस सूक्त से आहुति देवे ॥ १ ॥ "भवतं नः समनसौ०"इत्यादि से आहुति देवे ॥ २ ॥ कर्त्ता को दक्षिणा में सोना देवे ॥ ३ ॥ यह उसकी प्रायश्चिति है ॥४॥१६॥१०८॥ यह एकसौ आठहवी कण्डिका खतम हुई ॥

अब जहाँ एक साथ अनेक बच्चे गौ को पैदा हों उसको शान्ति जल से अभ्युक्षण कर गौ को दुह करके ॥१॥ उसी गौ के दूध में स्थालीपाक पका कर ॥२॥ पूर्वाभिमुख इध्माधान करके ॥३॥ परिसमूहन, पर्युक्षण, परिस्तरण करके, बर्हिकुश एवं जलपात्र लाकरके ॥४॥ "एकैकयै-

यैषा सृष्ट्या सं बभूवेत्येतेन सूक्तेनाज्यं जुह्वन् ॥ ५ ॥ उदपात्रे सम्पातानानयति ॥ ६ ॥ उत्तमं संपातमोदने प्रत्यानयति ॥७॥ ततो गां च प्राशयति वत्सौ चोदपात्रादेनानाचामयति च संप्रोक्षति च ॥ ८ ॥ तां तस्यैव दद्यात् ॥९॥ सा तत्र प्रायश्चित्तिः ॥१०॥१७॥१०९॥

अथ चेद्वडवा वा गर्दभी वा स्यादेवमेव प्राञ्चमिध्ममुपसमाधाय ॥ १ ॥ एवं परिस्तीर्य ॥ २ ॥ एवमुपसाद्य ॥३॥ एतेनैव सूक्तेनाज्यं जुह्वन् ॥४॥ उदपात्रे संपातानानयति ॥५॥ उदपात्रादेनानाचामयति च संप्रोक्षति च ॥६॥ तां तस्यैव दद्यात् ॥७॥ सा तत्र प्रायश्चित्तिः ॥८॥१८॥११०॥

अथ चेन्मानुषी स्यादेवमेव प्राञ्चमिध्ममुपसमाधाय ॥१॥ एवं परिस्तीर्य ॥२॥ एवमुपसाद्य ॥३॥ उपस्थे जातकावाधाय ॥४॥ एतेनैव सूक्तेनाज्यं जुह्वन् ॥५॥

षा सृष्ट्या०" इत्यादि सूक्त से आज्य की आहुति करता हुआ जलपात्र में सम्पातों को रखता जावे। उत्तम सम्पात को ओदन में लावे ॥५॥६॥७॥ तब गौ और दोनों बच्चों को प्राशन करावे और जलपात्र से इसको आचमन करा कर सम्प्रोक्षण करावे ॥८॥ उस गौ को कर्त्ता ही को देवे ॥९॥ यह उसकी प्रायश्चित्ति है ॥१०॥१७॥१०९॥ यह एकसौ नौहवी कण्डिका खतम हुई ॥

यदि घोड़ी या गदही इसी प्रकार जोड़े बच्चे प्रसव करे तो पूर्वाभिमुख इध्मों का आधान करके एवं परिस्तरण करके सामग्रियों को आसादन करके इसी सूक्त से आज्य की आहुति देता हुआ ॥१॥२॥३॥४॥ जलपात्र में सम्पातों को रखे ॥५॥ जलपात्र ही से इनको आचमन और सम्प्रोक्षण करे ॥६॥ इसको दक्षिणा में कर्त्ता को ही देवे ॥७॥ यह उसकी प्रायश्चित्ति है ॥८॥१८॥११०॥ यह एकसौ दसवी कण्डिका खतम हुई ॥

यदि मनुष्यस्त्री को यमल प्रसव हो तो, उसको भी इसी प्रकार पूर्वाभिमुख इध्मों का आधान, परिस्तरण और उपसादन करके ॥१॥२॥३॥

अमीषां मूर्ध्नि स मातुः पुत्रयोरित्यनुपूर्वं सम्पातानानयति ॥६॥ उदपात्र उत्तरान्संपातान् ॥७॥ उदपात्रादेनानाचामयति च संप्रोक्षति च ॥८॥ तां तस्यैव दद्यात् ॥९॥ सा तत्र प्रायश्चित्तिः ॥१०॥ तस्या निष्क्रयो यथार्हं यथासंपद्वा ॥११॥१९॥१११॥

अथ यत्रैतद्धेनवो लोहितं दुहते यः पौरुषेयेण क्रविषा समङ्क्त इत्येताभिश्चतसृभिर्जुहुयात् ॥१॥ वरां धेनुं कर्त्रे दद्यात् ॥२॥ सा तत्र प्रायश्चित्तिः ॥३॥२०॥११२॥

अथ यत्रैतदनड्वान्धेनुं धयति तत्र जुहुयात् ॥१॥ अनड्वान्धेनुमधयदिन्द्रो गोरूपमाविशत् । स मे भूतिं च पुष्टिं च दीर्घमायुश्च धेहि नः ॥ इन्द्राय स्वाहेति हुत्वा ॥२॥ मा नो विदन्नमो देववधेभ्य इत्येताभ्यां सूक्ताभ्यां जुहुयात् ॥३॥ सा तत्र प्रायश्चित्तिः ॥४॥२१॥११३॥

गोदमें बच्चों को लेकर इसी सूक्त से आज्य की आहुति देता हुआ। "अमीषां मूर्ध्नि०" इत्यादि से सम्पातों को लावे ॥४॥५॥६॥ जलपात्र में शेष सम्पातों को धरे ॥७॥ जलपात्र ही से इनको आचमन और सम्प्रोक्षण करे ॥८॥ उसके बच्चों को उसीको देवे ॥९॥ यह उसकी प्रायश्चित्ति है ॥१०॥ उसका निष्क्रय यथाशक्ति यथासम्पद् कर्त्ता को देवे ॥११॥ ॥१९॥१११॥ यह एक सौ ग्यारहवी कण्डिका खतम हुई ॥

अब जहाँ धेनु को दुहने पर दूध की जगह रुधिर आवे तो "यः पौरुषेयेण क्रविषा समङ्क्त०" इत्यादि ४ ऋचाओं से चार आहुतियाँ देवे ॥१॥ कर्त्ता को दक्षिणा में धेनु देवे ॥२॥ यह उसकी प्रायश्चित्ति है ॥३॥ ॥२०॥११२॥ यह एकसौ बारहवी कण्डिका खतम हुई ॥

अब जहाँ बैल धेनु पर मैथुनार्थ चेष्टा करता है, वहाँ आहुति करे ॥१॥ "अनड्वान्धेनुमधयदिन्द्रो०" इत्यादि से आहुति देकर ॥२॥ "मा नो विदन्नमो देववधेभ्यः०" इन दो सूक्तों से आहुति देवे ॥५॥ यह उसकी प्रायश्चित्ति है ॥४॥२१॥११३॥ यह एकसौ तेरहवी कण्डिका खतम हुई ॥

अथ यत्रैतद्धेनुर्धेनुं धयति तत्र जुहुयात् ॥१॥ योगक्षेमं धेनुं वाजपत्नीमिन्द्राग्निभ्यां प्रेषिते जञ्जभाने । तस्मान्मामग्ने परि पाहि घोरात्प्र नो जायन्तां मिथुनानि रूपशः ॥ इन्द्राग्निभ्यां स्वाहेति हुत्वा॥२॥ दिव्यो गन्धर्व इति मातृनामभिर्जुहुयात् ॥३॥ सा तत्र प्रायश्चित्तिः ॥४॥२२॥११४॥

अथ यत्रैतद्गौर्वाश्वो वाश्वतरो वा पुरुषो वाकाशफेनमवगन्धयति तत्र जुहुयात् ॥१॥ पयो देवेषु पय ओषधीषु पय आशासु पयोऽन्तरिक्षे । तन्मे धाता च सविता च धत्तां विश्वे तद्देवा अभिसंगृणन्तु ॥ पयो यदप्सु पय उस्रियासु पय उत्सेषूत पर्वतेषु । तन्मे धाता च सविता च धत्तां विश्वे तद्देवा अभिसंगृणन्तु ॥ यन्मृगेषु पय आविष्टमस्ति यदेजति पतति यत्पतत्रिषु । तन्मे धाता च सविता च धत्तां विश्वे तद्देवा अभिसंगृणन्तु ॥ यानि पयांसि दिव्यार्पितानि यान्यन्तरिक्षे बहुधा बहूनि । तेषामीशानं वशिनी नो अद्य प्रदत्ता द्यावापृथिवी अहृणीयमाना इत्येतेन सूक्तेन जुहुयात् ॥२॥ सा तत्र प्रायश्चित्तिः ॥३॥२३॥११५॥

अथ यत्रैतत्पिपीलिका अनाचाररूपा दृश्यन्ते तत्र

अब जहाँ धेनु धेनु से मैथुन करना चाहती है, वहाँ आहुति करे ॥१॥ "योगक्षेमं धेनुं०" इत्यादि से आहुति देकर ॥२॥ "दिव्यो गन्धर्व०" और मातृ नामों से आहुतियाँ देवे ॥२॥३॥ यह उसकी प्रायश्चित्ति है ॥४॥२२॥११४॥ यह एकसौ चौदहवी कण्डिका खतम हुई ॥

अब जहाँ गौ या अश्व या अश्वतर या पुरुष आकाश के फेन का गन्ध लेता है, वहाँ आहुति करे ॥१॥ "पयो देवेषु०" इत्यादि इस सूक्त से आहुति करे ॥२॥ यह उसकी प्रायश्चित्ति है ॥३॥२३॥११५॥ यह एकसौ पन्द्रहवी कण्डिका खतम हुई ॥

अब जहाँ पिपीलिका अनाचार रूप से दीखने लगतीं, तहाँ आहुति

जुहुयात् ॥ १ ॥ भुवाय स्वाहा भुवनाय स्वाहा भुवनपतये स्वाहा भुवां पतये स्वाहा वोषाय स्वाहा विनताय स्वाहा शतारुणाय स्वाहा ॥२॥ यः प्राच्यां दिशि श्वेतपिपीलिकानां राजा तस्मै स्वाहा । यो दक्षिणायां दिशि कृष्णपिपीलिकानां राजा तस्मै स्वाहा । यः प्रतीच्यां दिशि रजतपिपीलिकानां राजा तस्मै स्वाहा । य उदीच्यां दिशि रोहितपिपीलिकानां राजा तस्मै स्वाहा । यो ध्रुवायां दिशि बभ्रुपिपीलिकानां राजा तस्मै स्वाहा । यो व्यध्वायां दिशि हरितपिपीलिकानां राजा तस्मै स्वाहा । य ऊर्ध्वायां दिश्यरुणपिपीलिकानां राजा तस्मै स्वाहा॥३॥ ताश्चेदेतावता न शाम्येयुस्तत उत्तरमग्निमुपसमाधाय ॥ ४ ॥ शरमयं बर्हिरुभयतः परिच्छिन्नं प्रसव्यं परिस्तीर्य ॥ ५ ॥ विषावध्वस्तमिङ्गिडमाज्यं शाकपलाशेनोत्पूतं बाधकेन स्रुवेण जुहोति ॥६॥ उत्तिष्ठत निर्द्रवत न व इहास्त्विवस्त्यञ्जनम् । इन्द्रो वः सर्वासां साकं गर्भाणाण्डानि भेत्स्यति । फड्ढताः पिपीलिका इति ॥ ७ ॥ इन्द्रो वो यमो वो वरुणो वोऽग्निर्वो वायुर्वः सूर्यो वश्चन्द्रो वः प्रजापतिर्व ईशानो व इति ॥८॥२४॥११६॥

अथ यत्रैतन्नीलमक्षा अनाचाररूपा दृश्यन्ते तत्र

करे॥१॥ "भुवाय स्वाहा, भुवनाय स्वाहा०" इत्यादि से आहुति देवे ॥२॥ ॥३॥ यदि इससे न शान्ति करें तो उत्तर अग्नि का आधान करके ॥४॥ शरमयबर्हि जो दोनों ओर टूटे हों प्रसव्य परिस्तरण करके ॥५॥ विषावध्वस्त इङ्गिड आज्य को शाक के पत्ते से उत्पवन करके बाधक वृक्ष के स्रुव से आहुति देवे ॥६॥ "उत्तिष्ठत निर्द्रवत०" इत्यादि से ॥७॥ फिर "इन्द्रो वो यमो०" इत्यादि से आहुति देवे ॥८॥२४॥११६॥ यह एकसौ सोलहवी कण्डिका खतम हुई ॥

जहुयात् ॥१॥ या मर्त्यैः सरथं यान्ति घोरा मृत्योर्दूत्यः क्रविशः सं बभूवुः । शिवं चक्षुरुत घोषः शिवानां शं नो अस्तु द्विपदे शं चतुष्पदे ॥ शान्तं चक्षुरुत वायसीनां या चासां घोरा मनसो विसृष्टिः ॥ मनसस्पते तन्वा मा पाहि घोरान्मा वि रिक्षि तन्वा मा प्रजया मा पशुभिर्वायवे स्वाहेति हुत्वा ॥२॥ वात आ वातु भेषजमित्येतेन सूक्तेन जुहुयात् ॥३॥ वात आ वातु भेषजं शंभु मयोभु नो हृदे ॥ प्र ण आयूंषि तारिषत् ॥ उत वात पितासि न उत भ्रातोत नः सखा । स नो जीवातवे कृधि ॥ यददो वात ते गृहे निहितं भेषजं गुहा । तस्य नो धेहि जीवस इत्येतेन सूक्तेन जुहुयात् ॥४॥ सा तत्र प्रायश्चित्तिः ॥५॥२५॥११७॥

अथ यत्रैतन्मधुमक्षिका अनाचाररूपा दृश्यन्ते मधु वात ऋतायत इत्येतेन सूक्तेन जुहुयात् ॥१॥ सा तत्र प्रायश्चित्तिः ॥२॥२६॥११८॥

अथ यत्रैतदनाज्ञातमद्भुतं दृश्यते तत्र जुहुयात्॥१॥ यदज्ञातमनाज्ञातमर्थस्य कर्मणो मिथः॥ अग्ने त्वं नस्तस्मात्पाहि स हि वेत्थ यथायथम् ॥ अग्नये स्वाहा ॥२॥ वायो सूर्य चन्द्रेति च ॥३॥ पुरुषसंमितोऽर्थः कर्मार्थः

अब जहाँ नीले रंग की मक्षिका अनाचार रूप से दीख पड़ें, तहाँ आहुति देवे ॥१॥ "या मर्त्यैः सरथं यान्ति०" इत्यादि से आहुति देवे ॥२॥ "वात आ वातु०" इत्यादि सूक्त से आहुति देवे ॥३॥ "वात आ वातु भेषजं०" इत्यादि सूक्त से आहुति देवे ॥४॥ यह उसकी प्रायश्चित्ति है ॥५॥२५॥११७॥ यह एकसौ सतरहवी कण्डिका खतम हुई ॥

अब जहाँ मधुमक्षिका अनाचार रूपा दीख पड़े, वहाँ आहुति देना चाहिये ॥१॥ "यदज्ञातमनाम्नातं०" इत्यादि से आहुति देवे ॥२॥

पुरुषसंमितः । वायुर्मा तस्मात्पातु स हि वेत्थ यथा-यथम् ॥ वायवे स्वाहा ॥४॥ अग्निर्मा सूर्यो मा चन्द्रो मेति च ॥५॥२७॥११६॥

अथ यत्रैतद्ग्रामे वावसाने वाग्निशरणे वा सम-ज्यायां वावदीर्यंत चतस्रो धेनव उपक्लृप्ता भवन्ति श्वेता कृष्णा रोहिणी सुरूपा चतुर्थी ॥१॥ तासामेत-द्वादशरात्रं संदुग्धं नवनीतं निदधाति ॥२॥ द्वादश्याः प्रातर्यत्रैवादीऽवदीर्णं भवति तत उत्तरमग्निमुपसमा-धाय ॥३॥ परिसमुह्य पर्युक्ष्य परिस्तीर्य बर्हिः श्वेताया आज्येन सन्नीय ॥४॥ अग्निर्भूम्यामिति तिसृभिरभि मन्त्र्यालभ्य ॥५॥ अथ जुहुयात् ॥६॥ तथा दक्षिणार्धे ॥७॥ तथा पश्चार्धे ॥८॥ उत्तरार्धे संस्थाप्य वास्तोष्पत्यै-र्जुहुयात् ॥९॥ अवदीर्णे संपातानानीय संस्थाप्य होमान् ॥१०॥ अवदीर्णं शान्त्युदकेन संप्रोक्ष्य ॥११॥ ता एव

"वायो सूर्य चन्द्रेति च०" इत्यादि से आहुति देवे ॥३॥४॥ "अग्निर्मा सूर्यो मा चन्द्रो मा०" इत्यादि से आहुति देवे ॥५॥२७॥११९॥ यह एकसौ उन्नीसवी कण्डिका खतम हुई ॥

अब जहाँ ग्राम में या दहन गृह में या अग्निशाला में, या समज्या में कोई काष्ठ आदि फट या टूट जावे तो उसकी शान्ति के लिये ४ धेनु की आवश्यकता होती है । एक श्वेता, दूसरी काली, तीसरी रोहिणी, चौथी सुरूपा ॥ इन चारों के दूध, नवनीत १२ रात्र तक ग्रहण करे और द्वादशी के प्रातःकाल जहाँ, दीवार या काष्ठादि फट गया हो उससे उत्तर अग्नि का आधान करे ॥१॥२॥ परिसमूहन, पर्युक्षण, परिस्तरण करके बर्हिकुश को श्वेत गौ के घी से चपोट कर ॥४॥ "अग्निर्भूम्यां०" इत्यादि तीन ऋचा से अभिमंत्रण कर भूमि को स्पर्श करे ॥५॥ तब आहुति देवे ॥६॥ उसी प्रकार अग्नि के दक्षिणार्ध भाग में तथा पश्चिमार्ध में और उत्त-रार्द्ध में संस्थापन करके "वास्तोष्पत्य" ऋचाओं से आहुतियाँ देवे ॥७॥ ॥८॥९॥अवदीर्ण स्थान सम्पातों को लाकर होम को संस्थापन करके ॥१०॥

ब्राह्मणो दद्यात् ॥१२॥ सीरं वैश्योऽश्वं प्रादेशिको ग्रामवरं राजा ॥१३॥ सा तत्र प्रायश्चित्तिः ॥१४॥२८॥१२०॥

अथ यत्रैतदनुदक उदकोन्मीलो भवति हिरण्यवर्णा इत्यपां सूक्तैर्जुहुयात् ॥ १ ॥ सा तत्र प्रायश्चित्तिः ॥ २ ॥ ॥२९॥१२१॥

अथ यत्रैतत्तिलाः समतैला भवन्ति तत्र जुहुयात् ॥१॥ अनूनाय स्वाहा। अक्षिताय स्वाहा । अपरिमिताय स्वाहा । परिपूर्णाय स्वाहा ॥ २ ॥ स यं द्विष्यात्तस्याशायां लोहितं ते प्रसिञ्चामीति दक्षिणामुखः प्रसिञ्चेत् ॥३॥३०॥१२२॥

अथ यत्रैतद्वपां वा हवींषि वा वयांसि द्विपद् चतुष्पदं वाभिमृश्यावगच्छेयुर्ये अग्नयो नमो देववधेभ्य इत्येताभ्यां सूक्ताभ्यां जुहुयात् ॥१॥ सा तत्र प्रायश्चित्तिः ॥२॥३१॥१२३॥

अवदीर्ण को शान्ति जल से संप्रोक्षण करके ॥११॥ उसीको ब्राह्मण को दे देवे ॥१२॥ दक्षिणा में कर्त्ता को वैश्य (यजमान) सीर देवे, प्रादेशिक घोड़ा देवे और राजा ग्राम देवे ॥१३॥ यह उसकी प्रायश्चित्ति है ॥१४॥ ॥२८॥१२०॥ यह एकसौ बीसवी कण्डिका खतम हुई ॥

अब जहाँ विना जल के स्थान जल हो तो "हिरण्यवर्णा०" इत्यादि जल सूक्तों से आहुतियाँ देवे ॥१॥ यह उसकी प्रायश्चित्ति है ॥२॥२९॥ ॥१२१॥ यह एकसौ इक्कीसवी कण्डिका खतम हुई ॥

अब जहाँ तिल के बराबर उससे तैल निकले वहाँ आहुति देवे ॥१॥ अनूनाय स्वाहा । अक्षिताय स्वाहा । अपरिमिताय स्वाहा । परिपूर्णाय स्वाहा। "स यं द्विष्याचस्याशायां लोहितं ते प्रसिञ्चामि" से दक्षिणमुख सिंचन करे ॥२॥३॥३०॥१२२॥ यह एकसौ बाइसवी कण्डिका खतम हुई ॥

अब जहाँ वपा को हवियों को चिल्ह, कौवे आदि लेकर भाग जावें तो "अग्नयो नमो देववधेभ्यः" इन दो सूक्तों से आहुतियाँ देवे ॥१॥ यह उसकी प्रायश्चित्ति है ॥२॥३१॥१२३॥ यह एकसौ तेइसवी कण्डिका खतम हुई ॥

अथ यत्रैतत्कुमारस्य कुमार्यो वा द्वावावर्तौ मूर्धन्यौ भवतः सव्यावृदेको देशावर्तस्तत्र जुहुयात् ॥१॥ त्वष्टा रूपाणि बहुधा विकुर्वञ्जनयन्प्रजा बहुधा विश्वरूपाः ॥ स मे करोत्वविपरीतमस्माननुपूर्वं कल्पयतामिहैव ॥ त्वष्ट्रे स्वाहा ॥२॥ अन्तर्गर्भेषु बहुधा सं तनोति जनयन्प्रजा बहुधा विश्वरूपाः । स मे करोत्वविपरीतमस्माननुपूर्वं कल्पयतामिहैव ॥ त्वष्ट्रे स्वाहा ॥३॥ यद्युन्मृष्टं यदि वाभिमृष्टं तिरश्चीनर्थं उत मर्मृजन्ते । शिवं तद्देवः सविता कृणोतु प्रजापतिः प्रजाभिः संविदानः ॥ त्वष्ट्रे स्वाहा ॥४॥ सव्यावृत्तान्युत या विश्वरूपा प्रत्यग्वृत्तान्युत या ते परुःषु ॥ तान्यस्य देव बहुधा बहूनि स्योनानि शग्मानि शिवानि सन्तु ॥ त्वष्ट्रे स्वाहेति हुत्वा ॥५॥ त्वष्टा मे दैव्यं वच इत्येतेन सूक्तेन जुहुयात् ॥६॥ सा तत्र प्रायश्चित्तिः ॥७॥३२॥१२४॥

अथ यत्रैतद्यूपो विरोहति तत्र जुहुयात् ॥१॥ यूपो विरोहञ्छतशाखो अध्वरः समावृतो मोहयिष्यन्यजमानस्य लोकान् । वेदाभिगुप्तो ब्रह्मणा परिवृतोऽथर्वभिः शान्तः सुकृतामेतु लोकम् ॥ यूपो ह्यरुक्षद्द्विषतां वधाय न मे यज्ञो यजमानश्च रिष्यात् । सप्तर्षीणां सुकृतां

अब जहाँ कुमार या कुमारी को दो आवर्त्त मूर्धन्य हों एक सव्यावृत् दूसरा देशावर्त्त तो, वहाँ आहुति करे ॥ १ ॥ "त्वष्टा रूपाणि बहुधा०" इत्यादि से आहुति देवे ॥२॥ "अन्तर्गर्भेषु बहुधा०" इत्यादि से आहुति देवे ॥३॥ "यद्यन्मृष्टं यदि वाभिमृष्टं०" इत्यादि से आहुति देवे ॥४॥ "सव्यावृत्तान्युत०" इत्यादि से आहुति देवे ॥५॥ "त्वष्टा मे दैव्यं वचः" इस सूक्त से आहुति देवे ॥६॥ यह उस की प्रायश्चित्ति है ॥७॥३२॥१२४॥ यह एकसौ चौबीसवी कण्डिका खतम हुई ।

अब जहां यूप टूट जाता है, तहां आहुति करे ॥१॥ "यूपो विरोह-

यत्र लोकस्तत्रेमं यज्ञं यजमानं च धेहि ॥ वनस्पतये स्वाहेति हुत्वा ॥२॥ वनस्पतिः सह देवैर्न आगन्निति जुहुयात् ॥३॥ सा तत्र प्रायश्चित्तिः ॥४॥२३॥१२५॥

अथ यत्रैतद्दिवोल्का पतति तदयोगक्षेमाशङ्कं भवत्यवृष्ट्याशङ्कं वा ॥१॥ तत्र राजा भूमिपतिर्विद्वांसं ब्रह्माणं वृणीयात् ॥२॥ स वृतोऽरण्यस्यार्धमभिव्रज्य तत्र द्वादशरात्रमनुशुष्येत् ॥३॥ स खलु पूर्वं नवरात्रमारण्यशाकमूलफलभक्षश्चाथोत्तरं त्रिरात्रं नान्यदुदकात् ॥ ॥४॥ श्वो भूते सप्तधेनव उपक्लृप्ता भवन्ति श्वेता कृष्णा रोहिणी नीली पाटला सुरूपा बहुरूपा सप्तमी ॥५॥ तासामेतद्द्वादशरात्रं सन्दुग्धं नवनीतं निदधाति ॥६॥ द्वादश्याः प्रातर्यत्रैवासौ पतिता भवति तत उत्तरमग्निमुपसमाधाय ॥७॥ परिसमुह्य पर्युक्ष्य परिस्तीर्य बर्हिः ॥८॥ अथामुं नवनीतं सौवर्णे पात्रे विलाप्य सौव-

---

न्छतशाखो०" इत्यादि से आहुति करके ॥२॥ "वनस्पतिः सह देवैर्न०" से आहुति करे ॥३॥ यह उसकी प्रायश्चित्ति है ॥४॥२३॥१२५॥ यह एकसौ पचीसवी कण्डिका खतम हुई ।

अब जहां दिन में उल्कापात होवे, वहां योग क्षेम होने में शङ्का है या अवृष्टि की शङ्का होगी ॥१॥ वहां राजा या भूमिपति विद्वान् ब्राह्मण को बुलाकर वरण करे ॥२॥ वह वृत्त हो वन के आध भाग में जाकर वहां १२ रात तपस्या करे ॥३॥ वह पहिले नौ रात वन्य शाक, फल, मूल खाकर निर्वाह करे और अन्तिम तीन रात फलादि भी न खावे, केवल जल पीकर रहे ॥४॥ प्रातः काल होते ही सात धेनु एकत्र करे । सफेद, काली, रोहिणी, नीली, पाटला, सुरूपा, बहुरूपा सप्तमी ॥५॥ उनका दूध एवं नवनीत १२ रात लेकर रखे ॥६॥ द्वादशी के प्रातःकाल में जहां, उल्का का पतन होता है उससे उत्तर में अग्न्याधान करके परिसमूहन, पर्युक्षण, परिस्तरण करके और बर्हि लाकर धरे ॥८॥

र्णेन स्रुवेण रक्षोघ्नैश्च सूक्तैर्यामाहुस्तारकैषा विकेशी- त्येतेन सूक्तेनाज्यं जुह्वन् ॥ ९ ॥ अवपतिते सम्पातानानीय संस्थाप्य होमान् ॥ १० ॥ अवपतितं शान्त्युदकेन सम्प्रोक्ष्य ॥११॥ ता एव ब्राह्मणो दद्यात् ॥१२॥ सीरं वैश्योऽश्वं प्रादेशिको ग्रामवरं राजा ॥१३॥ सा तत्र प्रायश्चित्तिः ॥१४॥३४॥१२६॥

अथ यत्रैतद्धूमकेतुः सप्तर्षीनुपधूपयति तदयोगक्षेमाशङ्कमित्युक्तम् ॥१॥ पञ्च पशवस्तायन्ते वारुणः कृष्णो गौर्वाजो वाविर्वा हरिर्वायव्यो बहुरूपो दिश्यो मारुती मेष्याग्नेयः प्राजापत्यश्च क्षीरौदनोऽपां नप्त्र उद्रः ॥२॥ उतेयं भूमिरिति त्रिर्वरुणमभिष्टूय ॥३॥ अप्सु ते राजन्निति चतसृभिर्वारुणस्य जुहुयात् ॥४॥ वायवा रुन्द्धि नो मृगानस्मभ्यं मृगयद्भ्यः। स नो नेदिष्ठमा कृधि वातो हि रशनाकृत इति वायव्यस्य ॥५॥ आशानामिति दिश्य-

---

अब उस नवनीत को सोने के पात्र में गलाकर धरे ॥ और सोने के स्रुवा से रक्षोघ्न सूक्तों से "यामाहुस्तारकैषा विकेशी" इस सूक्त से आज्य की आहुती देता हुआ। गिरे हुए संपातों को लाकर और होम को संस्थापन करके ॥९॥१०॥ नीचे गिरे हुए सम्पात को शांति जल से संप्रोक्षण करके ब्राह्मण को देवे ॥११॥१२॥ सीर को वैश्य देवे, घोड़े को प्रादेशिक देवे और राजा ब्राह्मण को ग्राम देवे ॥१३॥ यह उसकी प्रायश्चित्ति है ॥१४॥३४॥१२६॥ यह एकसौ छब्बीसवी कण्डिका खतम हुई ॥

अब जहां धूमकेतु अपने प्रकाश से सप्तर्षि ताराओं को तपाता है, वहां कल्याण होने में शङ्का है। अत एव वहां पांच वारुण पशुओं को जो काली गौ या बकरा या भेड़, हरि, वायव्य, बहुरूप, दिश्य, मारुती, मेषी, आग्नेय और प्राजापत्य ॥ "क्षीरौदनोऽपां नप्त्र उद्रः" ॥२॥ "उतेयं भूमिः" इत्यादि तीन ऋ० से वरुण देव की स्तुति करके ॥३॥ "अप्सु ते राजन्०" इत्यादि ४ ऋ० से आहुती देवे ॥४॥ "वायवा रुन्धि०"

स्य ॥६॥ प्रति त्यं चारुमध्वरं गोपीथाय प्रहूयसे । मरुद्भिरग्न आ गहीति मारुतस्य ॥७॥ अपामग्निरित्याग्नेयस्य ॥८॥ प्रजापतिः सलिलादिति प्राजापत्यस्य । अपां सूक्तैर्हिरण्यशकलेन सहोद्रमप्सु प्रवेशयेत् ॥१०॥ प्र हैव वर्षति ॥११॥ सर्वस्वं तत्र दक्षिणा ॥१२॥ तस्य निष्क्रयो यथार्हं यथासम्पद्वा ॥१३॥३५॥१२७॥

अथ यत्रैतन्नक्षत्राणि पतापतानीव भवन्ति तत्र जुहुयात् ॥१॥ यन्नक्षत्रं पतति जातवेदः सोमेन राज्ञेषिरं पुरस्तात् । तस्मान्मामग्ने परिपाहि घोरात्प्र णो जायन्तां मिथुनानि रूपशः ॥ इन्द्राग्निभ्यां स्वाहेति हुत्वा ॥२॥ सोमो राजा सविता च राजेत्येतेन सूक्तेन जुहुयात् ॥३॥ सोमो राजा सविता च राजा भुवो राजा भुवनं च राजा । शर्वो राजा शर्म च राजा त उ नः शर्म यच्छन्तु देवाः ॥ आदित्यैर्नो बृहस्पतिर्भगः सोमेन नः सह । विश्वेदेवा उर्वन्तरिक्षं त उ नः शर्म यच्छन्तु देवाः । उताविद्वान्निष्कृदयाथोस्त्रघ्नी यथायथम् । मा नो विश्वेदेवा

इत्यादि से वायव्य की आहुति करे ॥५॥ "आशानां०" से दिश्य देवता की आहुति करे ॥६॥ "प्रति त्यं०" इत्यादि से मारुत की आहुति देवे ॥७॥ "अपामग्निः" इत्यादि से आग्नेय आहुति देवे ॥८॥ "सलिलात्" से प्राजापात्य आहुति देवे ॥९॥ जल सूक्तों से सोने के टुकड़े से उद्र के सहित को जल में प्रवेश करावे ॥१०॥ अवश्य ही वृष्टि होगी ॥११॥ इसकी दक्षिणा सर्वस्व देवे ॥१२॥ या उसका निष्क्रय यथाशक्ति या यथासम्पत् देवे ॥१३॥३५॥१२७॥ यह एकसौ सत्ताइसवी कण्डिका खतम हुई ॥

अब जहां नक्षत्र गण गिरते या टूट कर गिरते से जान पड़ें, वहां आहुति करे ॥१॥ "यन्नक्षत्रं पतति०" इत्यादि से आहुति करके ॥२॥ "सोमो राजा०" इत्यादि सूक्त से आहुति देवे ॥३॥४॥ कर्त्ता को दक्षिणा

मरुतो हेतिमिच्छत ॥४॥ रुक्मं कर्त्रे दद्यात् ॥५॥ सा तत्र प्रायश्चित्तिः ॥६॥३६॥१२८॥

अथ यत्रैतन्मांससमुखो निपतति तत्र जुहुयात् ॥१॥ घोरो वज्रो देवसृष्टो न आगन्यद्वा गृहान्घोरमुता जगाम । तन्निर्जगाम हविषा घृतेन शं नो अस्तु द्विपदे शं चतुष्पदे ॥ रुद्राय स्वाहेति हुत्वा ॥२॥ भवाशर्वौ मृडतं माभियातमित्येतेन सूक्तेन जुहुयात् ॥३॥ सा तत्र प्रायश्चित्तिः ॥४॥३७॥१२९॥

अथ यत्रैतदनग्नावग्वभासो भवति तत्र जुहुयात् ॥१॥ या तेऽवदीप्तिरवरूपा जातवेदोऽपेतो रक्षसां भाग एषः। रक्षांसि तया दह जावेदो या नः प्रजां मनुष्यां सं सृजन्ते ॥ अग्नये स्वाहेति हुत्वा ॥२॥ अग्नी रक्षांसि सेधतीति प्रायश्चित्तिः ॥३॥३८॥१३०॥

अथ यत्रैतदग्निः श्वसतीव तत्र जुहुयात् ॥१॥ श्वेता कृष्णा रोहिणी जातवेदो यास्ते तनूस्तिरश्चीना निर्दहन्तीः श्वसन्तीः । रक्षांसि ताभिर्दह जातवेदो या

सोना देवे ॥५॥ यह उसकी प्रायश्चित्ति है ॥६॥३६॥१२८॥ यह एकसौ अट्ठाइसवी कण्डिका खतम हुई ।

अब जहां मांस सम्मुख गिरता हो, तहां आहुति करे ॥१॥ "घोरो वज्रो०" इत्यादि से आहुति करे ॥२॥ "भवा शर्वौ०" इत्यादि सूक्त से आहुति करे ॥३॥ यह उसकी प्रायश्चित्ति है ॥४॥३७॥१२९॥ यह एकसौ उन्तीसवी कण्डिका खतम हुई ॥

अब जहां विना आग के स्थान में आग का आभास हो, तहां आहुति करे ॥१॥ "या तेऽवदीप्ति०" इत्यादि से आहुति देवे ॥२॥ "अग्नी रक्षांसि सेधति०" इत्यादि से आहुति करे यही उसकी प्रायश्चित्ति है ॥३॥३८॥१३०॥ यह एकसौ तीसवी कण्डिका खतम हुई ॥

अब जहां अग्नि सांस लेती प्रतीत होवे, तहां आहुति करे ॥१॥ "श्वेता

नः प्रजां मनुष्यां संसृजन्ते ॥ अग्नये स्वाहेति हुत्वा ॥२॥ अग्नी रक्षांसि सेधतीनि प्रायश्चित्तिः ॥३॥३९॥१३१॥

अथ यत्रैतत्सर्पिर्वा तैलं वा मधु वा विष्यन्दति यद्यामं चक्रुर्निखनन्त इत्येतेन सूक्तेन जुहुयात् ॥१॥ सा तत्र प्रायश्चित्तिः ॥२॥४०॥१३२॥

अथ यत्रैतद्ग्राम्योऽग्निः शालां दहत्यपमित्य-मप्रतीत्तमित्येतैस्त्रिभिः सूक्तैर्मैश्रधान्यस्य पूर्णाञ्जलिं हुत्वा ॥१॥ ममोभा मित्रावरुणा मह्यमापो मधुमदेरयन्ता-मित्येताभ्यां सूक्ताभ्यां जुहुयात् ॥२॥ ममोभा मित्राव-रुणा ममोभेन्द्राबृहस्पती । मम त्वष्टा च पूषा च ममैव सविता वशे ॥ मम विष्णुश्च सोमश्च ममैव मरुतो भवन् । सरस्वांश्च भगश्च विश्वेदेवा वशे मम ॥ ममो-भा द्यावापृथिवी अन्तरिक्षं स्वर्मम । ममेमाः सर्वा ओषधीरापः सर्वा वशे मम ॥ मम गावो ममाश्वा ममा-जाश्चावयश्च ममैव पुरुषा भवन् । ममेदं सर्वमात्मन्वदे-जत्प्राणद्वशे ममेति ॥३॥ अरणी प्रताप्य स्थण्डिलं परि-

---

कृष्णा०" इत्यादि आहुति करके ॥२॥ "अग्नी रक्षांसि०" से आहुति करे यही उसकी प्रायश्चित्ति है ॥३॥३९॥१३१॥ यह एकसौ एकतीसवी कण्डिका खतम हुई ।

अब जहां घी, या तेल या मधु विष्यन्द करे तो "यद्यामं चक्रुर्निख-नन्त०" इत्यादि सूक्त से आहुति करे ॥१॥ यही उसकी प्रायश्चित्ति है ॥ ॥२॥४०॥१३२॥ यह एकसौ बत्तीसवी कण्डिका खतम हुई ॥

अब जहां ग्राम्य अग्नि अग्निशालाको दहन कर देवे । तहां "अप-मित्यमप्रतीत्तं०" इत्यादि तीन सूक्तों से मैश्रधान्य की पूर्णाञ्जलि आहुति करके ॥१॥ "ममोभा मित्रावरुणा०" इत्यादि दो सूक्तों से आहुति देवे ॥ ॥२॥ "ममोभा मित्रा०" इत्यादि से ॥३॥ अरणी को तपा करके वेदि

मृज्य ॥४॥ अथाग्निं जनयेत् ॥५॥ इत एव प्रथमं जज्ञे अग्निराभ्यो योनिभ्यो अधि जातवेदाः ॥ स गायत्र्या त्रिष्टुभा जगत्यानुष्टुभा देवो देवेभ्यो हव्यं वहतु प्रजानन्निति जनयित्वा ॥ ६ ॥ भवतं नः समनसौ समोकसावित्येतेन सूक्तेन जुहुयात् ॥ ७ ॥ सा तत्र प्रायश्चित्तिः ॥८॥४१॥१३३॥

अथचेदागन्तुर्दहत्येवमेव कुर्यात् ॥१॥ सा तत्र प्रायश्चित्तिः ॥२॥४२॥१३४॥

अथ यत्रैतद्वंशः स्फोटति कपालेऽङ्गारा भवन्त्युदपात्रं बर्हिराज्यं तदादाय ॥१॥ शालायाः पृष्ठमुपसर्पति ॥२॥ तत्राङ्गारान्वा कपालं वोपनिदधात्या सन्तपनात् ॥ ३ ॥ प्राञ्चमिध्ममुपसमाधाय ॥४॥ परिसमुह्य पर्युक्ष्य परिस्तीर्य बर्हिरुदपात्रमुपसाद्य ॥५॥ परिचरणेनाज्यं परिचर्य ॥६॥ नित्यान्पुरस्ताद्धोमान्हुत्वाज्यभागौ च ॥७॥ अथ जुहोति

को मार्जन करके ॥४॥ अग्नि को उत्पादन करे ॥५॥ "इत एव प्रथमं०" इत्यादि मंत्रों से अग्नि उत्पादन करके "भवतं नः०" इत्यादि सूक्त से आहुति देवे ॥७॥ यह उसकी प्रायश्चित्ति है ॥८॥४१॥१३३॥ यह एकसौ तैतीसवी कण्डिका खतम हुई ॥

अब जहां कोई आगन्तुक आकर आग लगा देवे तो ऐसा ही करे ॥१॥ यह उसकी प्रायश्चित्ति है ॥२॥४२॥१३४॥ यह एकसौ चौंतीसवी कण्डिका खतम हुई ।

अब जहां बांस स्फोट करे और कपाल में अङ्गारें हों । तो वहां जलपात्र को लाकर ॥१॥ शाला के पीठपर अङ्गारों या कपाल को आधान करे जब तक संतपन हो ॥२॥३॥ पूर्व भाग में इध्मों का आधान करके ॥४॥ परिसमूहन, पर्युक्षण, परिस्तरण करके बर्हिकुशों को लाकर ॥५॥ परिचरण करके आज्य तैयार करके ॥६॥ नित्य पुरस्तात् होमों को और आज्यभाग के दो होमों को करके ॥७॥ अब आहुति करे ॥८॥

॥८॥ असौ वै नाम ते माताऽसौ वै नाम ते पिता। असौ वै नाम ते दूतः स्ववंशमधितिष्ठति ॥ उत्तमरात्री णाम मृत्यो ते माता तस्य ते अन्तकः पिता। समं दधानस्ते दूतः स्ववंशमधितिष्ठति ॥ बहवोऽस्य पाशा विततः पृथिव्यामसंख्येया अपर्यन्ता अनन्ताः। याभिर्वंशानभिनिद्धाति प्राणिनां यान्कांश्चेमान्प्राणभृतां जिघांसन् । स इमं दूतं नुदतु वंशपृष्ठात्स मे गच्छतु द्विषतो निवेशं मृत्यवे स्वाहा ॥ बृहस्पतिराङ्गिरसो ब्रह्मणः पुत्रो विश्वेदेवाः प्रददुर्विश्वमेजत्। स इमं दूतं नुदतु वंशपृष्ठात्स मे गच्छतु द्विषतो निवेशं बृहस्पतय आङ्गिरसाय स्वाहा ॥ यस्य तेऽन्नं न क्षीयते भूय एवोपजायते। यस्मै भूतं च भव्यं च सर्वमेतत्प्रतिष्ठितम्। स इमं दूतं नुदतु वंशपृष्ठात्स मे गच्छतु द्विषतो निवेशमिन्द्राय स्वाहा ॥ मुखं देवानामिह यो बभूव यो जानाति वयुनानां समीपे। यस्मै हुतं देवता भक्षयन्ति वायुनेत्रः सुप्रणीतः सुनीतिः। स इमं दूतं नुदतु वंशपृष्ठात्स मे गच्छतु द्विषतो निवेशमग्नये स्वाहा ॥ यः पृथिव्यां च्यावयन्नेति वृक्षान् प्रभञ्जनेन रथेन सह संविदानः। रसान् गन्धान् भावयन्नेति देवो मातरिश्वा भूतभव्यस्य कर्त्ता। स इमं दूतं नुदतु वंशपृष्ठात्स मे गच्छतु द्विषतो निवेशं वायवे स्वाहा। ब्रह्मचारी चरति ब्रह्मचर्यमृचं गाथां ब्रह्म परं जिगांसन्। तं विघ्ना अनुपरियन्ति सर्वे ये अन्तरिक्षे

"असौ वै नाम ते माता" इत्यादिसे आहुति करे॥ एवं "बृहस्पतिराङ्गिरसो०" इत्यादि से आहुति करे॥ "यस्य तेऽन्नंन०" इत्यादि से आहुति करे॥ "मुखं देवानां०" इत्यादिसे। "यः पृथिव्यां०" इत्यादि से॥

ये च दिवि श्रितासः । तं विशो अनुपरियन्ति सर्वाः कर्माणि लोके पहिमोहयन्ति । स इमं दूतं नुदतु वंश-पृष्ठात्स मे गच्छतु द्विषतो निवेशमादित्याय स्वाहा ॥ यो नक्षत्रैः सरथं याति देवः संसिद्धेन रथेन सह संविदानः । रूपं रूपं कृण्वानश्चित्रभानुः सुभानुः । स इमं दूतं नुदतु वंशपृष्ठात्स मे गच्छतु द्विषतो निवेशं चन्द्राय स्वाहा ॥ ओषधयः सोमराज्ञीर्यशस्विनीः । ता इमं दूतं नुदन्तु वंशपृष्ठात्स मे गच्छतु द्विषतो निवेशमोषधीभ्यः सोमराज्ञीभ्यः स्वाहा ॥ ओषधयो वरुणराज्ञीर्यशस्विनीः । ता इमं दूतं नुदन्तु वंशपृष्ठात्स मे गच्छतु द्विषतो निवेशमोषधीभ्यो वरुणराज्ञीभ्यः स्वाहा ॥ अष्टस्थूणो दशपक्षो यद्दच्छजो वनस्पते । पुत्रांश्चैव पशूंश्चाभिरक्ष वनस्पते ॥ यो वनस्पतीनामुपतापो बभूव यद्वा गृहान्घोरमुताजगाम तन्निर्जगाम हविषा घृतेन शं नो अस्तु द्विपदे शं चतुष्पदे ॥ यो वनस्पतीनामुपतापो न आगमद्यद्वा यज्ञं नो अद्भुतमाजगाम । सर्वं तदग्ने हुतमस्तु भागशः शिवान्वयमुत्तरेमाभिवाजान् । त्वष्ट्रे स्वाहेति हुत्वा ॥९॥ त्वष्टा मे दैव्यं वच इत्यत्रोदपात्रं निनयति ॥१०॥ कपाले अग्निं चादायोपसर्पति ॥११॥ सा तत्र प्रायश्चित्तिः ॥१२॥४३॥१३५॥

अथ यत्रैतत्कुम्भोदधानः सक्तुधानी बोखा वानि-

"ब्रह्मचारी चरति०" इत्यादि से ॥ "यो नक्षत्रैः सरथं०" इत्यादि से ॥ "ओषधयः सोमराज्ञी०" इत्यादि से ॥ "ओषधयो०" इत्यादि से ॥ "अष्टस्थूणो०" इत्यादि से ॥ आहुतियां करे ॥९॥ "त्वष्टा मे दैव्यं वचः" से जलपात्र को लावे ॥१०॥ और कपाल में अग्नि को लाकर उपसर्पण करे ॥११॥ यह उसकी प्रायश्चित्ति है ॥१२॥४३॥१३५॥ यह एकसौ पैतीसवी कण्डिका खतम हुई ॥

ङ्गिता विकसति तत्र जुहुयात् ॥१॥ भूमिर्भूमिमवागा-न्माता मातरमप्यगात् । ऋध्यास्म पुत्रैः पशुभिर्यो नो द्वेष्टि स भिद्यतामिति ॥२॥ सदसि सन्मे भूयादिति सक्तू-नावपेत् ॥३॥ अथ चेदोदनस्यान्नमस्यन्नं मे देह्यन्नं मा मा हिंसीरिति त्रिः प्राश्य ॥४॥ अथ यथाकामं प्राश्नीयात् ॥५॥ अथ चेदुदधानः स्यात्समुद्रं वः प्रहिणोमीत्येताभ्या-मभिमन्त्र्य ॥६॥ अन्यं कृत्वा ध्रुवाभ्यां दृंहयित्वा ॥७॥ तत्र हिरण्यवर्णा इत्युदकमासेचयेत् ॥८॥ स खल्वेतेषु कर्मसु सर्वत्र शान्त्युदकं कृत्वा सर्वत्र चातनान्यनुयोजये-न्मातृनामानि च ॥९॥ सर्वत्र वरां धेनुं कर्त्रे दद्यात् ॥१०॥ सर्वत्र कंसवसनं गौर्दक्षिणा ॥११॥ ब्राह्मणान् भक्तेनो-पेप्सन्ति ॥१२॥ यथोद्दिष्टं चादिष्टास्विति प्रायश्चित्तिः प्रायश्चित्तिः ॥१३॥४४॥१३६॥ इत्यथर्ववेदे कौशिकसूत्रे त्रयोदशोऽध्यायः समाप्तः ॥१३॥

अब जहां यज्ञ स्थान में कुम्भोदधान, सक्तुधानी या उखा या अनिङ्गिता विकसित हो वहां आहुति करे ॥१॥ "भूमिर्भूमि०" इत्यादि से सक्तु को वपन करे (डाले) ॥२॥३॥ "अथ चेदोदनस्यान्नं०" इत्यादि से तीन वार प्राशन करके ॥४॥ फिर यथेच्छ प्राशन करे ॥५॥ "अथ चेदुदधानः स्यात्०" इत्यादि दो ऋचाओं से अभिमंत्रण करके ॥६॥ दूसरे को बनाकर ध्रुवों से दृंहण करके ॥७॥ "हिरण्यवर्णा०" से जल का सेक करे ॥८॥ यह इन कर्मों में सर्वत्र शान्ति जल का प्रयोग करके सर्वत्र चातनों का अनुयोजन करे और मातृनामों को भी ॥९॥ सबही स्थान में सब लोग श्रेष्ठ धेनु कर्त्ता को देवें ॥१०॥ सर्वत्र कटोरा, कपड़ा, और गौ दक्षिणा देवे ॥११॥ ब्राह्मणों को ओदन भोजन करावें ॥१२॥ जैसा कहा गया वैसा या बिन कहे कर्मों के लिये यह प्रायश्चित्ति है ॥१३॥४४॥१३६॥ यह एक सौ छत्तीसवी कण्डिका समाप्त हुई ॥

यह अथर्ववेद के कौशिकसूत्र का तेरहवाँ अध्याय पूरा हुआ ॥१३॥

यथावितानं यज्ञवास्त्वध्यवसेत् ॥१॥ वेदिर्यज्ञस्याग्नेरुत्तरवेदिः ॥२॥ उभे प्रागायते किञ्चित्प्रथीयस्यौ पश्चादुद्यततरे ॥३॥ अपृथुसंमितां वेदिं विदध्यात् ॥४॥ षट्शमीं प्रागायतां चतुःशमीं श्रोण्याम् ॥५॥ त्रीन् मध्ये अधचतुर्थानग्रतः ॥६॥ त्रयाणां पुरस्तादुत्तरवेदिं विदध्यात् ॥७॥ द्विश्शमीं प्रागायतामृज्वीमध्यर्धशमीं श्रोण्याम् ॥८॥ ग्रीष्मस्ते भूम इत्युपस्थाय ॥९॥ विमिमीष्व पयस्वतीमिति मिमानमनुमन्त्रयते ॥१०॥ बृहस्पते परिगृह्णाण वेदिं सुगा वो देवाः सदनानि सन्तु । अस्यां बर्हिः प्रथतां साध्वन्तरहिंस्रा णः पृथिवी देव्यस्त्विति परिगृह्णाति ॥११॥ यत्ते भूम इति विखनति ॥१२॥ यत्त ऊनमिति संवपति ॥१३॥ त्वमस्यावपनी जनानामिति ततः पांसूनन्यतोदाहार्य ॥१४॥ बृहस्पते परिगृह्णाण वेदिमित्युत्तरवेदिमोप्यमानां परिगृह्णाति ॥१५॥ असम्बाधं बध्यतो मानवानामिति प्रथ-

---

यज्ञ के अनुसार (बड़े, छोटे आदि) यज्ञ गृह बनावे ॥१॥ अग्नि के उत्तर यज्ञवेदि बनावे। दोनों पूर्व-पश्चिम चौड़ा एवं कुछ मोटे हों उत्तर-दक्षिण लम्बी हो ॥ २ ॥ ३ ॥ अपृथु सम्मित वेदि बनावे ॥४॥ छः शमी पूर्वायत हों और चार शमी को श्रोणी में धरे ॥५॥ तीन को मध्य में, साढ़े चार शमी को आगे में ॥ ६ ॥ तीनों के पूर्व उत्तर वेदिको बनावे ॥ ७ ॥ दो शमी को पूर्वायता ऋज्वी हों और चौथाई शमी श्रोणी पर धरे ॥८॥ "ग्रीष्मस्ते भूम०" से उपस्थान करके ॥९॥ "विमिमीष्व पयस्वतीं०" से नापनेवाले को अनुमंत्रण करे ॥१०॥ "बृहस्पते परिगृह्णाण०" इत्यादि से परिग्रहण करे ॥११॥ "यत्ते भूम०" से भूमि को खनन करे ॥१२॥ "यत्त ऊनं०" से भर देवे ॥१३॥ "त्वमस्यावपनी०" इत्यादि से दूसरी जगह से धूलि को लाकरके ॥१४॥ "बृहस्पते परिगृह्णाण वेदिं०" इत्यादि से वेदि को भरते हुए को परिग्रहण करे ॥१५॥ "असंबाधं बध्यतो मानवानां०" से वेदि को पूर्व को ढालुआ बनावे और बालु को उस पर

यति ॥१६॥ यस्याश्चतस्रः प्रदिशः पृथिव्या इति चतुरस्रां करोति ॥१७॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे इति लेखनमादाय यत्राग्निं निधास्यन्भवति तत्र लक्षणं करोति ॥१८॥ इन्द्रः सीतां निगृह्णात्विति दक्षिणत आरभ्योत्तरत आलिखति॥१९॥ प्राचीमावृत्य दक्षिणतः प्राचीम् ॥२०॥ अपरास्तिस्रो मध्ये ॥२१॥ तस्यां व्रीहियवावोप्य ॥२२॥ वर्षेण भूमिः पृथिवी वृतावृतेत्यद्भिः सम्प्रोक्ष्य ॥२३॥ यस्यामन्नं व्रीहियवाविति भूमिं नमस्कृत्य ॥२४॥ अथाग्निं प्रणयेत् । त्वामग्ने भृगवो नयन्तामङ्गिरसः सदनं श्रेय एहि । विश्वकर्मा पुर एतु प्रजानन्धिष्ण्यं पन्थामनु ते दिशामेति ॥२५॥ भद्रश्रेयःस्वस्त्या वा ॥२६॥ अग्ने प्रेहीति वा॥२७॥ विश्वम्भरा वसुधानी प्रतिष्ठेति लक्षणे प्रतिष्ठाप्य ॥२८॥ अथेध्ममुपसमादधाति ॥२९॥ अग्निर्भूम्यामोषधीष्वग्निर्दिव आ तपत्यग्निवासाः पृथिव्यसितज्ञूरेतमिध्मं

बिछावे ॥१६॥ "यस्याश्चतस्रः प्रदिशः पृथिव्या" इत्यादि से चौकोन वेदि बनावे ॥१७॥ "देवस्य त्वा०" इत्यादि से लेखन को लेकर, जहाँ अग्नि का आधान करना होगा, वहाँ रेखायें खैंचे ॥१८॥ "इन्द्रः सीतां निगृण्हातु०" से दक्षिण से आरम्भ कर उत्तर तक रेखा करे ॥१९॥ पूर्व से लेकर दक्षिण पश्चिम रेखा करे ॥२०॥ दूसरी तीन रेखायें मध्य भाग में करे ॥२१॥ उसमें व्रीहि, यव को डाले ॥२२॥ "वर्षेण भूमिः पृथिवी वृतावृता०" से जल से संप्रोक्षण करके ॥२३॥ "यस्यामन्नं व्रीहियवौ०" से भूमि को नमस्कार करके ॥२४॥ अब अग्नि को प्रणयन करे "त्वामग्ने भृगवो०" इत्यादि से ॥२५॥ या "भद्रश्रेयःस्वस्त्या०" से ॥२६॥ या "अग्ने प्रेह०" से आहुति करे ॥२७॥ "विश्वंभरावसुधानी०" इत्यादि से रेखाओं को प्रतिष्ठा करके ॥२८॥ अब इध्मों का आधान करे ॥ २९ ॥ "अग्निर्भूम्यामोषधी०" इत्यादि पाँच ऋचा से स्तरण करे

समाहितं जुषाणोऽस्मै क्षत्राणि धारयन्तमग्न इति पञ्चभिः स्तरणम् ॥३०॥ अत ऊर्ध्वं बर्हिषः ॥३१॥ त्वं भूमिमत्येष्योजसेति दर्भान् सम्प्रोक्ष्य ॥३२॥ ऋषीणां प्रस्तरोऽसीति दक्षिणतोऽग्नेर्ब्रह्मासनं निदधाति ॥३३॥ पुरस्तादग्नेरुदक्संस्तृणाति ॥३४॥ तथा प्रत्यक् ॥३५॥ प्रदक्षिणं बर्हिषां मूलानि च्छादयन्तोत्तरस्या वेदिश्रोणेः पूर्वोत्तरतः संस्थाप्य ॥३६॥ अहे दैधिषव्योदतस्तिष्ठान्यस्य सदने सीद योऽस्मत्पाकतर इति ब्रह्मासनमन्वीक्षते ॥३७॥ निरस्तः परावसुः सह पाप्मना निरस्तः सोऽस्तु योऽस्मान् द्वेष्टि यं च वयं द्विष्म इति दक्षिणा तृणं निरस्यति ॥३८॥ तदन्वालभ्य जपतीदमहमर्वाग्वसोः सदने सीदाम्यृतस्य सदने सीदामि सत्यस्य सदने सीदामीष्टस्य सदने सीदामि पूर्तस्य सदने सीदामि मामृषदेव बर्हिः स्वासस्थं स्वाध्यासदेयमूर्णम्रदमनभिशोकम् ॥३९॥ विमृग्वरीमित्युपविश्यासनीयं ब्रह्मजपं जपति बृहस्पतिर्ब्रह्मा ब्रह्मसदन आसिष्यते बृहस्पते यज्ञं गोपाय यदुदुद्वत उन्निवतः शकेयम् ॥४०॥ पातं मा द्यावापृथिवी अद्यान्न

॥३०॥ इसके पश्चात् बर्हि कुशों को ॥३१॥ "त्वं भूमिं०" से अग्नि के दक्षिण भाग में ब्रह्मा का आसन बिछावे ॥३३॥ अग्नि के पूर्व उत्तराग्र कुशों को बिछावे ॥३४॥ उसी प्रकार पश्चिम में उत्तराग्र कुशों को बिछावे ॥३५॥ प्रदक्षिण क्रम कुशों से वेदि के उत्तर कोण तक आच्छादन हो यों पूर्व उत्तर को संस्थापन करके ॥३६॥ "अहे दैधिषव्यो०" इत्यादि से ब्रह्मा के आसन को देखे ॥३७॥ "निरस्तः परावसुः" इत्यादि से दक्षिण दिशा में तृण को फेंक देवे ॥ ३८ ॥ उसको छूकर जप करे "इदमहमर्वाग्वसोः सदने०" इत्यादि से बैठकर आसनीय ब्रह्म जप को जप करे ॥ "बृहस्पतिर्ब्रह्मा०" इत्यादि से द्यावा और पृथिवी को देखे

इति द्यावापृथिव्यौ समीक्षते ॥४१॥ सविता प्रसवाना-मिति कर्मणिकर्मण्यभितोऽभ्यातानैराज्यं जुहुयात्॥४२॥ व्याख्यातं सर्वपाकयज्ञियं तन्त्रम् ॥४३॥१॥१३७॥

अष्टकायामष्टकाहोमाञ्जुहुयात् ॥१॥ तस्या हवींषि धानाः करम्भः शष्कुल्यः पुरोडाश उदौदनः क्षीरौदनस्ति-लौदनो यथोपपादिपशुः ॥२॥ सर्वेषां हविषां समुद्धृत्य ॥३॥ दर्व्या जुहुयात्प्रथमा ह व्युवास सेति पञ्चभिः ॥४॥ आयमागन्संवत्सर इति चतसृभिर्विज्ञायते ॥५॥ ऋतुभ्यस्त्वेति विग्राहमष्टौ ॥६॥ इन्द्रपुत्र इत्यष्टादशीम् ॥७॥ अहोरात्राभ्यामित्यूनविंशीम् ॥८॥ पशावुपपद्य-माने दक्षिणं बाहुं निर्लोमं सचर्म सखुरं प्रक्षाल्य ॥९॥ इडायास्पदमिति द्वाभ्यां विंशीम् ॥१०॥ अनुपपद्यमान आज्यं जुहुयात् ॥११॥ हविषां दर्विं पूरयित्वा पूर्णा दर्वे

॥३९॥४०॥४१॥ "सविता प्रसवानां०" इत्यादि प्रत्येक कर्म में अभ्या-तान मंत्रों से आज्य की आहुतियाँ देवे ॥४२॥ सर्व पाकयज्ञिय तन्त्र का व्याख्यान हुआ ॥४३॥१॥१३७॥ यह एकसौ सैंतीसवी कण्डिका पूरी हुई ॥

अष्टकाओंमें अष्टकाहोमों की आहुतियाँ देवे ॥१॥ उसकी आहुति के लिये धाना, करम्भ, पूरियाँ, पुरोडाश, जल में पका भात, क्षीरौदन, तिलौ-दन यथोपपादि पशु ॥२॥ सब ही हवियों को निकालकर ॥३॥ दर्वी से आहुतियाँ देवे "प्रथमा ह व्युवास०" इन पाँच ऋ० से आहुतियाँ करे ॥४॥ "आयमागन्संवत्सर०" इन चार से आहुतियाँ देनी जान पड़ती है ॥५॥ "ऋतुभ्यस्त्वा०" से भी आठ आहुतियाँ ॥६॥ "इन्द्रपुत्र०" इत्यादि से अठारहवी ॥ ७ ॥ "अहोरात्राभ्यां०" से उन्नीसवी ॥ ८ ॥ यदि पशु मिल जावे तो दहिने बाहु को लोम रहित, चर्म सहित, खुर सहित को प्रक्षालन करके ॥ ९ ॥ "इडायास्पदं०" इन दो ऋ० से बीसवी आहुति ॥१०॥ यदि पशु न मिले तो आज्य की आहुति करे ॥११॥ हवियों में दर्वी को डाल कर भर लेवे "पूर्णा दर्वे०" से दर्वी सहित आहुति देवे।

इति सदर्वीमेकविंशीम् ॥१२॥ एकविंशतिसंस्थो यज्ञो विज्ञायते ॥१३॥ सर्वा एव यज्ञतनूरवरुन्द्धे सर्वा एवास्य यज्ञतनूः पितरमुपजीवन्ति य एवमष्टकामुपैति ॥१४॥ न दर्विहोमे न हस्तहोमे न पूर्णहोमे तन्त्रं क्रियेतेत्येके ॥१५॥ अष्टकायां क्रियेतेतीषुफालिमाठरौ ॥१६॥२॥१३८॥

अभिजिति शिष्यानुपनीय श्वो भूते सम्भारान् सम्भरति ॥१॥ दधिसक्तून्पालाशं दण्डमहते वसने शुद्ध-माज्यं शान्ता ओषधीर्नवमुदकुम्भम् ॥२॥ बाह्यतः शान्त-वृक्षस्यैध्मं प्राञ्चमुपसमाधाय ॥३॥ परिसमुह्य पर्युक्ष्य परिस्तीर्य बर्हिरुदपात्रमुपसाद्य परिचरणेनाज्यं परिचर्य ॥४॥ नित्यान् पुरस्ताद्धोमान् हुत्वाज्यभागौ च ॥५॥ पश्चादग्नेर्दधिसक्तूञ्जुहोत्यग्नये ब्रह्मप्रजापतिभ्यां भृग्व-ङ्गिरोभ्य उशनसे काव्याय ॥६॥ ततोऽभयैरपराजितैर्गण-

---

यह इक्कीसवी हुई ॥१२॥ इक्कीस संस्थ यज्ञ है ऐसा जान पड़ता है ॥१३॥ सब ही यज्ञ तनू को रोक लेता है। सब ही इसके यज्ञतनू से पितर लोगों का उपजीवन होता है जो अष्टका को करता है ॥१४॥ न दर्वि होम में, न हस्त होम में, न पूर्ण होम में तन्त्र को करे—ऐसा बहुत से आचार्य्य कहते हैं ॥१५॥ "अष्टका में करे" यह इषुफालि एवं माठर कहते हैं ॥१६॥२॥१३८॥ यह एकसौ अड़तीसवी कण्डिका पूरी हुई ॥

अभिजित् नक्षत्र के साथ जब चन्द्रमा हों तो शिष्यों को पास बुलाकर प्रातःकाल सामग्रियों को एकत्र करे ॥१॥ दही, सत्तू, पलाश का दण्ड, अखण्ड नये दो वस्त्र, शुद्ध आज्य, शान्ता ओषधी, नये घड़े ॥२॥ बाहर से शान्त वृक्ष के इध्मों को पूर्व को आधान करे ॥३॥ परिसमूहन, पर्युक्षण, परिस्तरण करके बर्हि कुश और जलपात्र लाकर यथाविधि परिचर्या करके ॥४॥ नित्य पुरस्तात् होम और आज्यभाग के दो होमों को करके ॥५॥ अग्नि के पश्चिम भाग में दही एवं सत्तू से "अग्नये ब्रह्मप्रजापतिभ्यां भृग्वङ्गिरोभ्य उशनसे काव्याय" की आहुति करके तब अभय गण, अपराजित गण, गणकर्म गण, विश्वकर्म गण, आयुष्य गण,

कर्मभिर्विश्वकर्मभिरायुष्यैः स्वस्त्ययनैराज्यं जुहुयात् ॥७॥ मा नो देवा अहिर्वधीद्रसस्य शर्कोटस्येन्द्रस्य प्रथमो रथो यस्ते सर्पो वृश्चिकस्तृष्टदंश्मा नमस्ते अस्तु विद्युत आरेऽसावस्मदस्तु यस्ते पृथु स्तनयित्नुरिति संस्थाप्य होमान् ॥८॥ प्रतिष्ठाप्य स्रुवं दधिसक्तून्प्राश्याचम्योदकमुपसमारभन्ते ॥९॥ अव्यचसश्चेति जपित्वा सावित्रीं ब्रह्म जज्ञानमित्येकां त्रिषप्तीयं च पच्छो वाचयेत् ॥१०॥ शेषमनुवाकस्य जपन्ति ॥११॥ यो यो भोगः कर्त्तव्यो भवति तं तं कुर्वते ॥१२॥ स खल्वेतं पक्षमपक्षीयमाणः पक्षमनधीयान उपश्राम्येतादर्शात् ॥१३॥ दृष्टे चन्द्रमसि फल्गुनीषु द्वयान्रसानुपसादयति ॥१४॥ विश्वे देवा अहं रुद्रेभिः सिंहे व्याघ्रे यशो हविर्यशसं मेन्द्रो गिरावरागराटेषु यथा सोमः प्रातःसवने यच्च वर्चो अक्षेषु येन महानघ्न्या जघनं स्वाहेत्यग्नौ हुत्वा ॥१५॥ रसेषु सम्पातानानीय संस्थाप्य होमान् ॥१६॥ तत एतान्प्राशयति रसान्समधुघृताञ्छिष्यान् ॥१७॥ यो यो भोगः

स्वस्त्ययन गण, इन सूक्तों के मंत्रों से आहुतियाँ देवे ॥७॥ "मा नो देवा०" इत्यादि से आहुतियाँ देवे और होमों को संस्थापन करके ॥८॥ स्रुव को धरकर, दधि सत्तू को प्राशन करके आचमन करके जल के पास जावे ॥९॥ "अव्यचसश्च०" इत्यादि का जप करके सावित्री को, "ब्रह्म जज्ञानं०" इस एक ऋचा को और त्रिषप्तीय को पद २ करके बाचें ॥१०॥ शेष अनुवाक का जप करे। जो २ भोग करना हो, उस २ को करे। वह अवश्य ही इस पक्ष को, अपक्षीयमाण पक्ष को नहीं पढ़ते हुए पर्व तक विश्राम करे ॥११॥१२॥१३॥ जब चन्द्रमा फल्गुनी नक्षत्र पर हों तो दो रसों को लाकर "विश्वे देवा०" इत्यादि से अग्नि में आहुति करके ॥१४॥१५॥ रसों में सम्पातों को लाकर होमों को संस्थापन करके ॥१६॥ इसके पश्चात् इन रसों को तीन शिष्यों को प्राशन करावे (मधु, रस,

कर्तव्यो भवति तं तं कुर्वते ॥१८॥ नान्यत आगतान्छि-ष्यान् परिगृह्णीयात्परसन्दीक्षितत्वात् ॥१९॥ त्रिरात्रोनां-श्चतुरो मासाञ्छिष्येभ्यः प्रब्रूयादर्धपञ्चमान् वा ॥२०॥ पादं पूर्वरात्रेऽधीयानः पादमपररात्रे मध्यरात्रे स्वपन्॥२१॥ अभुक्त्वा पूर्वरात्रेऽधीयान इत्येके ॥२२॥ यथाशक्त्यपर-रात्रे दुष्परिणामो ह पादः ॥२३॥ पौष्यस्यापरपक्षे त्रिरात्रं नाधीयीत ॥२४॥ तृतीयस्याः प्रातः समासं सन्दिश्य यस्मात्कोशादित्यन्तः ॥२५॥ यस्मात्कोशादुदभराम वेदं तस्मिन्नन्तरवदध्म एनम् । अधीतमिष्टं ब्रह्मणो वीर्येण तेन मा देवास्तपसावतेहेति ॥२६॥ यो यो भोगः कर्तव्यो भवति तं तं कुर्वते ॥२७॥ ये परिमोक्षं कामयन्ते ते परि-मुच्यन्ते ॥२८॥३॥१३९॥

घृत,) ॥१७॥ जो २ भोग करना हो, उस २ को भोग करे ॥१८॥ अन्य स्थानों से आये हुए शिष्यों को रसों को प्राशन न करावे क्योंकि उनकी दीक्षा दूसरे आचार्यों से मिली है ॥१९॥ तीन रात न्यून चार मास तक आचार्य्य शिष्यों को प्रवाचन करे या साढ़े पाँच महीने ॥२०॥ रात्रि के पूर्व भाग में एक पाद और आधी रात्रि के पीछे एक पाद पढ़े, रात्रि के मध्य भाग में शयन करे ॥२१॥ विना भोजन किये हुए रात के पूर्व भाग में पढ़े ऐसा किन्हीं का मत है ॥२२॥ यथाशक्ति अपर रात्र में पढ़े, इस समय पाद पढ़ने का परिणाम बुरा होता है क्योंकि पाद दुष्प-रिणाम है ॥२३॥ पौष्य मास के अपर पक्ष में तीन रात्रि न पढ़े ॥२४॥ तृतीया के प्रातःकाल समास को आरम्भ कर "यस्मात् कोशात्" इस अन्त तक ॥२५॥ "यस्मात् कोशादुदभराम वेदं तस्मिन्नन्तरवदध्म एनम् । अधीतमिष्टं ब्रह्मणो वीर्येण तेन मा देवास्तपसावतेहेति ॥२६॥ यो यो भोगः कर्तव्यो भवति तं तं कुर्वते ॥२७॥ ये परिमोक्षं कामयन्ते ते परिमुच्यन्ते" ॥२८॥३॥१३९॥ यह एकसौ उनतालीसवी कण्डिका पूरी हुई ॥

अथ राज्ञामिन्द्रमहस्योपाचारकल्पं व्याख्यास्यामः ॥१॥ प्रोष्ठपदे शुक्लपक्षे अश्वयुजे वाष्टम्यां प्रवेशः ॥२॥ श्रवणेनोत्थापनम् ॥ ३ ॥ संभृतेषु संभारेषु ब्रह्मा राजा चोभौ स्नातावहतवसनौ सुरभिणौ व्रतवन्तौ कर्मण्या-वुपवसतः ॥४॥ श्वो भूते शं नो देव्याः पादैरर्धर्चाभ्यामृचा षट्कृत्वोदकमाचामतः ॥५॥ अर्वाञ्चमिन्द्रं त्रातारमिन्द्रः सुत्रामेत्याज्यं हुत्वा ॥६॥ अथेन्द्रमुत्थापयन्ति ॥७॥ आ त्वाहार्षं ध्रुवा द्यौर्विशस्त्वा सर्वा वाञ्छन्त्विति सर्वतो-ऽप्रमत्ता धारयेरन् ॥८॥ अद्भुतं हि विमानोत्थितमुपति-ष्ठन्ते ॥ ९ ॥ अभिभूर्यज्ञ इत्येतैस्त्रिभिः सूक्तैरन्वारब्धे राजनि पूर्णहोमं जुहुयात् ॥१०॥ अथ पशूनामुपाचारम् ॥११॥ इन्द्रदेवताः स्युः ॥१२॥ ये राज्ञो भृत्याः स्युः सर्वे दीक्षिता ब्रह्मचारिणः स्युः ॥१३॥ इन्द्रं चोपसद्य यजेरंस्त्रि-रात्रं पञ्चरात्रं वा ॥१४॥ त्रिरयनमहामुपतिष्ठन्ते हविषा च

अब राजाओं के इन्द्र महोत्सव का आचार कल्प को कहेंगे ॥१॥ भादो मास के शुक्लपक्ष में या आश्विन के अष्टमी को प्रवेश करे ॥२॥ और श्रावण मास में उत्थापन करे ॥३॥ सामग्रियों के जुट जाने पर ब्रह्मा और राजा दोनों, स्नान करके अखण्ड नये वस्त्र पहिने हुए, सुगन्धि से युक्त, व्रती, कर्म में उपवास रहते हुए ॥४॥ प्रातःकाल "शन्नो देव्या०" इत्यादि के पादों, आधी ऋचाओं से छः बार जल से आचमन करते हुए ॥५॥ "अर्वाञ्चमिन्द्रं०" से आज्य की आहुति करके ॥६॥ अब इन्द्र को उत्थापन करे ॥७॥ "आ त्वा हार्षं०" इत्यादि से सब ओर अप्रमत्त हो धारण करे ॥८॥ क्योंकि आश्चर्य है उठाये हुए विमान का उपस्थान करना ॥९॥ "अभिभूर्यज्ञ०" इन तीन ऋचाओं के सूक्तों से अन्वारब्ध करके राजा पूर्ण होम करे ॥१०॥ अब पशु के उपचार को कहते हैं ॥११॥ इन्द्र देवता होवें ॥१२॥ जो राजा के नौकर होवें वे सब दीक्षित ब्रह्मचारी होवें ॥ १३ ॥ इन्द्र के पास पहुँच कर तीन रात्रि या पाँच

यजन्ते ॥१५॥ आवृत्त इन्द्रमहमिति ॥१६॥ इन्द्र क्षत्रमिति हविषो हुत्वा ब्राह्मणान् परिचरेयुः ॥१७॥ न संस्थितहोमाञ्जुहुयादित्याहुराचार्याः ॥१८॥ इन्द्रस्यावभृथादिन्द्रमवभृथाय व्रजन्ति ॥१६॥ अपां सूक्तैराप्लुत्य प्रदक्षिणमावृत्याप उपस्पृश्यानवेक्षमाणाः प्रत्युदाव्रजन्ति ॥२०॥ ब्राह्मणान् भक्तेनोपेप्सन्ति ॥२१॥ श्वः श्वोऽस्य राष्ट्रं ज्यायो भवत्येकोऽस्यां पृथिव्यां राजा भवति न पुरा जरसः प्रमीयते य एवं वेद यश्चैवं विद्वानिन्द्रमहेण चरति ॥ २२॥४॥१४०॥

अथ वेदस्याध्ययनविधिं वक्ष्यामः ॥१॥ श्रावण्यां प्रौष्ठपद्यां वोपाकृत्यार्धपञ्चमान्मासानधीयीरन् ॥ २ ॥ एवं छन्दांसि ॥३॥ लोम्नां चानिवर्तनम् ॥४॥ अर्धमासं चोपाकृत्य क्षपेरंत्र्यहमुत्सृज्य । आरम्भः श्रावण्या-

---

रात पूजा करे ॥ १४ ॥ तीन अयन दिनों का उपस्थान करें आहुतियों से यज्ञ करे ॥ १५ ॥ इन्द्र को घेर, "इन्द्रमहं०" से आहुति करे। "इन्द्र क्षत्रं०" से हवियों की आहुति करके, ब्राह्मणों की परिचर्या करें ॥१६॥१७॥ आचार्यगण कहते हैं कि संस्थित होमों को न करे ॥१८॥ इन्द्र के अवभृथ से इन्द्र के अवभृथ के लिये जावें ॥ १९ ॥ जल सूक्त से स्नान कर, प्रदक्षिण फेरे लगाकर, जल छूकर, नहीं देखते हुए, आवें ॥ २० ॥ ब्राह्मण चाहें उनको देकर उन्हें प्रसन्न करें ॥ २१ ॥ दिन २ इसका राष्ट्र बढ़े, पृथिवी का राजा होवे और बुढ़ापेसे पहिले इसकी मृत्यु न होवे। जो ऐसा जानता है और जो विद्वान् इन्द्र महोत्सव जैसा करता है ॥२२॥४॥१४०॥ यह एकसौ चालीसवी कण्डिका खतम हुई ॥

अब वेद का अध्ययन विधि को कहेंगे ॥ १ ॥ श्रावण की पौर्णमासी या भाद्रपद की पौर्णमासी को वेद का उपाकृत्य (आरम्भ) कर साढ़े पाँच महीने पढ़ें ॥ २ ॥ इसी प्रकार छन्दों को पढ़ें ॥ ३ ॥ लोमों को न कटवावें ॥ ४ ॥ अर्ध मास तक आरम्भ करके तीन दिन पढ़ना बन्द

मुक्तः पौष्यामुत्सर्ग उच्यते ॥५॥ अथानध्यायान्वक्ष्यामः ॥६॥ ब्रह्मज्येषु निवर्तते ॥७॥ श्राद्धे ॥८॥ सूतकोत्थान-च्छर्दनेषु त्रिषु चरणम् ॥९॥ आचार्योस्तमिते वा येषां च मानुषी योनिः ॥१०॥ यथा श्राद्धं तथैव तेषु ॥११॥ सर्वं च श्राद्धिकं द्रव्यमदसाहव्यपेतं प्रतिगृह्यानध्यायः ॥१२॥ प्राणि चाप्राणि च ॥१३॥ दन्तधावने ॥१४॥ क्षुरसंस्पर्शे ॥१५॥ प्रादुष्कृतेष्वग्निषु ॥१६॥ विद्युतार्धरात्रे स्तनिते ॥१७॥ सप्तकृत्वो वर्षेण विरत आप्रातराशम् ॥१८॥ वृष्टे ॥१९॥ निर्घाते ॥२०॥ भूमिचलने ॥२१॥ ज्योतिषोपसर्जन ऋता-वप्याकालम् ॥ २२ ॥ विषमे न प्रवृत्तिः ॥ २३ ॥ अथ प्रमाणं वक्ष्यामः समानं विद्युदुल्कयोः। मार्गशीर्षपौषमा-घापरपक्षेषु तिस्रोऽष्टकाः ॥२४॥ अमावास्यायां च ॥२५॥ त्रीणि चानध्ययनानि ॥२६॥ जनने मरणे चैव दश-

---

करके, श्रावणी में आरम्भ करना कहा गया और पौष की पौर्णमासी को पढ़ना छोड़ देवें ॥५॥ अब अनध्यायों को कहेंगे ॥ ६ ॥ ब्रह्मज्यों में छोड़े ॥ ९ ॥ आचार्य सूर्यास्त होने पर या जिनके घर में प्रसव होवे उनको सूतक तक न पढ़ना चाहिये ॥ १० ॥ जैसा श्राद्ध वैसा ही उनके लिये भी ॥ ११ ॥ सब ही श्राद्धिक दशाह तक प्रत्येक गृही को वर्ज्य है ॥१२॥ जीवधारी या अप्राणि हो ॥१३॥ दन्तधावन में, नापित के क्षुर के संसर्ग में, प्रादुष्कृत अग्नि में, आधी रात को बिजुली कड़कने में ॥१४॥१५॥१६॥१७॥ सात बार तक पढ़ने से विरत रहे जब तक प्रातःकालिक भोजन हो ॥१८॥ वर्षा होने में, उल्कापात में, भूमिकम्प में ॥१८॥१९॥२०॥२१॥ ज्योतिष (प्रकाश का छिप जाना) के उप-सर्जन में, ऋतु में भी जब तक काल हो ॥२२॥ संकट में प्रवृत्ति न करे ॥२३॥ अब प्रमाण को कहते हैं। बिजुली एवं उल्कापात में समान दोष है ॥२४॥ अग्रहण, पौष, माघ के अपर पक्षों में तीन अष्टकायें होती हैं ॥२४॥ और अमावास्या में भी ॥२५॥ और तीन ही अनध्याय हैं ॥२६॥

रात्रो विधीयते ॥ आचार्ये दशरात्रं स्यात्सर्वेषु च स्व-योनिषु ॥२७॥ सूतके स्वेको नाधीयीत त्रिरात्रमुपाध्यायं वर्जयेत् ॥२८॥ आचार्यपुत्रभार्याश्च ॥२९॥ अथ शिष्यं सहाध्यायिनमप्रधानगुरुं चोपसन्नमहोरात्रं वर्जयेत्॥३०॥ तथा सब्रह्मचारिणं राजानं च ॥३१॥ अपर्तुदैवमाकालम् ॥३२॥ अविशेषर्तुकालेन सर्वे निर्घातादयः स्मृताः । यच्चान्यद्दैवमद्भुतं सर्वं निर्घातवद् भवेत्॥३३॥ ऋतावध्या-यश्छान्दसः काल्प्य आपर्तुकः स्मृतः ॥ ऋतावूर्ध्वं प्रात-राशाद्यस्तु कश्चिदनध्यायः । सन्ध्यां प्राप्नोति पश्चिमाम् ॥३४॥ सर्वेण प्रदोषो लुप्यते ॥३५॥ निशि निगदायां च विद्युति शिष्टं नाधीयीत ॥३६॥ अस्तमिते द्विसत्तायां त्रिसत्तायां च पाटवः । अथ तावत्कालं भुक्त्वा प्रदोष

जन्म और मरण में दश रात्रि अशौच होता है, आचार्य के मरण में भी दश रात अशौच होता है, सब ही सगोत्री को अशौच होता है ॥२७॥ तक में एकही न पढ़े, तीन रात उपाध्याय के पास जाना बन्द कर देवे ॥२८॥ आचार्य, पुत्र, उनकी भार्या, इनके पास न जावे तीन रात तक ॥२९॥ अब शिष्य जो साथ पढ़ता है, और अप्रधान गुरु, जो पास रहते हैं उनके पास एक दिन रात न जावे ॥३०॥ उसी प्रकार साथ के ब्रह्मचारी और राजा के पास भी एक दिन रात न जावे ॥३१॥ अपर्तु-दैव अर्थात् ऋतु अस्वाभाविक हो एवं दैवी उपद्रव हो तो जब तक अच्छा समय न हो तब तक न पढ़े ॥३२॥ अविशेष ऋतुकाल में सबही को वज्रपात की भांति अपसमय जानना ॥ और भी जितने अद्भुत हैं सबही वज्रपात की भांति हैं ॥३३॥ ऋतु में छन्दों का पढ़ना और कल्प पढ़ना अपर्तु में । ऋतु के पश्चात् प्रातराश। तक जो कोई अनध्याय है। सायंकाल होने पर (सायंकाल) ॥३४॥ सबही के मत से प्रदोष काल (रात्रि का आरम्भ) दूषित है ॥ ३५ ॥ रात्रि में निगदा (निःशब्द होने में) काल में, बिजुली कड़कने में न पढ़े ॥३६॥ अस्तमित काल में, दो या तीन सन्धिकाल में न पढ़े ॥ प्रदोष, दोनों सन्ध्या, जल में,

उभे सन्ध्ये ॥३७॥ अप्सु श्मशाने शय्यायामभिशस्ते खिलेषु च ॥ अन्तःशवे रथ्यायां ग्रामे चाण्डालसंयुते ॥३८॥ दुर्गन्धे शूद्रसंश्रावे पैङ्गे शब्दे भये रुते । वैधृते नगरेषु च ॥३९॥ अनिक्तेन च वाससा चरितं येन मैथुनम् । शयानः प्रौढपादो चाग्रतोपस्थान्तिके गुरोः ॥४०॥ विरम्य मारुते शीघ्रे प्रत्यारम्भो विभाषितः ॥ सर्वेणापररात्रेण विरम्य प्रत्यारम्भो न विद्यते ॥ ४१ ॥ पौषी प्रमाणमभ्रेष्वापर्तु चेदधीयानाम् ॥४२॥ वर्षं विद्युत्स्तनयित्नुर्वा विपद्यते ॥४३॥ त्रिरात्रं स्थानासनं ब्रह्मचर्यमरसाशं चोपेयुः ॥ ४४ ॥ सा तत्र प्रायश्चित्तिः सा तत्र प्रायश्चित्तिः ॥४५॥५॥१४१॥

इत्यथर्ववेदे कौशिकसूत्रे चतुर्दशोऽध्यायः समाप्तः ॥१४॥

॥ इति कौशिकसूत्रं समाप्तम् ॥

श्मशान में, बिछावन (शयन स्थान में) पर, जिस स्थान में शव हो, गली में, जिस ग्राम में चाण्डाल रहता हो, दुर्गन्ध स्थान में, शूद्र के संश्राव में, पैङ्ग के शब्द होने में, भय में, जानवरों के बोलने पर, वैधृत्य में, नगरों में न पढ़े ॥ ३७॥ ३८॥ ३९॥ जिस वस्त्र से मैथुन किया है उसको जल से प्रक्षालन किया और उसी को पहने हुआ हो, सोता हुआ, प्रौढ़ पैरों से गुरु के पास बैठकर न पढ़े ॥४०॥ वायु शीघ्र गति से बहती समय पढ़ना बन्द कर देवे और आधी रात्र के पश्चात् पढ़ना बन्द कर देवे ॥४१॥ पौष में यदि बादल लग जावे और अपर्तु हो तो न पढ़े ॥४२॥ वृष्टि, बिजुली, बादल इनसे विपद् ग्रस्त हो तो न पढ़े ॥४३॥ तीन रात, स्थान, आसन, ब्रह्मचर्य, रसरहित भोजन करके नियमित रहे ॥४४॥ यह उसकी प्रायश्चित्ति है। यह उसकी प्रायश्चित्ति है॥४५॥५॥१४१॥ यह एकसौ एकताळीसवी कण्डिका खतम हुई ।

यह अथर्ववेद के कौशिक सूत्र के ठा० उदयनारायण सिंह मधुरापुर, जिला मुजफ्फरपुर कृत भाषानुवाद का चौदहवाँ अध्याय समाप्त हुआ ॥१४॥
और कौशिक सूत्र भी समाप्त हुआ ।

पुस्तक मिलने का पता--

ठाकुर उदयनारायण सिंह, शास्त्रप्रकाश भवन

मु० मधुरापुर, पो० बिद्दूपुर बाजार

जि० मुजफ्फरपुर।

❀ अथ ❀

पण्डित हारिलकेशवयोः

संक्षिप्तटीका प्रकाश्यते ।

अथर्ववेदस्य संहिताविधेर्विवरणं क्रियते । तत्र अथर्ववेदस्य नव भेदा भवन्ति । तत्र चतसृषु शाखासु शौनकादिषु कौशिकोऽयं संहिताविधिः । स च गोपथब्राह्मणादर्थवादादि परित्यज्य विधिमात्रं कल्पयित्वा विधेः कृतसूत्रयथोपयोगं टीका क्रियते संहिताविधेः ।

कण्डिका ॥ १ ॥

सू० १। —अथशब्द आनन्तर्यार्थः । संहिताध्ययनानन्तरं विधेरधिकारः । संहिताविधिं वक्ष्यामः । शान्तिकपौष्टिकाभिचारिकाद्भुतादीनि कर्माणि संहिताविधौ उक्तानि । त्रिविधानि कर्माणि विधिकर्माणि अविधिकर्माणि उच्छ्रयकर्माणि त्रिप्रमाणको विधिः प्रत्यक्षं अनुमानं शब्दं चेति । उपवर्षाचार्येणोक्तम् । मीमांसायां स्मृतिपादे कल्पसूत्राधिकरणे नक्षत्रकल्पो वितानकल्पस्तृतीयः संहिताकल्पश्चतुर्थो अङ्गिरसां कल्पः शान्तिकल्पस्तु पञ्चमः । एते कल्पा वेदतुल्या हि इति भगवानुपवर्षाचार्येण प्रतिपादितं अन्ये कल्पाः स्मृतितुल्याः । प्रागुदग्वा कर्मसमाप्तिर्दैवकर्मसु दक्षिणा प्रत्यग्वा समाप्तिः पितृकर्मसु केचित्प्रागुदगन्तराले समाप्तिः । —सू० १७ । यथा परित्वाग्ने पुरं वयमिति त्रिः पर्यग्नि करोति । कौ० सू० २।१० ।—सू० २६ । अग्निं पृष्ठतो नावसेत । —सू०२९।३० । सांख्यायनीये ब्राह्मणे उक्तं द्वे पौर्णमास्यौ द्वे अमावास्ये इति पौर्णमास्याः प्रतिपदिति अमावास्यायां प्रतिपदिति पूर्वा उपोष्या उत्तरा याज्या। कौ० । ब्रा० ३।१ । —सू० ३१ । तिथिभेदे मुख्यपौर्णमासोभेदे या पूर्वा सा उपोष्या । उपवासं करोति ।

कण्डिका ॥ २ ॥

सायंप्रातर्होमवैश्वदेवपिण्डपितृयज्ञादि उद्धृतेऽग्नौ कार्याणि। सू०–१७ । (केशवोऽन्यदपि पठति) ऊर्णाम्रदं —सू० १८ । भूपत इति ब्रह्मवरणं तथा च गोभिलब्राह्मणम्—प्रत्यक्षं वा दर्भमयं वा आसनं वा उदककमण्डलुं वा ब्रह्मस्थापने वा कुर्यात् ।

कण्डिका ॥ ३ ॥

सू० १। —युनज्मि त्वेत्येभिः पञ्चभिरिध्ममुपसमादधाति । द्वितीया कण्डिका। —सू० २ । जागमायनमुदपात्रं कांस्यपात्रमुपसाद्य । —सू० ४ । जीवास्थेति सूक्तेन त्रिराचामति । सत्यं बृहदिति नवभिः शन्तिवेत्यृचा उदायुषेति द्वाभ्यामुत्तिष्ठति । (कौ० २४।३१)

कण्डिका ॥ ४ ॥

सू० ९ । —उदेनमुत्तरं नयति त्रिभिर्ऋग्भिः प्रजापते न त्वदिति (७।८०।३) चतस्रश्चर्वाहुतीर्जुहोति (कौ० ५।९)। त्वामग्न इत्यृचा (९।५९।१) चतस्र आज्याहुतीर्जुहोति ।

कण्डिका ॥ ५ ॥

सू० १३ । —स्वाहेष्टेभ्य इत्येवमादिभिरेकादशभिः सर्वप्रायश्चित्तीयाञ्जुहोति "यन्मे स्कन्नं पुनर्मैत्विन्द्रियमिति च द्वाभ्यामृग्भ्याम्" ।

कण्डिका ॥ ६ ॥

सू० १० ।—केशवः पठति० निसिलः । सू० १६ ।—अगन्म स्वरिति पर्यायद्वयेन । सू० १७ ।—पल्न्याञ्जलौ । सू० २२ ।—तस्मान्नादक्षिणं हविःशब्देनाज्यतन्त्रं पाकतन्त्रं चोच्यते । कर्ममात्रमभिमन्त्रणाद्यदक्षिणं न कुर्यात् । पाकतन्त्रे पूर्णपात्रं माणकं सेतिका प्रस्थद्रोणाढकादि । पूर्णपात्रं यजमानशक्त्यपेक्षं "शक्त्या वा दक्षिणां दद्यान्नातिशक्तिर्विधीयते" इत्युक्तं नवमे । आज्यतन्त्रे धेनुः । सू० २६ । तथा च ब्राह्मणम् । सू० ३० । आज्यतन्त्रे पाकतन्त्रे दर्शपूर्णमासधर्मा भवन्ति पूर्वतन्त्रं च उत्तरतन्त्रं च सर्वेषु पाकतन्त्रेषु सर्वमाथर्वणं कर्म पाकयज्ञशब्देनोच्यते। सू० ३४ ।—अत्रापि गोपथब्राह्मणपठितौ श्लोकौ भवतः । सू० ३४ ।—केशवोऽपि पठति—देवतेति । सू० ३७ ।—त्वमग्ने व्रतपा असि तृचं सूक्तं कामस्तदग्र इति पञ्चर्चं सूक्तं एते चारणवैद्यानां पठ्यन्ते तस्मिन्नेव तन्त्रे आज्यं जुहोति शान्तसमिधो वा आदधाति सूक्तयोर्विकल्पः । दर्शपूर्णमासव्यतिक्रमे प्रायश्चित्तम् । सर्वत्र कर्मव्यतिक्रमे सर्वप्रायश्चित्तीयान्होमाञ्जुहोति । तस्मिन्नेव तन्त्रे अन्यस्मिन्तन्त्रे वा तन्त्रमध्ये सर्वे होमा इति भट्टमतम् । अथ सर्वार्थाः परिभाषा विधिकर्मार्था अविधिकर्मार्था उच्छ्रयकर्मार्था उच्यन्ते । मेधाजननादिपिण्डपितृयज्ञान्तं यावद्विधिकर्माणि । मधुपर्कादि इन्द्रमहान्तं यावदविधिकर्माणि । पाकयज्ञविधिकर्मसूक्तेन विनियोगं कृत्वा पश्चादृचां विनियोगस्तान्युच्छ्रयकर्माणि । त्रिविधानि कर्माणि । उपदधातीत्यनादेशे आज्यं समित् पुरोडाशः पयः उदौदनः पायसः व्रीहिः यवः तिलः धानाः करम्भः

शष्कुल्यः एतानि त्रयोदश हवींषि जानीयात् । सर्वत्र इयं पैठीनसिपरिभाषा सर्वत्र हविषां विकल्पः । यत्र गणस्तत्र सर्वत्र सूक्तानां विकल्पः यत्रौषधिगणस्तत्रौषधीनां विकल्पः । हविषां त्वा जुष्टं प्रोक्षामीति सर्वद्रव्येषु प्रोक्षणम् । सर्वत्र उत्पवनं हविषामिति युवाकौशिक आचार्यो मन्यते । अवशिष्टानां परिभाषाः पुनरुच्यन्ते सर्वकर्मार्थाः । आज्यतन्त्रादि वैदिकेषु कर्मसु सर्वत्र वृद्धिश्राद्धम् । यत्र उदकेन प्रयोजनं तत्र सर्वत्र शान्त्युदकं कुर्यात् । चतुर्भिर्गणैरेकेन वा गणेन । सूक्तादिग्रहणे सूक्तं जानीयात् । सर्वत्र स्रुवहोमे नित्यं तन्त्रं हस्तहोमे विकल्पेम तन्त्रम् । आज्यतन्त्रे सर्वत्र धेनुर्दक्षिणा हविरुच्छिष्टं च अधिकरणं च । आज्यतन्त्रमुच्यते । अभ्युक्षणम्च बर्हिर्लवनं वेदिः उत्तरवेदिः अग्निप्रणयनं अग्निप्रतिष्ठापनं व्रतग्रहणं पवित्रकरणं पवित्रेणेध्मप्रोक्षणं इध्मोपसमाधानं बर्हिःप्रोक्षणं ब्रह्मासनं ब्रह्मस्थापनं स्तरणं स्तीर्णप्रोक्षणं आत्मासनं उदपात्रस्थापनं आज्यसंस्कारः स्रुवग्रहणं पुरस्ताद्धोमाः आज्यभागौ अभ्यातानान्तं पूर्वतन्त्रम् । अथ उत्तरतन्त्रमुच्यते । अभ्यातानादि पार्वणहोमः समृद्धिहोमाः स्विष्टकृद्धोमः सर्वप्रायश्चित्तीयहोमाः स्कन्नहोमः पुनर्मैत्विन्द्रियहोमः । स्कन्नास्मृतिहोमौ संस्थितहोमाः चतुर्गृहीतहोमः बर्हिर्होमः संस्रवहोमः विष्णुक्रमाः व्रतविसर्जनं दक्षिणादानं ब्रह्मोत्थापनं यस्मात्कोशादित्येतद् उत्तरतन्त्रम् । उत्तरतन्त्रं समाप्तम् ।

कण्डिका ॥ ७ ॥

परिभाषाव्याख्यानं क्रियते— । सू० ९ । —यथा पिञ्जूलीभिराप्लावयति । घटं वा कांस्यपात्रं वा । सू० ११ । —दूरादेशाद्वृक्षसंभारा आहर्तव्याः । सू० १३ । नित्यनैमित्तिककाम्यानां कर्मणां प्रयोगः । अरण्यं शान्तिकल्पे उक्तम् । यत्र ग्रामशब्दो न श्रूयते तत्रारण्यम् । —सू० १४ । प्रेक्षमाणा—सू० १४ । सर्वहोमकर्म समाप्यते ततोऽवभृथं कुर्यात् । सर्वत्र पुंसवनादिषु संस्कारेषु गृहे प्रयोगः नावभृथ इति रुद्रभाष्यमतम् । सू० १५ । —आज्यादिषु सर्वत्र संपाताभिमन्त्रणं भवति । सू० १६ । —सर्वे पदार्था अभिमंत्र्य कर्तव्याः । सू० १८ । तं पुरुषं अग्रे कृत्वा गृहे प्रवेश्य ततो मन्थौदनौ प्रयच्छति । (कौशिक ७।७ ।) यथा उतामृतासुः शिवास्त इत्यभ्याख्याताय प्रयच्छति (कौ० ४६।१ ।) मंत्रेण । —सू० १९ । — यत्र वासितं बध्नाति तत्र सर्वत्र त्रयोदश्यादि भवति । यथा युग्मकृष्णलं वासितं बध्नाति । (कौ० ११।१९।५२।२०)—सू० २० । —मणिं बद्ध्वा तद्दधिमधु आशयति । सू० २१ । —अन्वारब्धे यजमाने च कर्तव्याः । अभिमन्त्रणम् । यजमान उत्तरतो भूत्वा दर्भैरन्वारभते । सू० २४ । —समर्थंवृषभचर्म । सू० २६ । —यत्र आप्लवनं अवसेचनं च तत्र आचमनं च भवति । सू० २८ । —समित्पुरोडाशचरुव्रीहि-

यवतिलादीन्याभ्याधेयादीनि यजमानं धूमं भक्षयति । सू० २९ । —कर्मसमाप्तौ शुचिना कर्मप्रयोगः । नित्यनैमित्तिककाम्यानि कर्माणि स्नानं कृत्वा प्रयुञ्जीत ।

कण्डिका ॥ ८ ॥

सू० १ । —सर्वकर्मार्था परिभाषा । अथ निशाकर्मपरिभाषा उच्यन्ते । येषु निशाकर्मसु तन्त्रं तेषु अयं धर्मः । केचित् स्नातोऽहतवसनः प्रयुङ्क्ते इति सर्वार्था परिभाषा मन्यन्ते । —सू० २ । अथ स्वस्त्ययनपरिभाषा उच्यन्ते । स्वस्त्ययनेषु चेज्यानो दिश्यान् बलीन् हरति प्रतिदिशमुपतिष्ठते । येऽस्यां स्थेति सूक्तेन प्रतिदिशं प्रत्यृचं बलिहरणं करोति । प्राचीदिगिति । प्रतिदिशमुपतिष्ठते । यथा उत्तमेन सारूपवत्सस्य रुद्राय त्रिर्जुहोति । (कौ० ५०।१४) तत्र हविरुच्छिष्टेन बलिहरणं कुर्यात् । समाप्ता स्वस्त्ययनपरिभाषा । सू० ५ । —पुनः सर्वार्थाः परिभाषा उच्यन्ते । सर्वत्राधिकरणं कर्तुर्दक्षिणा । हविरुच्छिष्टं आज्यधानी उदपात्रं चर्ममण्डपदर्भसमिधः शान्त्युदकभाजनं स्रुक्स्रुवादीनि देयानि । नित्येषु नाधिकरणमस्ति परद्रव्येषु नाधिकरणमस्ति यथा नापितस्य क्षुरम् । (कौ० ५५।) सू० ६ । —प्रोक्षणाचमनपर्युक्षणादि त्रिः कर्तव्यम् । सू० ८ । सर्वत्र शान्तिकेषु शान्तं संभारं दर्भसमिधादि । अभिचारे रौद्रं आङ्गिरसं संभारं (कौ० ४७।२।) सू० ९ । —स्रुक्स्रुवसमिधः काष्ठादि मणिद्रव्यकाष्ठाः कर्तव्यानि । प्रतीकं च द्रव्यञ्च । यथा कथं मह इति मादानकश्रृतं क्षीरौदनमश्नाति । चमसे सरूपवत्सायाः दुग्धे (कौ० १२।१।२।) चमसोऽपि मादानक एव । कथं मह इति उत्तरमपि अनेन सूक्तेन कर्म कुर्यात् । सू० १० विषये यथान्तरम् । मन्त्रद्रव्यसंशये संनिधानं गृहीतव्यं यथा लोमानि हस्तिरोमाणि यथा विद्मा शरस्येति प्रमेहणं बध्नाति (कौ० २५।१०) सू० १२ । उलूखलमुसलकाष्ठम् । अन्यार्थं इन्धनार्थं काष्ठतक्षणं करोति । सू० १५ । —अथ शान्तवृक्षा उच्यन्ते । स्रगूमालवके प्रसिद्धः । बंधः कान्यकुब्जे प्रसिद्धः । शिरीषो भोजपुरे वाटिकायां प्रसिद्धः । स्रक्त्यस्तिलकः प्रसिद्धः । वरणो वरुणकः इति आनन्दपुरे प्रसिद्धः । जङ्गिडो वाराणस्यां प्रसिद्धः । कुडको मालवके । गर्ह्यो हिमवति । गलावलस्तत्रैव प्रसिद्धः । स्यन्दनः हिमवति नर्मदायां प्रसिद्धः । अरणिका नर्मदातटे प्रसिद्धः । अश्मयोक्त अश्मन्तको भृगुकच्छे प्रसिद्धः । तुन्युस्तैन्दुका । पूतदारुर्देवदारुर्वैधके प्रसिद्धः । समाप्ताः शान्तवृक्षाः । सू० १६ । अथ शान्त्यौषधय उच्यन्ते । चित्तिः प्रसिद्धा प्रायश्चित्तिः पर्वणि पर्वणि तस्याः त्रीणि त्रीणि पात्राणि भवन्ति । शमकानन्दपुरे विश्वामित्रीवाप्याः समीपेऽस्ति । सर्वशाखर्मोलिका साम्यवाका काकजंघासदृशा तलाशा वेतसी । वास्तक आटरूपकः (कौ० ३९।६) सीसपात्रं (शीशम) प्रसिद्धम् । शाल्मलिः प्रसिद्धः सिपुनांङ्करी । आकृतिकोष्टः क्षेत्रमृत्तिका वल्मीकमृत्तिका । एताः सर्वाः

शान्ता ओषधयः शान्त्युदकादौ प्रयोक्तव्याः एतासां समुच्चयः । एतासामलाभे यव-प्रतिनिधिः कार्यः इति पैठीनसिः । शान्त्यौषधिकल्पः समाप्तः । सू० १७ । प्रमन्दोशीरशलल्युपधानं शकधूमा जरन्तः । उपधानं विद्यागन्धुकं शकधूमः ब्राह्मणः एता जरन्तः जीर्णा ग्राह्याः । सू० १८ ।—यत्र सीसानि तत्र एतानि सर्वाणि प्रत्येतव्यानि । नदीसीसं नदीफेनम् । सू० १९ ।—रसकर्मणि एते रसाः प्रत्येतव्याः समुच्चयेन ।—सू० २० यवाकस्ति इन्द्रयव । प्रियङ्गुः कंगुणिका । सू० २१ ।—ग्रहणं प्रतीकग्रहणं ग्रहणमनुग्रहणं तावदनुवर्तते यावत्प्रतीकग्रहणं द्वितीयम् । सू० २२ ।—अनुषङ्गः यथार्थं सर्वत्र कर्तव्यः । यथा विद्मा शरस्य पितरं पर्जन्यं शतवृष्ण्यमिति (कौ० २५।१०) वैदिकं लौकिकमिति भवति कृवयामं कंकतमवसृजामीति (कौ० ७६।५।६) अनुष्वङ्गः पुनरुक्तमित्यर्थः । सू० २४ ।—अथ चतुर्गणो महाशान्त्याः पठ्यन्ते । सू० २५ ।—अरायक्षयणमिति तिस्रः । १८।३।५

कण्डिका ॥ ९ ॥

सू० १—ये अग्नय इति सप्त ब्रह्मयज्ञानमित्येका । अग्नेर्मन्व इति सप्त मृगार सूक्तानि ग्रहीतव्यानि ॥ सू० २ ।—प्रथमे द्वे उत्तमं वर्जयित्वा शं च नो मयश्च न इत्येका पुनर्मैत्विन्द्रियमित्येका शिवान इत्येका शं नो वातो वातु इत्येका शेषाणि सूक्तानि । अनेन शान्तिगणेन शान्त्युदकं कुर्यात् । सू० ३ ।— यत्र शान्त्युदकं क्रियते तत्र पृथिव्यै श्रोत्रायेति त्रिभिर्ऋग्भिः शान्त्युदकं शान्त्युदकमध्ये प्रक्षिपेत् । अनेनैव कारयिता प्रोक्षणाचमनादीनि प्रत्यृचं करोति । सू० ४ ।— एष शान्तातीयो गणः । यत्र शान्तातीयेन प्रयोजनं तत्रायं सर्वत्र प्रयोक्तव्य इति । यथा शान्तातीयेन तिलाञ्जुहोति ।—सू० ६ । शान्तिसूक्तानि । इह शान्त्युदके सर्वेषां सूक्तानां समुच्चयः । अन्यत्र सर्वत्र यथोक्तेन न्यायेन विकल्पः न सूक्तविकल्पः । सू० ७ ।—उभयतः शान्तिगणस्य प्रारम्भे समाप्तौ च । सू० ८ ।— अथ शान्त्युदकविधानमुच्यते । सू० ९ । —अवकरं विसर्जयति । अनुज्ञातः शान्त्युदकं करोति शं नो देवीत्यृचा सावित्री च अम्बयो यन्ति गणेन च शान्त्युदकं करोति लघुगणेन बृहद्गणेन वा चतुर्गणैर्वा । सावित्री शन्नो देवी । ततः पृथिव्यै श्रोत्रायेति त्रिः प्रत्यासिञ्चति शान्त्युदके शान्त्युदकं प्रक्षिपति । सू० १० ।— एते चतुर्गणेन बृहद्गणेनैकेन वा शान्त्युदकं कुर्वन्ति । शान्त्युदककर्मपरिभाषा समाप्ता । नवमी कण्डिका । तत्र भद्रश्लोकः ।

प्रमाणं पार्वणे चैव प्रकृतित्वात्परीक्षिते ।
परिभाषा च सर्वार्था प्रथमेऽध्याये संहिताविधौ ॥

इति प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः ॥ २ ॥

कण्डिका ॥ १० ॥

सू० २ ।—सारिका जिह्वां बध्नाति । सारिका कंटारिका प्रसिद्धा । —सू० २ । –कृशो भारद्वाजः ॥ सू० ४ । —कर्कन्धूः बृहद्बदरी । सू० ६ । —ये त्रि षप्ता० इति सूक्तेन क्षीरौदनं संपात्याभिमन्त्र्यभक्षयति । पुरोडाशं भक्षयति । रसान् भक्षयति । रसप्राशनं सर्वत्र त्वे क्रतुमित्यृचा कर्त्तव्यम् । (कौ० २१।२१) सू० ७ ।—ये त्रि षप्ता इति सूक्तेन उपनयनानन्तरं द्वादशरात्रम् । बहुभैक्ष्यमेकत्र कृत्वाभिमन्त्र्य उपाध्यायो ददाति । सू० ८ ।— सुप्तस्योपाध्यायस्य कर्णमनुमन्त्रयते ब्रह्मचारी । सू० ९ ।— यदा यदा उपाध्यायगृहं याति तदा तदा जपति ब्रह्मचारी ॥ सू० १५ ।— उपाध्यायाय । सू० १६ ।— शुक्लपुष्पहरितपुष्पे इति शंखपुष्पिका अन्धपुष्पिका प्रसिद्धे । सू० १७ ।— सम्यक् वर्चस्कामो मेधाकामश्च प्रथमप्रवदस्य । सू० १९ ।— अहं रुद्रेभिरिति शुक्लपुष्प्येत्यादि पञ्च कर्माणि आयुष्यकामोऽपि करोति वार्षशतिकं कर्मेति वचनात् । सू० २३ ।— आदित्यमुपतिष्ठते मेधाकामः । सू० २४ ।— निद्रां त्यक्त्वा मुखप्रक्षालनं वर्चस्कामोऽपि करोति ।

कण्डिका ॥ ११ ॥

सू० १ ।—पौर्णमास्यां निर्ऋतिकर्म ।.(कौ० १८) कृत्वा सक्तुच्छोभूते साम्पदं कुरुते । सू० ३ ।— ब्रह्मचारिगृहात्‌ ''' तृणान्यादधाति । सू० ४ ।— आरण्यपिपीलिकाछिद्रे । सू० ५ ।— संगृह्य स्थाल्यां कृत्वा ग्रामे आगत्य स्थाल्याः सक्तूञ्जुहोति । सू० ६ ।— समाप्तानि ब्रह्मचारिसाम्पदानि शिष्यसम्पत्तिर्भवति । सू० ७ ।—पूर्वेद्युर्निर्ऋतिकर्म कृत्वा (कौ० १८) ग्रामसाम्पदानि ग्रामकामो यदा भवति तदा ग्रामसाम्पदं कुरुते । सू० १५।१६ ।— ये त्रिषप्ता इति सूक्तेन पृश्निमन्थो जिह्वाया उत्साद्य भक्षो परिस्तरणमश्रिहं हृदयं दूरिशउपनह्य । सू० १८ ।— पृश्निमन्थं मैश्रधान्यं च दधिमधुमिश्रं कृत्वा अश्नाति । समाप्तः पृश्निमन्थः । सू० १९ ।— युग्मकृष्णलं सुवर्णमणिं । सू० २० ।— सारूपवत्से ओदने पुरुषाकृतिमालिख्य ।

कण्डिका ॥ १२ ॥

सू० १ ।— मादानककाष्ठश्रृतम् । सू० ४ ।— मन्थान्तानि (कर्माणि)

(कौ०-४-६; ११, १२,— १८) सू० ५ ।– सांमनस्याधिकार आवर्चस्येभ्यः कर्मभ्यो यावत् । जातपुत्रस्य सांमनस्यं क्रियते । यावज्जीवं संजातानां सगोत्राणां सांमनस्यं भवति । सू० ६ ।— उदकुम्भं सम्पातवन्तं कृत्वा ग्रामपार्श्वे भ्रामयित्वा । सू० ८ ।— शुक्स्यानि । अम्लेन रसेन सिक्तानि मांसानि ॥ सू० ९ ।— सहृदयमिति भक्तं सम्पात्याभिमन्त्र्याशयति । सुरां प्रयच्छति पुरुषेभ्यः त्रैवर्णिकेभ्यः प्रपोदकं प्रयच्छति । सांमनस्यानि समाप्तानि । सू० १० ।— अथ वर्चस्यविधिं वक्ष्यामः । ये त्रिषप्ता इति सूक्तेन औदुम्बरसमिध आदधाति । सर्वत्र वर्चस्कामोऽनुवर्तते आराजकर्मभ्यो यावत् । (कौ० १४।१) सू० १२ । अथ कुमारीवर्चस्यमुच्यते । कुमारी रूपवती वर्चस्विनी भर्तृगृहे प्रधाना भवति । सू० १६ ।– वैश्यशूद्रानुलोमजाः ।

कण्डिका ॥ १३ ॥

सू०—१।२ । हस्तिवर्चसमिति हस्तिदन्तं दृष्ट्वा उपतिष्ठते । हस्तिदन्तमणिं बध्नाति । हस्तिलोमानि लाक्षाहिरण्येन वेष्टयित्वा बध्नाति । सू०— ४ । कृष्ण, वृष्णि सूक्ताभ्यां मेषनाभिरोममणिं लाक्षाहिरण्येन वेष्टयित्वा बध्नाति । सू० ६ ।–– स्नातकादि सप्त मर्माणि स्थालीपाकेन दत्वा । सू० ७ ।– इदं कर्म क्षत्रियादीनां न ब्राह्मणस्य । सू०११ ।— चन्दनादिगन्धानासाद्य तस्मिन्मध्ये आकाशोदकं प्रक्षिप्य चतुरङ्गुलेन दर्भतृणेनालोड्य । सू० १२।— यस्ते गन्ध इति त्रिभिः राज्ञां समालभते ।

कण्डिका ॥ १४ ॥

अथ राजकर्माण्युच्यन्ते । सांग्रामिकाणां कर्मणां तन्त्रं वक्ष्यामः । अश्वत्थस्य वधकस्य वा अरण्योऽग्निं मन्थति "इन्द्रो मन्थत्वित्यृचा मध्यमानमनुमन्त्रयते । पूतिरज्जुरित्यर्धर्चेनाग्निपतनस्थाने रज्जुं निदधाति । धूमं पराद्दश्येत्यर्धर्चेन धूममनुमन्त्रयते । अग्निं पराद्दश्येत्यर्धर्चेन जातमग्निमनुमन्त्रयते । एष सेनाग्निः । अभ्यचसश्च । बर्हिर्लवनादि समानं सेनाग्निप्रणयनं ग्रहणं पञ्च गृहीतमाज्यम् । अभ्यातामान्तं कृत्वा लोहिताश्वत्थस्य शाखां रोपयति उत्तरतः । ततः प्रधानकर्म कुर्यात् । तत उत्तरतन्त्रे विशेषः । संततिहोमान्तं कृत्वा इमे जयन्तु स्वाहेभ्यः (कौ० १६–१८) इत्येतेन मन्त्रेणाज्यं जुहोति । ततो वधककाष्ठप्रज्वालितेऽग्नौ वामेन हस्तेन इङ्गिडं जुहोति । (कौ० ४७।३१) । पराभिजयाश्चादुराहामीभ्यः (कौ० १६।१९) ॐ स्वाहेति । ततः शाखायां दक्षिणतः प्रक्षिपति नीललोहितेनामूनिति मन्त्रेण स्विष्टकृदाद्युत्तरतन्त्रम् । एतत्सांग्रामिकं तन्त्रम् । सांग्रामिकेषु सर्वत्र उच्चैर्मन्त्राणां प्रयोगः । तन्त्र मध्ये ये प्रधानमन्त्रास्ते उच्चैर्भवन्ति । सू०

१।—शत्रोर्हस्तित्रासनानां कर्मणां विधिं वक्ष्यामः। सू० २।— तं हस्तिनं संप्रति मुखं रथमावर्तयति। सू० ६।— ये त्रिषप्ता इति सूक्तेन वेलुकामभिमन्त्र्य यत्र हस्तिनस्तत्राभिमुखो याति। समाप्तानि हस्तित्रासनानि। सू० ७।— जयकर्माण्यनुवर्तन्ते। आराष्ट्रप्रवेशकर्मभ्यो यावत्। सू० ८।— इध्मसमाधानस्थाने धनुरिध्म आदधाति। धनुस्समिध आदधाति। सू० ९।— शरेध्मोपसमाधानं शरसमिधः प्रादेशमात्रीरादधाति। सू० ११।— विजयकर्माणि सांग्रामिकाणि समाप्तानि। संग्रामे अयुध्यमाने जयो भवति। एभिः कर्मभिः दृष्टमात्रतः शत्रवः पलायन्ते। सू० १२।— इषुनिवारणानि कर्माण्युच्यन्ते। अनेन कर्मणा पुरुषशरीरे इषवो न पतन्ति पार्श्वतो गच्छन्ति। सू० १४।— सर्वशास्त्रनिवारणानां कर्मणां विधिं वक्ष्यामः। सू० १५।— जुहोति सेनाग्नौ। सू० १६।— आरेऽसाविति सूक्तेन शत्रुं दृष्ट्वा जपति। सू० १७।— अथ मोहनकर्मणां विधिं वक्ष्यामः। परसेनामोहनानि। सू० १८।— ओदनेन फलीकरणं पिण्डीकृत्य। सू० १९।— ओदनेन सह कण्डिकां पिण्डीकृत्य। सू० २०।— शर्कराशूर्पे कृत्वा निष्पुनाति। सू० २१।— अप्वा देवता चरुतन्त्रं आज्यभागान्तं कृत्वाग्निर्नः शत्रूनग्निर्नोदूत इति सूक्ताभ्यां (सू० १७) चरुं जुहुयात्। निर्वापे प्रोक्षणे बर्हिर्होमे विशेषः। अप्वा यै त्वा जुष्टं निर्वपामि। अप्वायै त्वा जुष्टं प्रोक्षामि। अप्वां गच्छतु हविः। सू० २२।२३।— उद्वेगकरकर्म उच्यते। अजां सितपदां शत्रुसेनां प्रति विसर्जयति। श्वेतेन पादेन अजा वा अविर्वा एणी वा। इत्युद्वेगकरं समाप्तम्। समाप्तानि परस्परोद्वेगकरणानि मोहनस्तम्भनमित्यर्थः। सू० २४।— पुनर्जयकर्मोच्यते। सू० २५।— स्वसेनारक्षार्थं कर्मोच्यते। स्वसेनां प्रति दिशमुपतिष्ठते। २६।— अथ स्वसेनाया उत्साहकरणं वक्ष्यामः। सू० २७।— सेनयोर्मध्ये स्थितो जपति निरीक्षमाणः। सू० २८।— परसेनायां प्रक्षिपति। उच्छ्वसकः क्रुद्धः। सू० ३०।— अथ जयपराजयविज्ञानमुच्यते। शरतृणानि। आङ्गिरसेनादीपयति। आङ्गिरसोऽग्निः चाण्डालाग्निः सूतिकाग्निः। सू० ३१।— सेनयोर्मध्ये कृत्वा यान् धूमोवतनोति ते जयन्ति यत्र धूमो गच्छति तत्र न जयः।

कण्डिका ॥ १५ ॥

सू० १।— अथ सांग्रामिकं विधिं वक्ष्यामः। जयकर्माण्युच्यन्ते। सूक्ताभ्यामाश्वत्थ्यां पात्र्यां त्रिवृत्तिगोमये परिचयेऽग्निं प्रज्वाल्य हस्तिपृष्ठे शत्रुमभिमुखो गच्छन्नाज्यं जुहोति। पुरुषशिरसि'''तत्पात्रं प्रक्षिपति भूम्यां। सू० ४।— युद्धे मृतस्य पुरुषस्येध्ममुपसमाधाय उपरि चक्रं धारयित्वा दीर्घदण्डेन स्रुवेण। सू० ५।— युद्धं योजयेत्। सू० ७।— वैद्याय संग्रामविधिं वक्ष्यामः। सू० ८।— सेनापतिजयकर्म'''

दण्डनायकजयकर्म । स्वसेनाजयपराजयपुरुषवधशङ्कायां विज्ञानमुच्यते । उद-पात्रमभिमन्त्रयते ततो द्वौ द्वौ योद्धारौ अवेक्षयेद् राजा । सू० १०॥—यं न पश्येत् तं न युध्येत योधयेत् । सू० ११॥—अथ नवरथे घटिते संस्कार उच्यते । सू० १२॥—अथारोग्यविधानमुच्यते । ब्रह्मयज्ञान मन्त्राश्चेति । सू० १५॥—अथ सांग्रामिकविधानमुच्यते । एका आत्मसेना रज्जुर्द्वितीया मध्ये मृत्युः तृतीया रज्जुः परसेना । एवं संकल्पः । तत अङ्गारेषु निधाय इष्यते यस्य उपरि मृत्युर्गच्छति तस्य सेनाया जयो भवति ॥ सू० १८॥—आरोग्यविज्ञानकर्म । जयविजयपराजयविज्ञान-कर्म । एकरज्जुमुख्यमध्यमधरविज्ञानकर्म । एतानि त्रीणि कर्माणि भवन्ति । इषीका शरमया वा वीरिणमया वा कर्तव्या ।

कण्डिका ॥ १६ ॥

सू० १॥—अथ त्रासनं परसेनाविद्वेषणमुच्यते । सू० ३॥—सोमाङ्कुरमणिं बध्नाति । सू० ४॥—राजा त्रिः कण्टकं भ्रामयति । सू० ६॥—जयकाम इदं कर्म कुर्यात् । जयकर्माणि अनुवर्तन्ते अस्मिन्वस्त्विति राष्ट्रावगमनं यावत् । (सू० २७) सू० ७॥—अभयकर्म उच्यते । सू० ८॥—अभयं द्यावापृथिवी इति सूक्तेन—सप्तऋषीन्यजते प्रतिदिशं सेनायाः । प्रतिदिशं सेनाया उपतिष्ठते वा । श्येनोऽसि गायत्रेति सूक्तेन । सप्तऋषीन्यजते उपतिष्ठते वा सेनायाः प्रतिदिशम् । सू० ९ ॥—उक्तमग्निमन्थनमादौ इन्द्रो मन्थत्वित्यादि । अग्निं मन्थति । सू० १४ ॥—अथ सपत्नक्षयणी कर्म उच्यते । अरण्ये न ग्राममध्ये कुर्यात् । (वधकः) कृमिमालकः । तिर्णिसमिधः । सू० १६ ॥ —भाङ्गानि ज्वालानि । सेनाक्रमेषु वपति । सू० १७ ॥—सेनाक्रमेषु वपति । सू० १८॥—स्वाहैभ्य इत्यमित्रेभ्यः । सू० २१॥—आवासानि जयकर्माण्युच्यन्ते । ये बाहव इत्यनुवाकं युद्धकाले जपति कर्ता । सू० २३ ॥—सर्वत्र पात्रेषु अश्वत्थेषु कूटेषु भाङ्गेषु जालेषु वाधकदण्डेषु वज्ररूपेषु पात्रेषु चेङ्गिडालङ्करणे कुद्दालुमन्त्रणं कुर्यात् । सू० २४ ॥—त्रिषन्धीनि लोहमयानि ... वज्ररूपाणि लोहमयानि अर्बुदि-रूपाणि पृषदाज्येन संपात्याभिमन्त्र्य निवपति ... सू० २५॥—ये बाहव इत्यनुवाकेन शितिपदं आज्यं पृषदाज्येन सम्पात्याभिमन्त्र्य राज्ञो (राज्ञा राजा वा) दण्डे बध्नाति । सू० २६॥—द्वितीया शितिपदीं ... शत्रुसेनां प्रति क्षिपति । शितिपद्योर्द्वयोर-रण्ये कर्म । सू० २७॥—अथावश्यकं राष्ट्रप्रवेशककर्मविधिं वक्ष्यामः । स्वराष्ट्रे यो निष्क्रान्तः शत्रुणा पुनः प्रवेशमिच्छति तस्येदं कर्म । सू० २८॥—आवुशुष्का लता व्रीहयः पुनरुत्थिताः छिन्नानि कामानि पुनरुत्थितानि । सर्वस्यामर्दितायां भूमौ यदा निष्क्रान्तो राजा तदा इदं करोति । सू० ३०॥—सेनाकारं पुरोडाशम् । सू० ३१॥ —ततो कोष्ठेन पूरयेत् ... क्षीरौदनं स्थालीपाकं राजानमाशयति ।

कण्डिका ॥ १७ ॥

सू० १ ।—अथ लघु अभिषेककर्मोच्यते। माण्डलिकस्य सामन्तस्य युवराजस्य सेनापतेरन्यस्य कस्यचिदभिषेकः । शान्त्युदकं करोति महानद्या उदकेन च पुष्कराणामुदकं देववृष्ट्युदकं दिव्यमुदकं च । उदकानां विकल्पः समुच्चयो वा । सू० २ ॥—दक्षिणतो वेद्याः ॥ सू० ३ ॥—खट्वायामार्षभं चर्म आस्तीर्य तत्र राजानमारोहयति। सू० ४।—उदपात्रमुभावप्यासिञ्चति।सू० ६ ।—राजा ब्रूते। सू० ७।—ब्रह्मा ब्रूयात् ।···सू० १० ।—अभिषेकादनन्तरं घृतावेक्षणमारात्रिकं राजकर्माणि पितृराज्यादीनि कर्माणि प्रत्यहं कर्तव्यानि ॥ सू० ११ ।—महाभिषेकविधिं वक्ष्यामः स सार्वभौमस्य भवति ॥ सू० १६ ।—राजकीयो महाशूद्रः । प्रक्षालनं ददाति । सू० १७ ।—राजा द्यूतक्रीडां करोति ॥ सू० १८ ।—वैश्यः राजानमुपतिष्ठते उत्सृजन्नायुष्मन्निति मन्त्रेण । सू० १९ ।—ततो राजा ब्रूते । सू० २१ ।—राजानमाशयति । सू० २५ ।—राजानमाशयति । सू० २६ ।—स्त्रीणां गृहे याति । सू० २७ ।—तत्र मधुपर्को देयः। महाभिषेकः समाप्तः । अतो भूप्रभृतिराजकर्माधिकारः। घृतावेक्षणम् । पुरोहितकर्म ॥ आरात्रिकं नक्षत्रपूजाग्रहपूजादिकं कर्तव्यम् । सू०३० ।—शूद्रेणाहृताः समिध आदधाति। सू० ३४ ।—अथ वाचयेदिति विकल्पं मन्यन्ते आचार्याः । समाप्तानि राजकर्माणि । तत्र श्लोकः—

मेधासाम्पदकर्माणि सांमनस्यं च वर्चसाम्पदं
क्रमाच्च राजकर्माणि द्वितीयेऽध्याये महर्षिणा ।

इति कौशिकपद्धतौ द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः ॥ ३ ॥

कण्डिका ॥ १८ ॥

अथ निर्ऋतिकर्मणां विधिं वक्ष्यामः । आ पुष्टिकर्मभ्यो यावत् । सू० ११।—प्रदक्षिणं भूत्वा निर्ऋतिदिशमभिमुखो भूत्वा ये त्रिषप्ता इति सूक्तेनाज्यं सकृज्जुहोति। सू० १२ ।—अग्नौ छत्रोपानहौ जुहोति। सू० १४।—धाना शर्करामिश्रान् सकृज्जुहोति । सू० १५ । सह पिटकेन तृतीयामाहुतिं जुहोति । सू० १६ ।—काकजङ्घायां लोहकण्टकं बद्ध्वा कण्टके पुरोडाशं बध्नाति तथा निर्ऋत्यभिमुखो भूत्वा प्रपतेत इत्यृचा काकं विसर्जयति । सू० १७ ।—नीलं वस्त्रमधः परिधत्ते रक्तवर्णमुपरि आच्छाद्य शुक्लवस्त्रोष्णीषं कृत्वा या मा लक्ष्मीरित्यृचा लोहखण्डेन सह उष्णीषमुदके

प्रक्षिपति । सू० १८ ।—एकशतं लक्ष्म इत्यृचा रक्तवस्त्रं लोहखण्डेन सहाप्सु क्षिपति । एता एना इत्यृचा नीलं वासो लोहखण्डेन सहाप्सु क्षिपति । गृहे आगच्छति । ततः कर्माणि कुर्यात् पौष्टिकानि साम्पदानि च । समाप्तानि निर्ऋतिकर्माणि । सू० १९ ।—पूर्वस्य चित्राकर्मादीनि पौष्टिकानि तान्युच्यन्ते आ भैषज्येभ्यः कर्मभ्यो यावत् । (कौ० २५) । एतत्कर्म चैत्र्यां पौर्णमास्यां कुर्यात् । अथवा चित्रानक्षत्रे कुर्यात् । नित्यं चैत्रीकर्म । सू० २२ ।—परशुवन्मुखेनाश्नाति न हस्तेन । सू० २६ ।—मन्थान्तानि कर्माणि । सू० २७ ।—अध्वानं गच्छता पुष्टिकर्माण्युच्यन्ते । सू० २८–२९ ।—यदा गच्छति तदा एतत्कर्म । यदा ग्रामं गच्छति तदा एतत्कर्म कुर्यात् । समाप्तं प्रस्थानकर्म । सू० ३०–३१ ।—यथार्थं याचते तदा द्रव्यकाम एतत्कर्म कुर्यात् । अथवा निष्कामोऽपि करोति । सू० ३२–३४ ।—अथ समुद्रकर्म व्याख्यास्यामः । अभ्यातानान्तं कृत्वा ततश्चत्वारः पूलकाः पलाशसमिन्धनं चत्वारो दर्भपूलका व्यतिषङ्गेन जुहोति । एकं समिद्भारकं द्वितीयं तस्योपरि दर्भभारकं पुनरपि तथैव च अष्टौ उपर्युपरि कृत्वा ततो ब्रह्मजज्ञानेन सहस्रधारेणाज्यं जुहोति । सू० ३७–३८ ।— सात्रिकस्याग्नेः प्रणयनम् । अथवा सत्रस्थाने प्रणयनम् । अथवा सत्रस्थाने एतत्कर्म करोति धनधान्यपुत्रलक्ष्मीयशोमेधाधर्मकामः । आयुर्बलप्रजासम्पद् ग्रामकूपादि'''सम्पद्यते समुद्र इत्याक्षते कर्मेतिवचनात् ।

कण्डिका ॥ १९ ॥

सू० १–२ ।—अथ गवां रोगेषु गवां पुष्टिप्रजननेषु शान्तिरुच्यते । बहुदुग्धा गावो भवन्ति ज्वरगण्डमालादिरोगे एतत्कर्म गर्भग्रहणार्थमेतत्कर्म भवति । सू० ३ ।–तडागमवरुध्य ततो गाः पाययति । समाप्तानि गवां पुष्टिकर्माणि । सू० ४ ।– सर्वार्थानि पुष्टिकर्माण्युच्यन्ते । द्वाभ्यां महानदीभ्यामुदकमाहृत्य सर्वत उपसिच्य । सू० ७ ।—अथ लक्ष्मीकर्म व्याख्यास्यामः । यस्य गृहे लक्ष्मी नास्ति तस्य गृहात् । सू० ८ ।—श्रीमतीगृहात् गोमयमाहार्य... । सू० ९ ।– अथ समुद्रे इदं कर्म क्रियते पुष्टिकर्म । अलक्ष्मीविनाशककर्माण्युच्यन्ते । शापेटमालिप्याप्सु निविश्य तत्राग्निं प्रणीय । शेरभकेति सूक्तेन भक्तं सम्पात्याभिमन्त्र्याश्नाति...पुष्ट्यर्थी । सू० १० ।— कण्डितयवानाम् । सू० १४ ।–गोष्ठकर्मणां विधिं वक्ष्यामः । सू० १८ ।–गोवाटे पांसुकूटं कृत्वा अर्धं दक्षिणेन निक्षिपति । सू० २० ।—चतुर्थे उत्थाय...अश्नाति । सू० २२–२३ ।—अथ सर्वकाममणिशान्तिरुच्यते । पालाशमणिं त्रिवासितं कृत्वा सम्पात्याभिमन्त्र्य बध्नाति त्रयोदश्यादयस्तिस्रो दधिमधुनि वासयित्वा परिभाषावचनात् । (कौ० ७।१९।) पलाशादि चतुर्षु मणिषु संबध्यते पुष्टिकामः । तिलकमणिं, वरणमणिं, खदिरपलाशमणिं बध्नाति । सू० २६ ।—पलाशमणिं बध्नाति । सू० २७ ।—

समाप्ता मणिबन्धनशान्तिः। सू० २८।—अथ अष्टकाकर्म पुष्टिकामो वा नित्यं वा··· कुर्यात्। माघाष्टकायां पूर्वाण्हे यज्ञोपवीती शालानिवेशनं समूहयति॥ उपवत्स्यद्भक्तमशित्वा स्नातोऽहतवसनः प्रयुङ्क्ते रात्रौ वशातन्त्रं पाकयज्ञविधानं धानादीनां श्रपणं कृत्वा। तत आज्यभागान्तं कृत्वा ततः पुरस्तादग्नेः प्रतीचीं गां धारयन्ति। पश्चादग्नेः प्राङ्मुख उपविश्य अन्वारब्धाय शान्त्युदकं करोति। प्रथमा ह व्युवास सेति सर्वेण तिस्रः पश्चादाहुतीर्जुहोति। सू० २९।—ततः प्रथमा ह व्युवास सेति सूक्तेन सर्वेण स्थालीपाकं जुहोति।

कण्डिका॥ २०॥

सू० १।—कृषिनिष्पत्तिकर्म वक्ष्यामः। क्षेत्रे गत्वा। सू० ४।—हालिको अन्यांश्चतुरो वृषभान्युनक्ति षड्द्वं हलमिति वचनात्। सू० ५।—लोहफालमभिमन्त्र्य हले प्रतिकर्षति। सू० ७।—अपूपानभिमन्त्र्य हले फालमुखे ददाति। ततः कर्ता हलेन कृषति। सू० ८।-हालिकाय। सू० ९।-तिस्रः सीताः प्राचीर्हालिकः कृषति। सू० १४-१५।-उदपात्रे निदधाति। तेनोदकेन हलं सर्वमनक्ति। सू०-१६-१९।-यत्र सीता सम्पातिता तस्मात्स्थलात् मृत्तिकां पत्नी गृह्णाति हस्तेन। अतोऽन्यो मनुष्यः पृच्छति किमाहार्षीः ?। ततः पत्नी ब्रूते वित्तिं भूतमिति। सू० २०।-मृत्तिकां निदधाति पत्नी। सू० २१।—ततो लोहफालं घृतेनाभ्यज्य तत्रैव क्षेत्रे निदधाति। सू० २२।—सीताशिरः सूत्रेषु। सू० २३।— एकैकस्याः सीताया दक्षिणे चमसे रसान् प्रक्षिप्य मध्यमेषु विरूढं निदधाति पुरोडाशमुत्तरेषु निदधाति। सू० २४।— चमसोपरि दर्भाग्रान्निदधाति ततः चमसान् पांसुना प्रच्छादयति मृत्तिकां ददाति तत्र। ततः प्रभाते अवश्यं तस्मिन् क्षेत्रे द्वितीयेऽहनि कर्षितव्यम्। एतत्सर्वं एकं कर्म। कृषिभ्यः निष्पत्तिकर्म समाप्तम्। सू० २४।—अथ वृषभलाभकर्म उच्यते। सू० २५।—आनडुहसांपदकर्म समाप्तम्।

कण्डिका॥ २१॥

सू० १।—अथ स्फातिकरणकर्म उच्यते। सू० ५-६।—यदा यदा भक्तं राध्यते तदा तदा अभिमन्त्रयते। यदा दीयते कण्डेन।...निष्पवने रन्धने परीक्षणे दाने च सर्वत्राभिमन्त्रणम्। सू० ७।—स्थिरधान्यमक्षयं भवति। समाप्तानि स्फातिकरणानि पुष्टिकर्माण्येव वर्तन्ते। सू० ८।—सन्ध्याकाले॥ सू० ९॥—यदा प्रथमं होममिच्छति तदा इदं कर्म करोति। सू० ११।—सूर्यस्य रश्मीनन्विति तिसृभिर्द्वादश नाम्न्यां बध्नाति। इह वत्सां निबध्नीम इति पादेन वत्सां बध्नाति। अयं घासं इति पादेन घासं ददाति गोभ्यो वा वत्सेभ्यश्च। समाप्ता गोशान्तिः। सू० १२।—वत्ससाम्पदानि कर्माण्युच्यन्ते। सू० १३।—सूत्रेण परिवेष्ट्य घृतेनाक्ता आदधाति।

सू० १४ ।—इषीकाः तिस्रो मधुना चिक्कसेन प्रलिप्ता आदधाति। सू० १५–१६ ।—ज्येष्ठेन पुत्रेण सह भागविधि वक्ष्यामः । उत पुत्र इत्यृचा गृहकाष्ठकाद्या अभिमन्त्र्य ततो गृहं कारयेत् पुष्टिकामः पुत्रो वा साम्पदं करोति पिता वा करोति । सू० १७ ।—आर्द्रपाणिर्भूत्वा शान्तशाखया ऋचं जपित्वा पुत्रं पिता पुत्रभागं प्रयच्छति । सू० १८–१९ । प्राग्भागमपाकृत्य पुत्रस्य गृहे गोधनं बध्नाति । अग्निसंमुखं कुरुते । पुत्रस्य भागं क्रियते । सू० २० ।—आग्नेया अमावास्या भविष्यति तस्यां पुत्राश्च भ्रातरोऽपि अनेन विधानेन भागं कुर्वन्ति । समाप्तं विभागकर्म। सू० २१।२३ ।—त्वे क्रतुमित्यृचा सर्वत्र रसप्राशनं परिभाषा सर्वस्मिन्नथर्ववेदे रसकर्मसु पाकयज्ञविधानेन प्रजापतये चरुं श्रपयित्वा। स्तुष्व वर्ष्मन्निति ऋचा जुहोति पुष्टिकामः । अमावास्यायामस्तमिते रात्रौ वल्मीके दर्भानास्तीर्य तत्र दीपं ददाति ।

कण्डिका ॥ २२ ॥

सू० १ ।—पुनः पुष्टिकर्माण्युच्यन्ते । भ्रष्टपिष्टं सक्तुम् । सू० ६ ।—क्षेत्रकामस्य कर्म उच्यते । यत्र क्षेत्रं कामयते तस्मिन् क्षेत्रे इदं कर्म कुर्यात् । सू० ७ ।—सप्त ग्रामलाभकर्म । सू० १० ।—अथ समृद्धिकर्म उच्यते । सू० १० ।—उदक्याम् । सू० १४ ।—अथ समुद्रकर्म उच्यते। शत्रुदेशे गत्वा गार्हपत्यदक्षिणाग्न्याहवनीयेषु कर्म कुर्यात् । ततो गार्हपत्ये अभ्यातानान्तं कृत्वा ममाग्ने वर्च इति सारूपवत्सं गार्हपत्यश्रृतं गार्हपत्ये प्रथमं संपात्य ततो दक्षिणाग्नितन्त्रं कृत्वा पूतीकैस्तरणम् । तत अभ्यातानान्तं कृत्वा तमेव सारूपवत्सं सम्पात्य तत आहवनीयभागस्तरणम् । ततस्तमेव सारूपवत्सं संपात्यानेनैव सूक्तेन ततः पश्चात्सकृदभिमन्त्रणं कृत्वा ततोऽश्नाति । गार्हपत्यप्रभृति उत्तरतन्त्रं कुर्यात् । अशनं गार्हपत्यदेशे करोति । उत्तरतन्त्रम्। व्रतग्रहणादि करोति। दक्षिणाग्न्याहवनीयगार्हपत्येषु यथाक्रमं व्रतग्रहणादि। गार्हपत्यस्य दर्भैस्तरणं दक्षिणाग्नेः पूतिकैः । आहवनीयस्य भाङ्गाभिः । समाप्तं समुद्रकर्म ।

कण्डिका ॥ २३ ॥

सू० १ ।—अथ नवे गृहे अग्निशालायां गोशालायां वा ग्रामे वा पुरे वा अन्यत्राभिततेषु वा कर्माणि । पाषाणमये वा काष्ठमये वा तृणमये वा इष्टकामये वा सर्वत्र नवे वासिते इदं कर्म । सू० ६ ।—तूष्णीमादौ वाग्यमनं कृतमिहैव स्तेति वाग्विसर्गः । सू० ७ ।—अग्नौ रविकां औदुम्बरं दत्वा आज्यं जुहोति । धूमं नियच्छति। लेपं प्राश्नीयात्। सू० ९ ।—दायादेषु विभागकर्म वक्ष्यामः । सू० १२ ।—अथ चित्राकर्म चित्रानक्षत्रे उच्यते । संभारान् संपातयति । वृक्षशाखा । उदकम् । करम्बकम् । औदुम्बरशकलम् । ताम्रछुरिका । सू० १४ ।—वत्सकर्णं छिनत्ति।

सू० १५।—कर्णलोहितम्। रसमिश्रितः अश्नापयति पुष्टिकामः। सू० १७।—अथ कृषिकर्म उच्यते।

कण्डिका ॥ २४ ॥

सू० १–२।—बीजवापनं कर्म करोति। केदारे वा क्षेत्रे निवपति। त्रीन् मुष्टिबीजस्य। ततः पांसुभिराच्छादयति। सू० ३–६।—उच्चस्थाने गत्वा। ततः अभ्यातानान्तं कृत्वामित्यमिति चतुर्ऋचेन सूक्तेनोदपात्रं सम्पात्य तदुदपात्रं सोमरसमिश्रं सारूपवत्सं ओदनं सम्पात्याभिमन्त्र्याश्नाति। तत उत्तरतन्त्रं प्राग्द्वारप्रत्यग्द्वारे मण्डपे एतत्कर्म। पश्चान्मण्डपमग्निना दहति। सू० ७।—एकवारप्रसूता गौर्गृष्टिः। गोदाममणिं बध्नाति पुष्ट्यर्थी। सू० ८।—अश्नाति पुष्ट्यर्थी। सू० ९।—इत्यृचा वपया वृषभस्येदं यजते वशाविधानेन (कौ० ४४) सू० १६।—अथ प्रवक्ष्यत एकाग्निकस्य इदं कर्म कथ्यते। इहैव स्तेति गृहं मानुष्यांश्चावेक्षते। सू० १८।—अथ प्रवेशाय यजमानो यदा आगच्छति तदा इदं कर्मोच्यते। मौनं कृत्वा समिधमादाय गृहं दृष्ट्वा ऊर्जं बिभ्रदिति षडर्चं सूक्तं जपति। वामेन हस्तेन समिधः कृत्वा दक्षिणेन शालावलोकं संस्तभ्य जपति ऊर्जं बिभ्रदिति। ततः समिध आदधाति अग्नौ। सुमङ्गलीति कल्पजेन स्थूणे गृह्यात्युपतिष्ठते। यद्वदामीत्यृचा वाग्विसर्गं करोति। गृहपत्न्यासाद् उपविश्योदपात्रं निनयति तूष्णीं दूर्वाग्राणि अञ्जुलिकायां कृत्वा पूर्वापरमिति षडर्चं सूक्तं जपति। अमावास्यायां केचिच्चन्द्रमसं दृष्ट्वा जपं कुर्वन्ति पुष्टिकामाः। सू० १९। —अथ वृषोत्सर्गविधि वक्ष्यामः। ऋषभं सम्पात्य विवाहवदग्निपरिणयनं कृत्वा सह वत्सरीभिः विसर्जयति। सू० २२।—अत एकादशाहे वृषभं करोति तदा शान्त्युदकं कृत्वा वृषोत्सर्गं करोति। वृषोत्सर्गः समाप्तः। वृषभपुच्छं गृहीत्वा देवपितृषिभ्योऽहं ददे ऋषभमुच्चारयति। सू० २४–२५।—अथाग्रहायणीकर्म उच्यते। रात्रौ अभ्यातानान्तं कृत्वा त्रयश्चरवः श्रपयितव्याः। सत्यं बृहदित्यनुवाकेन पश्चादग्नेर्दर्भेषु खदायां भूमौ एकं चरुं सकृत् सर्वहुतं जुहोति। सू० ३१।—सत्यं बृहदिति नवभिः शान्ति द्वेति दशम्या। सू० ३६।—सत्यं बृहदित्यनुवाकेन कृषिकर्म आयोजनकर्म भवति। सू० ३७।—यस्यां सदो हविर्धाने इति तिसृभिराज्यं जुहोति। तत उत्तरतन्त्रम्। वरो म आगमिष्यतीति वरस्य प्रार्थितोऽभिलाषः उत्कृष्टपुत्रधनादि वा सर्वफलकामः। सू० ३८।—उपतिष्ठते पृथिवीं पुष्टिकामः। सू० ३९। निधिं बिभ्रतीति द्वाभ्यामुपतिष्ठते पृथिवीं मणिहिरण्यद्रव्यनिधिरत्नकामः। सू० ४१।—वृष्टिकाले यस्यां कृष्णमिति नवोदकमभिमन्त्र्याचमनं करोति पुष्टिकामः। यस्यां कृष्णमित्यृचा नवोदकमभिमन्त्र्य स्नानं करोति पुष्टिकामः। नवोदकस्य

कर्म समाप्तम् । सू० ४५ ।—सर्वे मंत्राः पुष्टिकर्मसु पठिताः तृतीयेऽध्याये तेषामुपधान-मुपस्थानं भवति । एते मन्त्राः पौष्टिकाः पौष्टिकानां सर्वेषां मन्त्राणां हविरुपधान-मुपस्थानं वा करोति विकल्पेन । सू० ४६ ।—ततः श्लोकः ।

पूर्वं निर्ऋतिकर्माणि सर्वेषां पापनुत्तये ।
पौष्टिकानि ततः पश्चात्तृतीये संहिताविधौ ॥

इति कौशिकपद्धतौ तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः ॥ ४ ॥

कण्डिका ॥ २५ ॥

सू० १—३ ॥ भेषजशान्तिर्भैषज्यशब्देनोच्यते । तत्र द्विविधा व्याधयः आहारनिमित्ता अन्यजन्मपापनिमित्ताश्च । तत्राहारनिमित्तेषु चरकवाहडसुश्रुतेषु··· व्याध्युपशमनं भवति । अशुभनिमित्तेषु अथर्ववेदविहितेषु शान्तिकेषु व्याध्युपशमनं भवति । तथाचाग्रे वक्ष्यति । अनूक्तान्यप्रतिषिद्धानि भैषज्यानामंहोलिङ्गाभिः (कौ० ३२।२६।२७) सर्वाणि कर्त्तव्यानि । उक्तान्यनूक्तानि च कर्त्तव्यानि । बन्धन-पायनादीनि च कार्याणि । सू०५ ॥—मुखवलीर्विमार्ष्टि अङ्गवलीश्च । तरुणस्य यदि वलयस्तदा एतत्कर्म । सू० ६ ॥—अथ ज्वरातिसारभैषज्यान्युच्यन्ते । मुञ्जपुष्प-मणिं मुञ्जरज्ज्वा बध्नाति । सू० ७ ॥—अतिसारे चातिमूत्रे च भैषज्यम् ।······। सू० ८ ॥—अपानं प्रक्षालि । सू० ९ ॥—अपाने शिश्नं वा नाडीं वा व्रणमुखं धमति अतिसारे । समाप्तानि ज्वरातिसारे अतिमूत्रे अङ्गनाडीप्रवाहे च भैषज्यानि । सू० १० ॥—अतिदुःखमूत्रे दुःखपुरीषकरणे च शमनभैषज्यान्युच्यन्ते ।······ विद्मा शरस्येति द्वितीयेन हरीतकीं कर्पूरं वा सम्पात्याभिमन्त्र्य बध्नाति । सू० १२ ॥ —विषितं ते बस्तिबिलमिति द्वाभ्यामृग्भ्यां मूषिकमृत्तिकोपरि उपविश्य जपति । तृणोपरि उपविश्याभिमन्त्रयते ।···बस्तिबिलमुखमभिमन्त्रयते । दारुतक्षशकलान् दधिमथितोपरि उपविश्य ततोऽभिमन्त्रयते ।····· जरत्प्रमन्दोपरि उपविश्याभि-मन्त्रयते ।···दारुतक्षशकलानामुपरि उपविश्य व्याधितं ततोऽभिमन्त्रयते मूत्रादि-प्रतिबन्धे मूत्रं मुच्यतामिति लिङ्गात् । सू० १३ ॥—व्याधितमारोहयति । सू० १४ ॥—व्याधितः शरं प्रक्षिपति । सू० १५ ॥—शरशिश्नमभिमन्त्र्य निष्कोटति शिश्नं चर्मणो निःसारयतीत्यर्थः । सू० १६ ।—लोहशलाकामभिमन्त्र्य शिश्ने प्रवेश-

यति । मूत्रप्रवाहं विदारयति । सू० १७ ।—विद्मा शरस्येति द्वितीयेन द्रुघ्रीं ज्याधनुषं जघने शिश्नदेशे ऊर्ध्वंकृत्वा गोदोहन्यामुदकं कृत्वा यवानेकविंशतिं प्रविश्य प्रक्षिप्य तेन उदकेन धनुषमुपरिफलं सिञ्चति सूक्तं जपित्वा ॥ यथा उदकं शिश्ने पतति तथा कार्यम् । सू० १८ ।—यवगोधूमवल्ली पद्ममूलं यातिका एतानि क्वाथयित्वाभिमन्त्र्य व्याधितं पाययति । समाप्तानि मूत्रप्रतिबन्धे दुःखमूत्रकरणे दुःखपुरीषकरणे···उदरपूर्णनिरोधकरणे च एतानि भैषज्यानि कार्य्याण्यारोग्यकामः । सू० २० ।—अथ सर्वरोगभैषज्यान्युच्यन्ते । अभ्यातानान्तं कृत्वा अम्ब यो यन्तीति वायोः पूत इति सूक्तेनाज्यं जुहोति । पलाशोदुम्बराद्याः समिध आदधाति । सर्वव्याधिभैषज्यकामः । सू० २१ ।—अथ सोमभक्षणे भैषज्यमुच्यते । सोमपवने सोमरसायने सोमपाने सोमाभिषवे च सोमविषये व्याधौ उत्पन्ने भैषज्यं समाप्तम् । सू० २२ ।—अथ भूततन्त्रकर्माण्युच्यन्ते । भूतपिशाचशङ्कायां शान्तिरुच्यते । कुक्कुसाञ्जुहोति । तुषाञ्जुहोति । बुसं जुहोति । काष्ठशकलानि जुहोति । (कौ० १४। १५ ।) अभेयाध्येयानां धूमं नियच्छति । पिशाचगृहीतपुरुषं धूमं पाययति । गृहे ग्रामे वा पत्तने क्षेत्रे वा देवगृहे वा यत्र क्वचित् पिशाचशङ्कास्ति तत्र होमं कृत्वा धूमं नियतं कुर्यादित्यर्थः । पिशाचगृहीतं पुरुषमन्वाह आक्रोशं ददाति । सू० २३ । —कर्कटिकासमिध आदधाति । मुसलकाष्ठशकलानि जुहोति । खदिरसमिध आदधाति । सर्षपसमिध आदधाति । सू० २४ ।—खदिरवितस्तिमात्रशङ्कून् सप्त वा नव वा अभिमन्त्र्य पश्चादग्नेर्निखनति । भूमिं समां करोति । अक्ष्यौ निविध्य इत्यृचा निखननमन्त्रः पिशाचोपद्रवे । सू० २६ ।—शर्करानभिमन्त्र्य शयनं वा अन्तराणि वा गृहं वा परिकिरेत् रक्षोभये । सू० २७–२९ ।—अमावास्यायामभ्यातानान्तं कृत्वा शरमयं बर्हिस्तृणाति सर्षपेध्मानामुपसमाधानम् । सकृद्गृहीतान्यवसक्तूञ्जुहोति । एतस्मिन्तन्त्रे यवराशिमध्यात् मुष्टिमेकां गृहीत्वा उलूखलेन अप्रदक्षिणं पिष्यते ततो व्याधितं सम्पात्य शणसूत्रेण जिह्वामार्जनं करोति । ततो ग्रहणमुक्तो न करोति शणेन जिह्वामार्जने ततो न गतो ग्रह इति विजानीयात् । सू० ३० ।—अथ ग्रहाभिचार उच्यते । इदं कर्म अवश्यमस्य ग्रहस्य वशीकरणमुच्यते । पलाशपुटेन जुहति । सू० ३१–३३ ॥ अथास्मिन् गृहे पिशाचोऽस्ति वा न वास्ति संशये इदं कर्मउच्यते । सर्षपेध्मं शरमयं बर्हिरभिमन्त्र्य शालाया उपरि निदधाति । ततः प्रभाते निरीक्षणं विकृते पिशाचशङ्का । तदा उक्तो होमः । वीरिणतूलमित्यादि । (सू० ३० ।) ॥ ३४ ॥ पिशाचगृहीतं पुरुषम् । सू० ३५–३६ ।—रात्रिकर्माण्युच्यन्ते ।—रात्रौ उल्मुके अभिमन्त्र्य परस्परं संघृष्यति । ततः प्रभाते स्वस्तिदा इति सूक्तेन प्रक्रामति पदानि ददाति । रक्षोभैषज्यम् । समाप्तानि रात्रिकर्माणि । सू० ३७ ।—अथ जलोदरभैषज्यमुच्यते । घटे दर्भपिञ्जूलीः प्रक्षिप्य

एकविंशति गृहतृणानि च प्रक्षिप्य तं घटमभिमन्त्र्य ततो व्याधितं सिञ्चति । ततो मार्जनञ्च दर्भत्रयमेकत्र बद्धं पिञ्जूलीत्युच्यते । समाप्तं जलोदरभैषज्यम् । अभ्यासेन कर्मसिद्धिः दिने दिने कुर्यात् जलोदरनाशनार्थम् ॥

कण्डिका ॥ २६ ॥

सू० १ ।—अथ वातपित्तश्लेष्माणि भैषज्यान्युच्यन्ते । मांसमेदोऽभिमन्त्र्य पाययति वातविकारे। मधु अभिमन्त्र्य पाययति श्लेष्मविकारे। घृतमभिमन्त्र्य पाय· यति वातपित्तसहविकारे। तैलमभिमन्त्र्य पाययति वातश्लेष्मविकारे । सू० २-६ ।—अतिकाशे शीर्षक्ति शिरोवेदनायां च कर्माण्युच्यन्ते। व्याधितं शिरं मौञ्जवेष्टितं कृत्वा वामेन हस्तेन वपनं जालसहितं गृहीत्वा जरायुज इति सूक्तेन लाजान् प्रकिरन् व्रजति व्याधिदेशं यावत् । तत्रैव मुञ्जप्रश्नं लाजाश्च वपनानां प्रक्षेपः। वामेन हस्तेन वपनं मौञ्जं इन्दुकं च गृहीत्वा दक्षिणेन हस्तेन ज्यां तूष्णीं गृहीत्वा...व्याधितमग्रे कृत्वा यत्र व्याधिरुत्पन्ना तत्र स्थाने गत्वा जरायुज इति जपित्वा मौञ्जप्रश्नं वपनं क्षिपति व्याध्युत्पत्तिस्थाने ज्यां तूष्णीं प्रक्षिपति । वातज्वरे कटिभङ्गे शिरोरोगे च वातगुल्मे वातविकारे च सर्वरोगे च भैषज्यम् । धनुर्वाते अङ्गकम्पने वाते शरीरभङ्गे सर्ववातविकारे भैषज्यम् । सू० ८ ।—घृतमभिमन्त्र्य नासिकानस्तं दद्यात् । सू० ९ ।—जरायुज इति सूक्तेन पञ्चपर्ववेणुदण्डं ललाटे संस्तभ्य जपति शिरोरोगे कटिभङ्गे वा वातगुल्मे विकारे च। लिङ्गयुपतापः समाप्तः। सू० १० ।—अथ लोहितं वहति शरीरमध्ये बहिश्च । कर्माण्युच्यन्ते । पञ्चपर्ववेणुदण्डं रुधिरवहनस्थाने दत्वा "असूर्या" इति सूक्तं जपति । रथ्यायाः पांसून् गृहीत्वाभिमन्त्र्य रुधिरव्रणे विकिरति । सू० ११ ।—अभंकपालिकां बध्नाति । केदारमृत्तिका इति । सू० १२ ।—अभंकपालिकामभिमन्त्र्य पाययति। अभंकपालिकां शुष्कपङ्कमृत्तिकाम्। स्त्रीरजसोऽतिप्रवर्तने भैपज्यं रुधिरप्रवाहे च । सू० १४ ।—अथ हृद्रोगे कामले चेत्यादिभैषज्यान्युच्यन्ते। सू० १६-१७ ।—अनुसूर्यमिति सूक्तेन गोरक्तचर्मछिद्रमणिं गोदुग्धे तं दत्त्वा संपात्याभिमन्त्र्य बध्नाति दुग्धं च पाययति । अभ्यातानाद्युत्तरतन्त्रम् । कामले हृद्रोगे चेत्यादि लिङ्गयुपतापः। सू० १८ ।—हरिद्रौदनं व्याधितस्य भोजनं दत्वा तस्योच्छिष्टं चानुच्छिष्टं चैकत्र कृत्वा तेन च उद्वर्तनं कृत्वा शिरःप्रभृत्यारभ्य यावत्पादौ उद्वर्त्य ततो व्याधितं च खट्वायामुपवेश्य खट्वाधस्तात् शुकां काष्ठसुसुकं च गोपितिलकां च एते त्रयः पक्षिणः सव्यजङ्घायां हरितसूत्रेण बद्ध्वा खट्वाधस्ताद् बध्नाति ।······अपस्मारे भैषज्यम् । उदकमभिमन्त्र्य व्याधितं स्नापयति । सू० १९ ।—मन्थमभिमन्त्र्य प्रपाद्य प्रयच्छति भक्षार्थम् । सर्वत्र गृहद्वारे अग्रे व्याधितं कृत्वा तमग्रे प्रवेश्य स्वयं प्रविश्य ततो भक्तमभिमन्त्र्य

व्याधिताय प्रयच्छति । सर्वत्र यत्र यत्र प्रयच्छतिशब्दस्तत्र तत्रैव बोद्धव्यम् । (कौ० ७।१८) सू० २० ।—अनुसूर्यं इति सूक्तेन शुष्कचन्दनमभिमन्त्रयेत् । काष्ठ-शुष्कचन्दनमभिमन्त्रयेत् । गोपीतिलकां–यस्मिन्कस्मिंश्च दृष्ट्वा वदन्तीं तत्राभिमन्त्रयते व्याधितः । सू० २१ ।—वृषभहृदयलोमभिः सुवर्णवेष्टितं मणिं कृत्वा सम्पात्याभि-मन्त्र्य व्याधिताय बध्नाति । समाप्तानि अपस्मारविस्मयहृद्रोगकामलकरोहिणकानि भैषज्यानि । सू० २२ ।—अथ श्वेतकुष्ठभैषज्यान्युच्यन्ते । श्वेतकुष्ठं गोमयेन प्रघृष्य यावल्लोहितं दृष्ट्वा भृङ्गराजहरिद्राभ्यां इन्द्रवारुणीनीलिकापुष्पा एताः पञ्च पिष्ट्वाभिमन्त्र्य कुष्ठं प्रलिम्पति । सू० २३ ।—पलितानि छित्त्वा घृष्ट्वा अवलिम्पति । सू० २४ ।—अथ मारुतान्युच्यन्ते । समाप्तानि कुष्ठभैषज्यानि श्वेतपलितनाशनं दुर्भिन्ननाशनं च । सू० २५ ।—अथ ज्वरभैषज्यमुच्यते । नित्यज्वरे वेलाज्वरे सतत-ज्वरे एकान्तरितज्वरे चातुर्थिकज्वरे च ऋतुज्वरे च । सू० २६ ।—अथोद्वेगविनाश-भैषज्यान्युच्यन्ते । सू० २८ ।—उप प्रागादिति सूक्तेन उल्मुकद्वयमभिमन्त्र्य घृषीयत रात्रौ उषाकाले एतत्कर्म । तथा प्रभाते स्वस्तिदा इति सूक्तेन दक्षिणेन पादेन प्रक्राम-तीति (कौ० ५०।११) स्वस्त्ययनम् । वृद्धबालयुवस्त्रीपुरुषाणामकस्मादुद्वेगः प्रलापो वा भवेत्तदा एतत्कर्म कुर्यात् । सू० २९ ।—गन्धर्वराक्षसेऽप्सरसे भूतग्रहादिषु भैषज्यान्युच्यन्ते । सू० ३० ।—चतुष्पथे व्याधितं कृत्वा ततः प्रज्वालिताग्नौ घृताक्ताः सर्वौषधीर्जुहोति । सू० ३१ ।—व्याधितस्य वल्लुणिकां सर्वौषधिसहितां हस्तेन कृत्वा नदीमुखसंमुखां प्रविश्य नदीमध्ये वल्लुणिकायां सर्वौषधिं घृताक्तां हुत्वा । ततः प्रक्रामति । उदकमध्ये सर्वौषधीर्जुहोति घृताक्ताः । पश्चात्स्थितो व्याधितं सिञ्चति । सू० ३२ ।—ततो मृण्मये आमपात्रे होमशेषाः सर्वौषधीः कृत्वा पक्षिणो यस्मिन् वृक्षे वसन्ति तत्र त्रिपादे कृत्वा बध्नाति । सू० ३३–४० ।—अथ लौकिके शापे वैदिके शापे च स्त्रीणामाक्रोशे च पुरुषाणाञ्च भैषज्यमुच्यते । सर्वस्मिन् संहिता-विधिकर्मणि प्रधानकर्ममध्ये नवं घटं यत्प्रथममास्थापितमुत्तरतस्तेनोदकेन हिरण्य-वर्णा इति सूक्तेन अभिमन्त्रितेन कारयिताभिषेचयेत् । सर्वत्र मेधाजननादिकर्मसु । ततः पश्चान्मणिबन्धनादिकर्म कुर्यात् । भैषज्येष्वभिषेकं न कुर्यात् । अभ्यातानान्तं कृत्वा अयद्विष्टा इति सूक्तेन यवमणिं सम्पात्याभिमन्त्र्य पुनः सूक्तं जपित्वा बध्नाति । लौकिके आक्रोशे वैदिके च ब्राह्मणस्य शापे आक्रोशे च क्रूरचक्षुर्दृष्टिनिपाते च पिशाच-रक्षादिषु भैषज्यं समाप्तम् । अथ रक्षोग्रहे भैषज्यमुच्यते । आज्यतन्त्रं कृत्वा शं नो देवीति सूक्तेन पृश्निपर्णीमोषधिं पिष्ट्वा सम्पात्याभिमन्त्र्य पुनः सूक्तं जपित्वा शरीरं प्रलिम्पति । अभ्यातानाद्युत्तरतन्त्रम् । पापगृहीते च स्त्रीगर्भस्रावे च मृतापत्यायां च क्रव्याद्गृहीते च पिशाचगृहीते च रक्षोभयभैषज्यं समाप्तम् । अथ राजयक्ष्मादि-भैषज्यमुच्यते । तन्त्रं कृत्वा वरणोवारयता इति तृचेन वरणवृक्षमणिं बध्नाति ।

राजयक्ष्मादिपूगव्याधिषु श्वेतोदुम्बरकुष्ठाद्यष्टादशजातिषु ज्वरादिसर्वरोगेषु भैषज्यं समाप्तम् । अथ वातविकारे भैषज्यमुच्यते । पिप्पलीक्षिप्तभेषजीमिति सूक्तेन पिप्पल-द्रव्यं आशयति । वातविकारे धनुर्वातगुल्मे वातशूले क्षिप्तवातप्रदोषे कर्मकृते वाते उत्पन्ने सर्वव्याधिविकारे भैषज्यं समाप्तम् । जलोदरे भैषज्यमुच्यते । विद्रध्रस्य बलासस्येति तृचेन सूक्तेन व्याधितस्य मूर्धनि सम्पातानानयति । सर्वव्याधिविसर्पणे प्रकोपे च बलासे च आन्त्रविसर्पणे च अक्षिविसर्पणे च विद्रधिविसर्पणे च हृदयामये च अज्ञातराजयक्ष्मणि च एतेषां भैषज्यं समाप्तम् । या बभ्रव इति सूक्तेन दश वृक्ष-शकलानि लाक्षाहिरण्येन वेष्टितं मणिं कृत्वा...बध्नाति । सर्वव्याधिभैषज्यं समाप्तम् । सू० ४१ ।—अथ क्षेत्रियव्याधिभैषज्यमुच्यते । क्षेत्रियो व्याधिर्लिङ्गी पितृपर्यागतः क्षेत्रियरोगः कुष्ठक्षयरोगः ग्रहणीदोषः सर्वशरीरविस्फोटकारः । सू० ४३ ।—बभ्रो-रर्जुनकाण्डस्येत्यृचा अर्जुनकाष्ठं यवबुसं तिलपिञ्जिकां च एकत्र त्रीणि बद्ध्वा बध्नाति । आकृतिलोष्टं जीवकोषण्यां बद्ध्वा बध्नाति । वल्मीकमृत्तिकां जीवकोषण्यां बद्ध्वा··· बध्नाति । जीवतः पशोश्चर्म जीवकोषणीत्युच्यते ।

कण्डिका ॥ २७ ॥

सू० ३।४ ।—शालातृणानि गर्ते प्रक्षिप्य तस्मिन् गर्ते व्याधितमुपवेश्य तत आचामयति···अवसिञ्चति । समाप्तं क्षेत्रियस्य भैषज्यम् । सू० ५ ।—अथ ब्रह्मग्रहे भैषज्यमुच्यते । दशवृक्षेति सूक्तेन वृक्षविकल्पेन पलाशादिदशवृक्षशकलानि गृहीत्वा लाक्षाहिरण्यवेष्टितं मणिं कृत्वा बध्नाति । सू० ६ ।—दश ब्राह्मणा अथ-र्वाङ्गिरसः सुहृदो दशवृक्षेति सूक्तं जपन्तो व्याधितं शरीरमभिमृशन्ति । सू० ७ ।—पुनः क्षेत्रियभैषज्यान्युच्यन्ते । सू० ९ ।—उदकतृषाक्रान्तभैषज्य-मुच्यते । सू० १३ ।—सवासिनाविति सूक्तेन मन्थघटमभिमन्त्र्य पाययति व्याधिताव्याधितौ एकवस्त्रपरिहितौ सन्तौ । सू० १४-१७ ।—अरुपो उदर-गण्डुलकभैषज्यान्युच्यन्ते । इन्द्रस्य या महीति सूक्तेन कृष्णचणकान् घृतमिश्रा-ञ्जुहोति ॥ गोवालचित्रितं शरसंघ्यं परिवेष्ट्य पाषाणेन चूर्णयति । अग्नौ प्रतपति । ततः सूक्तान्तेऽग्नौ आदधाति । सू० १८ ।—सव्ये हस्ते पांसून् कृत्वा दक्षिणेन विसृज्य दक्षिणामुखः स्थितः सूक्तं जपित्वा व्याधितस्योपरि किरति । अरुषो गण्डुलकानां भैषज्यम् । सू० १९ ।—पांसून् मर्दयति हस्ताभ्यां व्याधितः । सू० २० ।—पला-शोदुम्बराम्राः समिध आदधाति । समाप्ता उदरकृमयः उदरगण्डुलकाश्च दृष्टकृमयश्च तेषां सर्वेषां भैषज्यम् । सू० २१ ।—अथ शोकृमिभैषज्यान्युच्यन्ते । सू० २६ ।—उद्यन्नादित्य इति सूक्तेन घृतमिश्रान् कृष्णचणकाञ्जुहोति । उद्यन्नादित्य इति सूक्तेन शरगोवालवेष्टितं धारयति पाषाणेन । सू० २७-२८ ।—सर्वव्याधिभैषज्य-

मुच्यते । आज्यतन्त्रं कृत्वा व्याधितं पर्वसु बद्ध्वा अक्षीभ्यां त इति सूक्तेनोदपात्रं सम्पात्य ततः पुनः सूक्तं जपित्वावसिच्य व्याधितस्य पर्वग्रन्थिर्विमुच्यते। तत उत्तर-तन्त्रम् । समाप्तमक्षिरोगनासिकाकर्णशिरोजिह्वाग्रीवाराजयक्ष्मादि सर्वभैषज्यम् । सू० २९ ।—हरिणस्येति सूक्तेन हरिणश्रृङ्गमणिं···बध्नाति ॥ हरिणश्रृङ्गेन सहोदकं आचामयति । अथोषाकाले एतत्कर्म । हरिणचर्मशङ्कुधानं प्रज्वाल्योदकेन प्रक्षिप्य ततो व्याधितमवसिञ्चति । सू० ३२ ।—बालरोगगृहीते च मैथुनदोषभैषज्यान्यु-च्यन्ते । पूतिगन्धमत्स्यसहितमोदनं व्याधिताय प्रयच्छति भक्षणार्थम्। सू० ३३ ।-अरण्यतिलैः प्रज्वालितमुदपात्रमभिमन्त्र्य प्रक्षिपति उषाकाले । अवसिञ्चति व्याधि-तम् । मैथुनराजयक्ष्मणि भैषज्यम् । अरण्यशणेन अरण्यगोमयेनावज्वालितमुदकम-भिमन्त्र्यावसिञ्चति । उषाकाले मार्जनाचमनम् । चित्यादिभिः प्रज्वालितमुदकमभि-मंत्र्य व्याधितमवसिञ्चति । मार्जनाचमनं च । केचित्तिलशणादिचतुर्षु कर्मसु अरण्ये अवसेकमिच्छन्ति । केचिद् गृहे अवसेकमिच्छन्ति । सू० ३४ ।—अथ सर्वभैषज्यान्युच्यन्ते । आ गाव इति दशभिः सूक्तैः मुञ्जशीर्षक्त्या इत्यृचा घटमुद-कपूर्णं संपात्याभिमन्त्र्य व्याधितमवसिञ्चति ॥

कण्डिका ॥ २८ ॥

सू० १ ।--स्कन्दविषभये भैषाज्यान्युच्यन्ते । तक्षकदेवतायै नमस्कारं कृत्वा ततो ब्राह्मणो जज्ञे वारिदमिति सूक्ताभ्यां उदकमभिमन्त्र्य आचामयति । संप्रोक्षति विषदुष्टं । सू० २ ।—क्रमुकवृक्षशकलं सहोदकमभिमंत्र्य तत आचामययति··· अभ्युक्षयति दूर्वावज्वालितमुदकमभिमन्त्र्यावसिञ्चति । जीर्णहरिणचर्मावज्वालित-मुदके प्रक्षिप्य तमभिमन्त्र्य ततोऽवसिञ्चति । मार्जालिकावकरतृणैरवज्वालितमुदक-मभिमन्त्र्यावसिञ्चति । सू० ३ ।–उदपात्रं सम्पात्य तत आप्लावयति विषदुष्टं विषलिप्ता-भ्यां सक्तुमन्थमुपमथ्य ततोऽभिमन्त्र्य पाययति । मदनफलानि प्रत्यृचं भक्षयति यथा च छर्दयति तथा च कर्त्तव्यम् । सू० ५ ।–शस्त्राद्यभिघाते रुधिरप्रवाहे भैषज्या-न्युच्यन्ते। रोहिण्यसीति सूक्तेन लाक्षोदकं क्वथितमभिमन्त्र्य व्याधिदेशमवसिञ्चति ॥ उषाकाले कर्म। अस्थिभङ्गे रुधिरप्रवाहे शस्त्राभिघातादौ भैषज्यम् । सू० ७ ।--रक्षो-भैषज्यमुच्यते । सदम्पुष्पा सन्ध्या प्रसिद्धा । सू० ८ ।--अथ सर्वव्याधिभैषज्य-मुच्यते ॥ भवाशर्वौ मन्वे वामिति सूक्तेन । सू० ९ । सर्वभूतग्रहभैषज्यमुच्यते । शमीपर्णचूर्णं शमीफले कृत्वाभिमन्त्र्य सक्तुमध्ये ददाति भक्षार्थं रक्षोग्रहभैषज्यम् । सू० १० ।--शमीचूर्णं शमीफले कृत्वाभिमन्त्र्यालङ्कारे ददाति । सू० ११ ।—शमीचूर्णं शमीफले कृत्वाभिमन्त्र्य व्याधितस्य शालां चूर्णैः परिकिरति । सू० १२।-भ्रमतिगृहीते पुरुषे भैषज्यमुच्यते । प्रज्ञानष्टे अज्ञानगृहीते अधर्मगृहीते त्रिवर्गे च

विनष्टे द्यूतक्रीडाद्यतिप्रवृत्ते कुबुद्धिभैषज्यम् । सू० १३ ।--राजयक्ष्मणि शिरोरोगे कुष्ठमये सर्वगात्रवेदनायां भैषज्यमुच्यते । यो गिरिष्वजायत इति सूक्तेन । अश्वत्थ देवसदन इति द्वे गर्भोऽसीति तृचेन च कुष्ठपिष्टं नवनीतमिश्रमभिमन्त्र्य अप्रतिहारं व्याधितशरीरं प्रलिम्पति । सू० १४ ।--अथ शस्त्राभिघाते भैषज्यमुच्यते। रात्री मातेति सूक्तेन । दुग्धलाक्षां क्वाथयित्वाभिमन्त्र्य पाययति । शस्त्राभिघाते काष्ठाभिघाते पाषाणपतनाभिघाते अग्निदग्धे सर्वशरीराभिघाते भैषज्यं समाप्तम् । सू० १५ ।—सूतिका स्त्री अरिष्टकस्य भैषज्यान्युच्यन्ते । ब्रह्मयज्ञानमनाप्ता "ये सहस्रधार एष ते इति सूक्तेन भक्तमभिमन्त्र्य ददाति भक्षणार्थम् । सू० १६।—समाप्तं स्त्रीप्रसवदोषे सूतिकारोगे च भैषज्यम् । अद्भुतदर्शने दोषनाशनभैषज्यं समाप्तम् । सर्वाद्भुतेषु भक्तकर्म वा मन्थकर्म वा आचमनकर्म वा कुर्यात् । यानि चरकादिवैद्यकेषु अद्भुतानि पठ्यन्ते तेषां सर्वेषामियं शान्तिभैषज्यं भवति। सू० १७ । अथ सर्वव्याधिभैषज्यान्युच्यन्ते । सू० १९ ।—द्वौ सम्पातौ भूमौ दत्वा ततः सम्पातितां भूमिमृत्तिकां गृह्य तत उदपात्रे प्रक्षिप्य व्याधितमाप्लावयति ।

कण्डिका ॥ २९ ॥

सर्वविषभैषज्यमुच्यते। सू० २-४।।—यत्ते अथोदकमित्यृचा अप्रदक्षिणं परिक्रामति व्याधितम्। विषस्तम्भनभैषज्यम् । शिरसि शिखां बध्नाति ।'' श्वेतवस्त्रेण ग्रन्थिं बध्नाति ।'''शणस्तम्बे ग्रन्थिं बध्नाति । विषं न विसर्पति देशस्थितं भवति शरीरे न सर्पति विषस्तम्भनं भवति।। सू०५।—वृषामेरव इत्यृचा। यस्मिन् स्थाने दष्टं तं स्थानं न पीडयति । ऋचं जपित्वा दंशाद्द्विपमन्यत्र गच्छति । विषशासने भैषज्यम् ।। सू० ६ ।—चक्षुषा ते चक्षुरित्यृचा आचार्यस्ततः प्रदक्षिणं परिक्रामति। अपेह्यरिरसीत्यृचं जपित्वा तृणानि प्रज्वाल्य ततो अह्यभिमुखं प्रक्षिपति । सू० ७ ।—अपेह्यरिरित्यृचं जपित्वा यतो दृष्टस्ततो ज्वलिततृणानि क्षिपति दर्शनेन । सू० ८ ।—कैरातपृश्न इत्यृचा उदकं गृहतृणावज्वालितमभिमन्त्र्य व्याधितं पाययति प्रोक्षति च। सू० ९ ।—असितस्य तै मातस्येति ऋचा आर्त्नीज्यापाशं संपात्याभिमन्त्र्य बध्नाति आलिगी च विलिगी च उरुगूलाया इति च द्वाभ्यां मधुमक्षिकां मधुवृक्षमृत्तिकामभिमन्त्र्य पाययति । सू० १४ ।—अलाबुवृत्तं सम्पात्याभिमन्त्र्य बध्नाति । सू० १५। अथ दुष्टवक्तॄणां मुखस्तम्भनमुच्यते । एका च मे यद्येकवृषोऽसीति सूक्ताभ्यां कलापपच्छूवां मधूदकं च एकत्र कृत्वा व्याधितं पाययति । दुष्टवक्तृमुखबन्धनभैषज्यम् । दुष्टपुरुषबन्धनम् । परोक्षेण वदन्ति । सू० १६ ।—यद्येकवृष इति सूक्तेन भोजनमभिमन्त्र्य भक्षयति शापभैषज्यम् । सू० १७ । यद्येकवृष इति सूक्तेन गृहद्वारमभिमन्त्र्य ददाति अपिदधातीत्यर्थः । सू० १८ ।—अथ ज्वरभैषज्यमुच्यते । सू०

१९ ।—अग्निस्तक्मानमिति सूक्तेन । ताम्रस्रुवेण मूर्ध्नि संपातानानयति। तत उत्तर-तन्त्रम् । एकस्मिन् तन्त्रे दावाग्निप्रणयनम्। सू० २० ।—अथ कृमिभैषज्यमुच्यते। करीरमूलं सम्पात्याभिमंत्र्य बध्नाति । गोबालैः करीरकाष्ठं वेष्टयित्वा सूक्तं जपित्वा पाषाणेन चूर्णयति । ततः सूक्तेनाग्नौ प्रतपति । ततः सूक्तेनादधाति। सू० २४ ।—एकविंशत्युशीराणां मूलान्यभिमन्त्र्य ततः पाषाणेन कुदयति ततः सूक्तं जपित्वा उशीराण्यग्निना दहति । सू० २६ ।—एकविंशत्युशीरपिञ्जूली-सहितं सम्पात्याभिमन्त्र्य ततो व्याधितमाप्लावयति । सू० २७ ।—अथ राक्षस-भैषज्यमुच्यते ।—वयोनिवेशनकाष्ठश्रृतम् । सू० २८।—अथ सर्पविषभैषज्यमुच्यते। सर्पविषलिङ्गयुपतापः । सू० ३० ।—श्लेष्मभैषज्यमुच्यते। उदकेन ह्रदं क्रियते । अप्स्विदं कृत्वा तत्राग्निं प्रज्वाल्य । अस्थिस्रंसमिति सूक्तेन काष्ठशकलं संपात्य ततः शकलेन सम्पातवतावसिञ्चति व्याधितम् ॥

कण्डिका ॥ ३० ॥

सू० १।२ ।—अथाक्षिरोगे भैषज्यमुच्यते । सर्षपकाण्डमणिं संपात्याभि-मंत्र्य बध्नाति सर्षपतैलेन सम्पातवन्तं करोति। आज्येन प्रधानं अङ्गानि सर्षपतैलेना-भ्यज्य मणिं वा ततो बध्नाति । सू० ३ ।—सर्षपशाकं सर्षपतैलेनाभ्यक्तमभिमन्त्र्य व्याधिताय प्रयच्छति । सू०५।—मूलक्षीरं मुखेन प्राश्य ततोऽभिमन्त्र्य अङ्क्ते अक्षिणी व्याधितस्य । मूलक्षीरं क्षीरपाटिकालग्नं तदुच्यते । सू० ६ ।—मूलक्षीरं भक्षयति । सू० ७ ।—पित्तज्वरभैषज्यमुच्यते। ताम्रस्रुवेण मूर्ध्नि संपातानानयति। अस्मिन् तन्त्रे दावाग्निप्रणयनं कुर्यात् । सू० ८ ।—अथ केशवृद्धिकरणे केशपतने भैषज्य-मुच्यते । वृक्षभूमिजातौषधीभिरवज्वालितमुदकमभिमंत्र्यावनक्षत्रेऽवसिञ्चति । सू० ९ ।—मधु क्राथयित्वा विभीतकं क्राथयित्वाभिमन्त्र्य व्याधितमवसिञ्चति । सू० १० ।—दारुहरिद्रा हरिद्रे च द्वाभ्यां क्राथयित्वाभिमन्त्र्यावसिञ्चति । सू०११ ।—अथ उदरतुण्डभैषज्यमुच्यते। कृष्णं नियानं सस्रुरिति सूक्ताभ्यां चित्याद्योषध्या सहित-मुदकमभिमन्त्र्य ततो व्याधितमवसिञ्चति । सू० १२ ।—कृष्णं नियानं सस्रुषो-रितिसूक्ताभ्यां मरुतो यजते पाकयज्ञविधानेन यथा वरुणम्। मारुतं क्षीरौदनं मारुतश्रृतम् । सू० १३ ।''''''अथ हृदयदग्धे जलोदरे कामले च भैषज्यान्युच्यन्ते। मधुदकमनुलोममाहार्यं तत्र वलीकतृणानि प्रक्षिप्य व्याधितमवसिञ्चति । सू० १४ ।—अथ गण्डमालाभैषज्यमुच्यते। पञ्च च या इति सूक्तेन गोपाशूलिकां पञ्चाशत्पंचाशत्यधिकाग्नौ प्रज्वाल्य अधस्तादयः समिध आदधाति ।

कण्डिका ॥ ३१ ॥

सू० ४ ।—पुरोडाशं'''पयो जुहोति । व्रीहीन् । आवपति शान्तवृक्षसमिध

आदधाति । रक्षोग्रहभैषज्यम् । सू० ५ ।—अथ सर्वभैषज्यमुच्यते । वैश्वानरो न ऊतये ऋतावानं वैश्वानरमिति सूक्ताभ्यां उदपात्रमभिमन्त्र्य पाययति । सक्तुमन्थं पाययति । हरिद्रां सर्पिषि पाययति । अप्सु घृतमुदकमभिमन्त्र्य पाययति । सू० ६।—अपवादे भैषज्यमुच्यते, बहुभाषणमधर्मे च प्रवर्तते तस्यापवादः । अभ्यातानान्तं कृत्वा अस्थाद् द्यौरिति पूर्वेण स्वयंपतिते गोशृङ्गे उदकं कृत्वाभिमन्त्र्याचामयति अभ्युक्षति च । सू० ७ ।—अथ उदरे वा हृदये वाङ्गे वा सर्वाङ्गे वा शूले उत्पन्ने भैषज्यमुच्यते । या ते रुद्र इति सूक्तेन शूलमणिं संपात्याभिमन्त्र्य बध्नाति । शूलं लोहमणिः पाषाणो वा दारिलरुद्रमतम् । यां ते रुद्र इति व्याधितमभिमन्त्रयते रुद्रभाष्यमतम् । शूलभैषज्यं समाप्तम् । सू० ८ ।—रक्षोग्रहे भैषज्यमुच्यते । उत्सूर्य इति चित्याद्योषधीभिः सहोदकघटमभिमन्त्र्य व्याधितमवसिञ्चति । शम्युदकेन सह अवसिञ्चति । शमीबिम्बमुदकसहितं अवसिञ्चति शीर्षपर्णीमुदकं दत्त्वा अवसिञ्चति । सू० ९ ।—दुष्टगण्डविशिष्टभैषज्यमुच्यते । तैलमभिमन्त्र्य व्याधितं गण्डं संमार्ष्टि । सू० १० ।—स्थूणायां निकर्षति घृष्यति व्रणं रुधिरकृते दुष्टव्रणे दुष्टगण्डव्याधिभैषज्यं समाप्तम् । सू० ११ ।—अक्षितव्रणभैषज्यमुच्यते । गोमूत्रमभिमन्त्र्य तेन व्रणं मर्दयति । यस्य व्रणस्य मुखं नास्ति । अक्षतदुष्टव्रणे भैषज्यम् । सू० १४ ।—तृणरजस्य फेनमभिमन्त्र्य व्रणं प्रलिम्पति । यस्य गण्डदुष्टस्य रुधिरं न च वहति तस्य समाप्तमक्षतव्रणभैषज्यम् । सू० १६ ।—गण्डमालाभैषज्यमुच्यते । शंखं घृष्ट्वाभिमन्त्र्य गण्डमालां प्रलिम्पति । श्वानलालां कुकुंटलालां प्रलिम्पति । जलौकामभिमन्त्र्य गण्डमालायां संसर्जयति । सू० १७ ।—सैन्धवलवणं चूर्णयित्वाभिमन्त्र्य गण्डमालाया उपरि प्रकिरति । ततस्तस्योपरि निष्ठीवति मुखलालां प्रक्षिपति । सू० १८।—अथ पक्षिणोऽभिवाते भैषज्यमुच्यते । श्वानपदस्थानमृत्तिकामभिमन्त्र्य पक्षाहतं देशं प्रलिम्पति । पक्षहतभैषज्यम् । सू० १९ ।—शुनो मक्षिकामभिमन्त्र्याग्नौ प्रक्षिप्य ततो धूपयति व्याधिप्रदेशम् । काकगृध्रकपोतश्येनादिपक्षिणाभिवाते भैषज्यं समाप्तं । सू० २० ।—अथ गण्डभैषज्यमुच्यते । ग्लौरितः प्रपतिष्यतीति अर्धर्चेन गोमूत्रमभिमन्त्र्य गण्डं मर्दयति । प्रक्षालयति । दन्तमलं प्रलिम्पति । तृणरजःफेनं··· प्रलिम्पति । समाप्तं गण्डभैषज्यं गण्डस्फोटिकां इत्यर्थः । सू० २१ ।—गर्दभाणुरं गण्डभैषज्यमुच्यते··· । शान्त्युदकमभिमन्त्र्य क्षतं प्रोक्षति । आज्यं जुहोति । ततो मनसा संकल्पयति सम्पातान्ददाति । समाप्तं गर्दभदशजातिपिकादिक्षतगण्डभैषज्यम् । सू० । २२ ।—पापगृहीते जलोदरे च भैषज्यमुच्यते । सू० २६ ।—विषे उपविषे स्थावरजङ्गमे च भैषज्यमुच्यते । मक्षिकायां च भैषज्यम् । सू० २७ ।—कासो श्लेष्मपतने च भैषज्यमुच्यते । भोजनमभिमन्त्र्य ददाति । सक्तुमभिमन्त्र्य भक्षयति । उपस्थानमादित्यस्य । उदकमभिमन्त्र्याचामयति । सू० २८ ।—केशवृद्धिकरणे भैषज्य-

मुच्यते । काचीमाचीफलमणिं बध्नाति । जीवन्तीफलं बध्नाति । भृङ्गराजं बध्नाति । केशदृढीकरणे केशजनने ह्रस्वकेशेषु वृद्धकरणभैषज्यम् । माषतिलादि कृष्णमन्नं भक्षयित्वा काचीमाचीफलं भृङ्गराजाभ्यां सहोदकमभिमन्त्र्य रात्रौ ब्राह्मे मुहूर्तेऽवसिञ्चति ।

कण्डिका ॥ ३२ ॥

सू० १ ।—जम्भगृहीते भैषज्यमुच्यते । स्तनमभिमन्त्र्य बालकाय प्रयच्छति पानार्थं पतिः करोति कर्ता करोति । दुःस्वप्ननाशने भैषज्यम् । सू० २ ।—पाययति बालकं पिता वा माता वा पाययति तत्रोपरि दुह्यते अभ्यवदुग्धाः । सू० ३ ।—सर्वव्याधिभैषज्यमुच्यते......सू० ५ । वृश्चिकभैषज्यमुच्यते "तिरश्चिराजेरित्यृचेन" ज्येष्ठीमधु पिष्ट्वाभिमन्त्र्य पाययति । सू० ६ ।—क्षेत्रमृत्तिकां जीवकोषणीचर्मवेष्टितां मणिं कृत्वा सम्पात्याभिमन्त्र्य बध्नाति । वृश्चिकमशकभैषज्यम् । जीवतः पशोश्चर्म जीवकोषणीत्युच्यते । सू० ७ । यानि यानि पायनान्युक्तानि तानि "तिरश्चिराजेरि"-त्यस्य सूक्तस्य भवन्ति । समासं वृश्चिकपिपीलिकामशकदंशशार्कोटजलूकाभैषज्यम् । ···सू० ८ । अथ गण्डमालाभैषज्यमुच्यते । "अपचितां लोहितीनामिति द्वाभ्याम् । "आसुसुस" इत्येका एताभिस्तिसृभिर्वंशधनुषं कृष्णोर्णमयीं ज्यां कृत्वा चित्रितेन शरेण गण्डमालां विध्यति प्रत्यृचम् । त्रयः शरा भवन्ति । सू० ९ ।—"या ग्रैव्या अपचित" इति चतुर्थ्या ऋचा चतुर्थेन शरेण गण्डमालामभिनिधाय विध्यति । सू० १० ।-कृष्णोर्णज्यावज्वालितोदकमभिमन्त्र्य उषाकाले...अवसिञ्चति व्याधितम् । सू० ११ ।—अथ राजयक्ष्मभैषज्यमुच्यते ।......तृचेन वीणातन्वीखण्डं सम्पात्याभिमन्त्र्य बध्नाति । सू० १२ ।—वाद्यवीणा तस्याङ्गस्वरं विष्णोर्वाद्यवीणाकण्ठं शिखण्डं वीणातन्त्रीं बद्ध्वा सम्पात्याभिमन्त्र्य बध्नाति । सू० १३ । स्वयंपतितवीरिणखण्डत्रयमेकत्र बद्ध्वा सम्पात्याभिमन्त्र्य बध्नाति । सू० १४ ।—जलोदरे वरुणगृहीते भैषज्यमुच्यते । सू० १७ ।—अथ ज्वरभैषज्यमुच्यते । "नमो रूण्येति" सूक्तद्वयेन खट्वायां व्याधितं कृत्वा बध्वा तत अधः खट्वायां व्याधितमुपवेश्य तत उदकमभिमन्त्र्य व्याधितमवसिञ्चति । व्याधितं सिच्यमानं यथा मण्डूकमभिषिच्यते तथा कुर्यात् । सू० १८ ।—अथ सर्वभैषज्यमुच्यते । अर्थसूक्तेन व्याधितेन...... अभिमृशति । सू० २० ।—सर्वविषभैषज्यमुच्यते। सू० २१ ।-"इन्द्रस्य प्रथम०" इत्यर्थसूक्तेन पैद्वं कीटकं तालिणीति लोकप्रसिद्धा तं पिष्ट्वाभिमन्त्र्य नस्तं ददाति... दक्षिणनासिकापुटे । सू० २२ ।—अथ सर्पभये भैषज्यमुच्यते । पैद्वं श्वेतवस्त्रवेष्टितमभिमन्त्र्य यत्र सर्पभयं तत्र निखनति । पैद्वं हिरण्यवर्णसदृशः कीटश्चित्रितो वासः पैद्व इत्युच्यते। सू० २४ ।—"आरे अभूदित्यृचान्तेन उल्मुकं प्रताप्याभिमन्त्र्य ततो

विषव्रणं दृष्ट्वा तत्संमुखं क्षिपति । सू० २५ ।—सर्पादर्शने यतो दष्टस्ततः प्रक्षिपति उल्मुकम् । सू० २६-२७ ।—अथानुक्तेषु कौशिकीयेषु सर्वव्याधिभैषज्येषु उक्तेषु चानुक्तेषु वा पठितेषु तत्र सर्वभैषज्यमुच्यते । सर्वव्याधिभैषज्येषु मन्त्रओषधिवनस्पतीनामनुक्तान्यप्रतिषिद्धानि भैषज्यानां अंहोलिङ्गाभिरुच्यते अंहोलिङ्गेन गणेन तानि कर्त्तव्यानि । "आशानामाशापालेभ्य" इत्येका अंहोलिङ्गगणः । यानि च वै प्रतीकान्युच्यन्ते तान्यभिमन्त्रणेन सर्वव्याधिभैषज्यानि भवन्ति तान्युच्यन्ते । "अक्षिभ्यां ते मुञ्चामि त्वा०", उत देवाः०", "आवतस्तशीर्षक्तिं, अंहोलिङ्गगणः । एतैः पञ्चप्रतीकैः...अन्यतमेनैकेनाभिमन्त्रणं कुर्यादित्यर्थः । अंहोलिङ्गगणः ।" सर्वव्याधिषुभैषज्यानि । अथवा तैः सूक्तैः कर्तव्यानि । अथवा अंहोलिङ्गेन कर्तव्यानि । उक्तव्याधीनां परिगणनं क्रियते । सू० २८ । अथ स्त्रीकर्मणो विधिं वक्ष्यामः । पुत्रकामायै स्त्रीकामायै स्त्रियै मृतापत्यायै रजोनाशे च शान्तिरुच्यते ।

कण्डिका ॥ ३३ ॥

सू० १ ।—अथ प्रसवकाले इदं कर्म क्रियते यथा सुखेनैव प्रसवो भवतीत्यर्थः । अथ प्रसूतिकरणमुच्यते सू० ३ ।—छिद्यमानासु मुञ्जेषीकासु गर्भसंस्थमरणं भवेत् । एकं कर्म ॥ सू० ५ ॥ शालाग्रन्थीन् विचृतति । द्वितीयं कर्म सू० ६ ।—कटिप्रदेशे बध्नाति तृतीयं कर्म । केचित् "वषट् ते पूषन्निति सूक्तेन तैलमभिमंत्र्य प्रसवकाले अभ्यञ्जनं कुर्वन्ति । सू० ८ ।—"अन्या वो अन्यमवेति" ओषध्यस्ता एवं एकत्र बध्नाति । सू० ९ ।—सर्वत्रौषधिखननमेतेन विधानेन कर्तव्यं । यत्र क्वचिदौषधिखननं तत्र सर्वत्रानेन विधानेन कर्तव्यं । सू० १८ ।—यदि तान्येकत्र भवन्ति तदा पुत्रो जायते । विज्ञानकर्मेदं । सू० २० ।—यदि पुंनामधेयं स्पृशन्ति तदा कुमारो जायते ।

कण्डिका ॥ ३४ ॥

सू० १ ।—अथ वन्ध्याप्रजननकरणमुच्यते । सू० २ । —ततो गृहे पुरोडाशं प्रमन्दं कटुपा अलंकारान्सम्पात्य प्रयच्छति । सू० ३ ।—अथ मृतापत्यायाः स्त्रियस्तस्याः शान्तिरुच्यते । गर्भस्रावे जातमात्रे मृते वा स्त्रियां वा पुरुषे वा बाले वा यूनि वा मृते इदं कर्म । त्रीणि मण्डपानि प्रागग्राणि कृत्वा एकस्मिन् मण्डपे अभ्यातानान्तं कृत्वा ।... सू० ४ ।—पालाशपत्रे ॥ ५ ॥ सीसेषूपरि स्त्रीमधिष्ठाप्य तेनोदपात्रेणाप्लावयति । सू० १० । —प्राक्पश्चिमद्वारेषीकं द्वार्योरुपरि बद्ध्वा ततो "निःसालामि"ति-सूक्तेनौदुम्बरीः समिधः मृतापत्यायै आदधाति । सू० १२ ।—पतिलाभकर्माण्युच्यन्ते । सू० १३ ।—आसयति कुमारी । सू० १४ ।—सृगालखरमृत्तिकाया वेदिं कृत्वा हिरण्याङ्गारान् गुग्गुलु मौक्षं च यथोक्तान् सम्पात्य बन्धनं धूपनं प्रलेपनं कुर्यात् । पूर्वस्य संहिताविधिश्लोकः ।

आवपेत्सुरभिगन्धान् क्षीरे सर्पिस्तथोदके ।
एतदायनमित्याहु रौक्षं तु मधुना सह ॥—

सू० १५ ।—दक्षिणामुखी कुमारी प्रक्रामति । सू० १६ ।—नावं सम्पात्य "भगस्य नाव" मित्यृचा उत्तारयति । सू० १७ ।—सप्तदानतंत्र्या वत्सान् बन्धयित्वा सम्पात्याभिमंत्र्य कुमारीं मोचयति । स्वयं न कर्त्ता । यदि प्रदक्षिणं मोचयति तदा पतिलाभः । सू० १८ ।—वृषभं विसर्जयति । सू० २१ ।—आगम कृशरं आशयति आज्यतंत्रे भगिनीकं । सू० २३ ।—तत "अर्यम्ण" इत्यर्धर्चेन गृहाभ्यन्तरे कोणे, बलिहरणं करोति । सू० २४ ।—यत आगच्छति काकस्तत आगच्छति वरः समाप्तानि पतिलाभकर्माणि ।

कण्डिका ॥ ३५ ॥

सू० १ ।—पुंसवानान्युच्यन्ते । सू० २ । — नक्षत्रकल्पे उक्तानि पुंनक्षत्राणि सू० ३ । —बाणं विवृहति । शरमणिं सम्पात्याभिमंत्र्य बध्नाति । सू० ४ ।—अध्यण्डे बृहतिपालाशविदार्यौ वा एकत्र पिष्ट्वाभिमंत्र्य दक्षिणेनाङ्गुष्ठेन दक्षिणस्यां नासिकायां नस्तं ददाति । पुत्रार्थं कर्म पुंसवनमित्युच्यते । सू० ५।६।७ ।—केलूनांश्च पलाशत्सरु निर्वर्तें निघृष्य शिश्ने आधाय ततो मैथुनं करोति । समाप्तं गर्भाधानं । सू० ८।९ । —पुनः पुंसवनमुच्यते मधुमन्थेऽग्निं निक्षिप्याभिमंत्र्य पाययति स्त्री । सू० १०।—शमीगर्भाश्वत्थस्याग्नि कृष्णोर्णया वेष्टयित्वा सम्पात्याभिमन्त्र्य बध्नाति आज्यतन्त्रे । समाप्तं पुनः पुंसवनं । सू० ११ ।—अथ गर्भाधानमुच्यते हस्तावर्तकं कर्णादिकं सम्पात्याभिमन्त्र्य बध्नाति आज्यतन्त्रे । समाप्तं गर्भाधान । सू० १२ ।—अथ गर्भदृंहणमुच्यते । "अच्युता द्यौरि"ति । सू०१६ । "धाता दधात्वि"ति चतसृभिर्गर्भिण्या उदरमभिमंत्रयते वीरकर्म समाप्तं सू० १७ । अथ प्रजननकर्म । "प्रजापतिर्जनयती"ति सूक्तेन । सू० १९ ।—उदकुलिजं संम्पातवन्तं कृत्वा गर्भिणीं परिहृत्य मध्ये निनयति । सुरा कुलिजं ... भक्तं सुरां प्रपां सम्पात्याभिमन्त्र्य प्रजाकामायै प्रयच्छति । समाप्तं प्रजागर्भकर्म वन्ध्यायाः । सू० २० । —अथ सीमन्तकर्म उच्यते । श्वेतपीतसर्षपान् सम्पात्याभिमन्त्र्य पुण्याहान्ते बध्नाति । सू० २१ ।—अथ स्त्रीवशीकरणमुच्यते । वृक्षत्वक् , तगरं, शरखण्डं, अञ्जनं, कुष्ठं, ज्येष्ठीमधु, वातसंभ्रमतृणानि । एतानि द्रव्याणि आज्येनालोड्य अङ्गं समालभेत् रुच्यर्थम् । सू० २२ । —अङ्गुल्या तुदति भार्यायामुदरे पृष्टौ रुच्यर्थी । सू० २३ । —एकविंशतिबदरीकण्टकानादधाति । सू० २४ ।—एकविंशतिबदरीप्रान्तानि सूत्रेण वेष्टयित्वा । सू० २६ । —खट्वां अधोमुखपट्टिकां गृहीत्वा...स्वपिति । त्रिरात्रं कर्म । सू० २७ ।—अर्दयच्छेते । सू० २८ ।—समाप्तानि संवननानि वशीकरणानि कामविषये स्त्रियामुत्साहो भवति ।

कण्डिका ॥ ३६ ॥

सू० १–२ ।—स्वापनविघ्नशमनम् । स्त्रीस्वापनकर्म उच्यते । अभ्यन्तरद्वारे शेषमुदकं न्युब्जति । सू० ४ ।—स्त्रियाः खट्वाया दक्षिणपादमभिमन्त्रयते । खट्वाया रज्जुमभिमन्त्रयते । स्त्रीस्वापनं पुरुषस्य विषये काम उत्पद्यते । कामविषये स्त्रीस्वापनं समाप्तम् । लज्जाप्रच्छादनं लज्जा भवतीत्यर्थः । स्वापनं सर्वेषां मानुषाणां निद्राकामानाम् । मैथुनमाचरतो विघ्नं न भवति । सू० ५-६ ।— अथ पलायिन्याः स्त्रियाः बन्धनकर्म तन्त्रक्रमेण क्रियते । रज्जु कल्पते तद्रज्जुवेष्टनमुच्यते । "अस्थाद् द्यौरस्थादि"ति द्वितीयेन सूक्तेन रज्जुवेष्टनमभिमन्त्र्य वंशाग्रे बध्वा मध्यमस्थूणे बध्नाति । सू० ७ । —शयनपादमभिमन्त्र्य उत्पले बध्नाति । सू० ९ ।—अङ्कुशेन तिलाञ्जुहोति । सू० १० । —जायापत्योरक्रोधकरणमुच्यते । सू० १२ । —सौभाग्यकरणमुच्यते । शङ्खपुष्पीमूलमोषधिवत् खात्वा ... बध्नाति । सौवर्चलपुष्पमभिमन्त्र्य यस्य सौभाग्यमिच्छति तस्य पुष्पमभिमंत्र्य तस्य शिरसि बध्वा । सौवर्चलं सूर्यवेलेति प्रसिद्धा । सू० १३–१४ ।—दुष्टस्त्रीवशीकरणमुच्यते "रथजितामि"ति सूक्तैस्त्रिभिर्माषानभिमन्त्र्य स्त्रियाः क्रमेषु वपति ।··· चणकान्··· वपति । खट्वास्थाने वा गृहे शयनदेशे वा । शरभृष्टीरादीप्ता अभिमन्त्र्य प्रतिदिशमभ्यस्यति । एषु पतिप्रतिकृतिं कृत्वा··· हृदये विध्यति । दार्भ्यूषेण भाङ्गज्येन । समाप्तानि पतिद्वेषिणीकर्माणि । पुरुषो वा स्त्रीणां द्वेषं करोति । अनेन कर्मणा शान्तिर्भवति । सू० १५ ।—अथ स्त्रियो वा पुरुषस्य वा दौर्भाग्यकरणमुच्यते । दहनघातिता गौः अनुस्तरणीत्युच्यते । ईशानहता ज्वरहतेत्युच्यते । तत उलूखलदरणे त्रिशिले निखनति तत उलूखले ददाति । उपरि यस्य दौर्भाग्यं क्रियते तस्य एतानि गृह्णीयात् । सू० १६ ।—स्त्रीपुष्पमालां पिष्ट्वा अन्वाह । सू० १७—कृष्णसूत्रेण वेष्टयित्वाभिमन्त्र्य··· व्यत्यासं अश्मानं शालाया उपरि ददाति । व्यत्यासेन निखनति दौर्भाग्यकामः । सू० १८ ।—अथ तस्याः सौभाग्यकरणमुच्यते । "यं ते भगं निचख्नु"रिति–शिला उत्खनति उत्पादयति । "भगमस्या" इत्यनेन सूक्तेन यत्कृतं तदनया विनश्यति । समाप्तं यस्या दौर्भाग्यं कृतं तस्याः सौभाग्यकरणम् । सू० १९ ।— अथ सपत्नीजयकर्माण्युच्यन्ते । सपत्नीविद्वेषणं··· बाणपर्णी मासिका लोकेप्रसिद्धा । सू० २२ ।— अथ स्त्रीविषये काम उत्पन्ने कामविनाशकान्युच्यन्ते । यस्मिन्देशे काम उत्पन्नस्तत्स्थानं यावत् स्त्री वा पुरुषो वा··· व्रजति । सू० २५ ।—स्त्रीविषये ईर्ष्याविनाशकान्युच्यन्ते । ईर्ष्यालुं दृष्ट्वा जपति । सक्तुमन्थमभिमन्त्र्य ईर्ष्यालुकाय ददाति···भक्षार्थम् ॥ २६ ॥ ईर्ष्यालुकस्य कटिप्रदेशे·खल्वाभिमन्त्र्य धमति ॥ २८ ॥ अथ मन्युविनाशकान्युच्यन्ते स्त्रीविषये पुरुषस्य । मन्युमन्तं

पुरुषं दृष्ट्वाश्मानमभिमन्त्र्य हस्तेन गृह्णाति ॥ सू० २९ ॥ अश्मानं भूमौ निदधाति। सू० ३१ ।—मन्युमतः पुरुषस्य छायायां धनुरभिमन्त्र्य सज्जं करोति। सू० ३२—अथ सर्वविषये मन्युविनाशकान्युच्यन्ते। दर्भमूलमोषधिवत् खात्वा सम्पात्याभिमन्त्र्य बध्नाति मन्युके । सू० ३३ ।—अवीरजननमुच्यते अपुत्रजननमित्यर्थः। अग्रे जातानित्यृचा अश्वतरीमूत्रेण पाषाणं निघृष्य ततोऽभिमन्त्र्य भक्तेन सह ददाति ।...अलंकारं समालभते। विद्वेषणं परस्य । अथ वन्ध्याकरणमुच्यते। "प्राग्या"निति तृचेन अश्वतरीमूत्रेण । सू० ३४ ।—समाम्नानि विद्वेषणानि परस्त्रीवन्ध्याकरणानि। सू० ३५ ।—जारोच्चाटनमुच्यते... ॥ ३७ ॥ पाषाणमभिमन्त्र्य जारमैथुनस्थाने प्रक्षिपति उच्चाटनार्थम्। सू० ३८ ।—पुरुषस्य स्त्रिया सह परस्परं विद्वेषणकरणान्युच्यन्ते। बाणापर्णी लोहिताजाया द्रप्सेन संनीयाभिमंत्र्य शयनमुपरि किरति । स्त्रीपुरुषस्य उभयरुचिविनाशकरणम्। सू० ३९ ।—अथ दौर्भाग्यकरणमुच्यते।'''हृदयं मुखं वाभिमन्त्रयते परस्त्रियै। समाम्नानि स्त्रीकर्मकरणानि। तत्र भद्रश्लोकः।

भैषज्यकर्माणि प्रोक्तानि सर्वव्याध्युपशान्तये।
स्त्रीकर्माणि ततः पश्चाच्चतुर्थः संहिताविधौ ॥ इति चतुर्थोऽध्यायः ॥ ४ ॥

कण्डिका ॥ ३७ ॥

अथ विज्ञानकर्मणां विधिं वक्ष्यामः। लाभालाभजयपराजयसुखदुःखोत्कर्षापकर्षसुभिक्षदुर्भिक्षक्षेमाक्षेमभयाभयरोगारोगाः। त्रसोऽस्तीति नवेति-धनाधनधर्माधर्म-मरणामरणं। धान्यं भविष्यति न वेति। क्षेत्रं भविष्यति न वेति। गृहे वासो भविष्यति न वेति धान्यपुत्रपशुहिरण्यस्रग्वस्त्राणि च। विद्याशास्त्रादिलाभो भविष्यति न वेति। जीवितमरणे गमनागमने बलाबले। सदसद्योगाद् व्याधितस्य जीवितमरणाभ्यां प्रसवे पुत्रयोगात् पुत्रे जाते धर्माधर्मसंयोगात् मित्रामित्रसंयोगात्। ग्रामोऽस्ति वा न वेति। पुरुषस्य विवाहोऽस्ति वा न वेति। संवत्सरे मासे वा भविष्यति सुभगा वा दुर्भगावा। गृहं ग्रामादि, भविष्यति न वा। आधानं भवेन्नवेति। इत्यादि मनसा वाचा वा संचिन्त्य तत्कर्म कुर्यात्। सू० १ ।—राध्यमानं क्षीरौदनमभिमन्त्र्य तत आसिञ्चेत्। मनसा चिन्तयेत्। वाचा चिन्तयेत्। ओदनं श्रृतं भवेदश्रृतं वा भवेत्। यदि यथा चिन्तितं भवति तदा तस्य कर्मसिद्धिर्भविष्यतीति जानीयात्। इध्ममुपसमाधायाभिमन्त्र्य आयाचेत्। उत्कुचनेनार्थः। दर्भस्तम्बमभिमन्त्र्य आयाचेत्। यत्र समं विषमं नानार्थसिद्धिः। पूर्वेद्युः पाठाभिमंत्र्य आयाचेत्। पत्राणां पत्राणां संकोचनेनार्थसिद्धिः। सू० २ ।—अम्बयो यन्तीति सूक्तेन संग्रामे

पूर्वेद्युर्वेदिं कृत्वा अभिमंत्र्य द्वितीयेऽहनि समविषमेण भावेन सिद्धिः । सू० ३ ।—पञ्चग्रन्थिवेणुदण्डमभिमंत्र्य आयाच्यं समे धारयति । अभीष्टदिशि पतनेनार्थसिद्धिः । इषुं सन्धायाभिमन्त्र्यायाचेत् । चिन्तितं प्रक्षेपणेनार्थं । कुम्भे उदकपूर्णे दुग्धं प्रक्षिप्यायाचेत् । जनाधिकेनार्थसिद्धिः यथा चिन्तितं तथा सिद्धिः कमण्डलुमुदकपूर्णं दुग्धमाक्षिप्याभिमंत्र्यायाचेत् । जनाधिकेनार्थसिद्धिः । दर्भस्तम्बमभिमन्त्र्यायाचेत् । काम्पीलशाखां मूर्ध्नि धारयित्वाभिमन्त्र्यायाचेत् । इष्टदिक्पतनेनार्थः । युगमभिमंत्र्यायाचेत् ।''''''धान्यमभिमंत्र्यायाचेदग्नौ प्रक्षिपेत् प्रदक्षिणज्वलनेनार्थः। हस्तयोरङ्गुलिद्वयमभिमन्त्र्यायाचेत् । अज्ञातस्य "वेनस्तदि"ति सूक्तेन एकविंशत्या शर्करया अभिमन्त्र्यायाचेत् धनेनार्थः समविषमभावेन यथावतार्थः । सू० ४।—अथ नष्टद्रव्यपरीक्षणे क्रियमाणे इदं कर्म । "वेनस्तदि"ति सूक्तेन । सू० ६ । वेनस्तदिति सूक्तेनाहतेन वस्त्रेण वेष्टितं हलं सम्पात्याभिमन्त्र्य येन हरेतां ततो नष्टः । अक्षाः कुम्भवत्कृत्वा सम्पात्य येन हरेतां ततो नष्टः। समाप्तं नष्टद्रव्यपरीक्षणे विज्ञानम् । सू० ७ ।—अथ कुमारीविज्ञानमुच्यते । वेनस्तदिति सूक्तेन । सू० ११ ।—"वेनस्त"दिति सूक्तेन कुमारीमुदकाञ्जलिं पूरयित्वाभिमन्त्र्य । सू० १२ । समाप्तं कुमारीविवाहकाले विज्ञानम् ।

कण्डिका ॥ ३८ ॥

अथ नैमित्तिकान्युच्यन्ते । सू० १ ।—दुर्दिनविनाशकर्मणां विधिं वक्ष्यामः । दुर्दिनमभिमुखमुपतिष्ठते सर्वत्र दुर्दिनविनाशकानि । सू० २ ।—प्रत्यृचमुदकं प्रक्षिपति । सू० ३ ।—खड्गं गृहीत्वोपतिष्ठते अभिमुखः । उल्मुकं गृहीत्वोपतिष्ठते सूर्यस्याभिमुखः । लकुटं गृहीत्वोपतिष्ठते । सू० ४ ।—उन्मृजानो अर्कमुखो भूत्वोपतिष्ठते । सू० ६ ।—पटेरकसमिध अर्कसमिध आदधाति स्थण्डिले । सू० ७ ।—खदां खात्वा खदां त्रिःपरिक्रम्यार्कनिर्लुञ्चितं कृत्वा खदायां प्रक्षिपति सूक्तान्ते । ततः पांसुना खदां पूरयति । वृष्टिनिवारणं समाप्तं । सू० ८ ।—अशनिनिवारणं कर्म व्याख्यास्यामः । अशन्यभिमुखमुपतिष्ठते । सू० ९ ।—एतत्कर्मक्षेत्रे । अशनिनिवारणं ।

अतिवृष्टिरनावृष्टिः शलभा मूषकाः शुकाः ।
स्वचक्रं परचक्रं वा सप्तैता ईतयः स्मृताः ॥

सू० ११ ।—अवदीर्यमाणे ग्रामे वावसाने वाग्निशरणे वा सभायां वा गृहे वा प्राकारे वा रक्षार्थं कर्म वक्ष्यामः । सू० १२ ।—पत्तने रक्षार्थान्युच्यन्ते । सू० १३-१६ ।—दृंहणानि । दृतिकर्माणि दृढीकर्माणि वा । समाप्तानि दृढकर्माणि ।... गृहपत्तने ग्रामपत्तने कार्यदृढकरणे अवहरणरक्षार्थं । सू० १७ ।—विवादे जयकर्मणां विधिं व्याख्यास्यामः । ज्येष्ठीमधुमभिमन्त्र्य भक्षयति । ततः सभां प्रविशति अपराजित-

देशात्। परिषज्जयकर्म सभाजयकर्म समाप्तं। सू० १८ ।—विवादे जयकर्माण्युच्यन्ते। पाठामूलं मुखे प्रक्षिप्य तदनन्तरमपराजितादेशादागच्छति। सू० १९ ।—पाठामूलं मुखे प्रक्षिप्यान्वाह। सू० २० ।—पाठामूलं बध्नाति। सू० २१। पाठापुष्पमाला-मभिमंत्र्य शिरसि धारयति। पाठापालाशी सप्तपालाशी सप्तपर्णी मालामभिमन्त्र्य धारयति। सू० २२ ।—वृष्टिनिवारणं भक्षभोजने कर्म उच्यते। भक्तमभिमन्त्र्य भक्तं शाकादि। ततो भुञ्जीत। वृष्टिनिवारणं समाप्तं। सू० २३ ।—ब्रह्मजज्ञानमिति सूक्तेन प्रथमेन काण्डादिना सूक्तेन वेदं वा अनुवाकं वा सूक्तं वा कल्पं वा ब्राह्मणं वा अध्ययनं कर्तुमिच्छति तदा तदा सूक्तं जपित्वा ततोऽध्ययनं कुर्यात्। कलहशमनं समाप्तं। सू० २४ ।—ब्रह्मजज्ञानमिति सूक्तं जपति विवादे जयार्थं। सू० २५ ।—ब्रह्मजज्ञानमिति सूक्तं जपित्वा मीमांसाव्याकरणादिशास्त्रे वादं करोति तदा जपित्वा करोति प्रतिवादिनं जयति। सू० २६ ।—विवादकर्म उच्यते। चाक्रिकस्य रज्जु-मभिमंत्र्य धारयति हस्तेन विवादकर्मकर्तुं वदने कलहो न भवति। सू० २७ ।—सभाजयकर्माण्युच्यन्ते सभास्तम्भनकर्म जयकर्म तदा सभासद धर्माधिकरणादि जायते। क्षीरौदनं भक्षयति। सू० २९ ।—"यद्दाती"ति ऋचं जपित्वा सभां वदेत्। निरीक्षते। अन्वाह। यद्वदति तत्र तत्र तथैव वदति यच्चक्षुषा पश्यति तद्दक्षन् विघातो न भवति।

कण्डिका ॥ ३९ ॥

सू० १।—तिलकमणिं सम्पात्याभिमंत्र्य पुण्याहान्ते बध्नाति। आत्मरक्षार्थं मणिः। सर्वत्र प्रत्यभिचरणार्थोमणिं बध्नाति। सू० ५–१२। ततः शान्त्युदकं करोति महाशान्तिधानं मातलीवर्जं कृत्वा "दूष्या दूषिरसी"ति कृत्वा प्रतिहरणोगणः। ततो वास्तोष्पत्यमातृनाम चातनशान्तिगणे एते पञ्चगणाः। शान्त्युदकेन आवाप्यन्ते। ततो मातलीं कृत्वा शान्त्युदकभाजनेचिन्त्याद्या आदधाति। मंत्रोक्तायां दर्भापामार्ग-सहदेवी आठरूषककाम्पीलशिते वारसदं पुष्पा एता मंत्रोक्ता भाजने एता ओषधयः शान्त्युदकेऽवधाय ततः शान्त्युदकं करोति। तेन शान्त्युदकेन प्रोक्षन् व्रजति। अथ रात्रौ इदं कर्म प्रमाणकं करोति॥ उपानहौ परिधाय उष्णीषं कृत्वा अग्रे भूत्वा कर्त्ता शान्त्युदकेन प्रोक्षति। कृत्यास्थानं यावत्। बालागमपात्रेषु कृत्यादिषुच सर्वेष्विदं कर्म भवति। "अमित्रचक्षुषा" इत्यनेन मंत्रेण कृत्यां निरीक्षते। स च निरीक्षते। "कृतव्यधनि इत्यृचा कृत्यास्थानं अवेक्षते। "कृतव्यधनि"–इत्यृचा कर्त्ता काण्डेन विध्यति आङ्गिरसकल्पविधानधनुषा। अथवा दार्भ्युषेण काण्डेन विध्यति। सू० १५। —मांसानि शकले निधाय कर्त्ता संदंशं गृहीत्वा चर्मणि बद्ध्वा प्रैषकृत् परिक्रम्य बन्धान्मुञ्चति। सू० १८ ।—नवनीतेनाभ्यज्याक्षिणी वा अङ्क्ते। सू०२० ।—

अरण्ये गच्छन्ति । सू० २७ ।—वास्तोष्पत्यादयश्चत्वारोगणा उच्चैः पठन्ति । सू० २८ ।—कर्त्ता अभिचारकृत्पुरुषस्य शान्त्युदकेन मर्माणि संप्रोक्षते । गार्हपत्य-सभाआमपात्रकूपकुक्कुट इत्यादीनि मर्माणि संप्रोक्षति । सू० २९ ।—कृत्यास्थानं कृष्णवृषभहलेन कर्षति ।

कण्डिका ॥ ४० ॥

सू० १ ।—अथ नदीप्रवाहविधिं वक्ष्यामः । नदीप्रवाहं खात्वा प्रसिञ्चन् व्रजति । सू० २ ।—काशमभिमन्त्र्य तत्र खाते रोपयति । दिवि शेवालपर्णिमभिम-न्त्र्य रोपयति नदीप्रवाहे । वेधूकपाटरकं (पटेरकं) अभिमन्त्र्य नदीमार्गे निखनति । वेतसशाखामभिमन्त्र्य नदीप्रवाहने निखनति । सू० ६ ।—उदकं मण्डूकस्योपरि निनयति । सू० ७ ।–पूर्वप्रवाहो न भवति । अथ नवधा प्रवाहे इदं कर्म कुर्यात । वरुणदेवतापाकयज्ञविधानेन आज्यभागान्तं कृत्वा "यददः सम्प्रयती" रिति सूक्तेन त्रिर्विभज्य जुहोति । तत उत्तरतन्त्रम् । कृष्णव्रीहिं कृष्णायाः गोः पयः घृतं च वेतसकाष्ठासु च इन्धनं । वेतसपत्रैः स्तरणं पटेरकेण वा अस्मिन् तन्त्रे सर्वं मारुतं कर्त्तव्यम् । उदकप्रवाहे उदकप्रवाहभये नदीभये ग्रामे नगरे वा । यत्र उदकनदी-भयं भवति तत्र सर्वत्र वारुणो होमः कर्तव्यः । सू० ९ ।—बलिं हरेत् ततः "अति-धन्वानी"ति द्वाभ्यां न भवति । मन्त्रोदकं नदीप्रवाहे प्रसिञ्चन् व्रजति । समाप्तं नदी दूरगमनकर्म । सू० १० ।—यदि न वहति नदी तदा वक्ष्यमाण इदं कर्म । यददः संप्रयतीरिति नदीं हन्ति । वेतसशाखामभिमन्त्र्य नदीमवसिञ्चति । यदि दूरं गता पुनः निवर्तते तदा इदं कर्म एके आचार्य्याः । "यददः सम्प्रयती"रित्यादि सर्वमेकं कर्म मन्यन्ते । अन्ये भिन्नानि कर्माणि मन्यन्ते । अन्ये प्रसिञ्चन् कर्म हिर-ण्यमण्डूककर्म योगकर्म मन्थनकर्म पाणिकर्म एतेषां विकल्पं मन्यन्ते । समुच्चयो वा इति दारिलमतं समुच्चयः । समाप्तं अन्यप्रवाहे नदीकर्म ॥ सू० ११।१२ ॥ अथ अरणिसमारोपणकर्म । अरणीद्वयं प्रतापयति पाणी वाप्रता पयति । उत्थाय वा गृह्णाति । ततोऽनेन विधानेन पथि गच्छता दोषो न भवति । सू० १३ ॥ अथावरोहणमुच्यते ॥ सू० १४।१५ । पुरुषस्य वीर्यकरणे विधिं वक्ष्यामः । कपिकच्छुमूलमोषधिवत् खात्वा···सुरवालकमोषधिवत् खात्वा दुग्धे श्रपयित्वा उप-विष्टं धनुरुत्सङ्गे कृत्वा । दुग्धमभिमंत्र्य पाययति । सू० १६ । मयूखे मुसले वासीनो यांत्वे"त्यृचा सुरवालकं दुग्धे क्वाथयति पीत्वा कीलके उपविश्य पिबति । कपिक-च्छुं मुसले उपविश्य पिबति । सूकरवालकं मुसले उपविश्य पिबति न शिश्नस्य स्थूलकरणमुच्यते । "यथासित"—इति सूक्तेन एकशाखार्कमणिं सम्पात्याभिमन्त्र्य अर्कसूत्रेण बध्नाति । सू० १७।१८ । "यावदङ्गीन" मित्यृचा कृष्णमृगचर्ममणिं

बध्नाति ॥ "आ वृषायस्वे"ति सूक्तेन हरिणस्कन्धचर्ममणिं कृत्वा कृष्णबालेन बध्नाति ॥ वीर्यकरणं उत्थापनं स्थूलकरणं च भवति रेतोनाशे च ॥

कण्डिका ॥ ४१ ॥

सू० १ । अथ वृष्टिकर्मविधिं वक्ष्यामः ॥ सू० २।३ । त्रयोदशेऽहनि पाकयाज्ञिकं तन्त्रं व्रतोपायनान्तं कृत्वा ततो "देवस्यत्वा सवितु"रित्यादि मरुद्भ्यो जुष्टं निर्वपामि। "मरुद्भ्यस्त्वा जुष्टं प्रोक्षामी"ति अनेन यजुषा तावत् समानं यावदाज्यभागौ ततः क्षीरौदनं जुहोति ॥ "समुत्पतन्त्विति"सूक्तेन पञ्चभिर्ऋग्भिरेकामाहुतिं ततः पञ्चभिर्ऋग्भिर्द्वितीयां षड्भिर्ऋग्भिस्तृतीयामाहुतिं जुहोति । ततः पार्वणाद्युत्तरतन्त्रं। पाकयाज्ञिकं तन्त्रमाज्यभागान्तं कृत्वा ततः "प्रभस्वेति" क्षीरौदनं एकामा हुतिं जुहोति । "न घ्रंस्तताप"इत्यृचा द्वितीयामाहुतिं । युक्ताभ्यां तृतीयामाहुतिं । पार्वणाद्युत्तरतंत्रं बर्हिर्होमे "मरुतो गच्छतु हविः स्वाहे"ति । सर्वेषु वृष्टिकर्मसु कृष्णाया गोराज्यं कृष्णायाः गोः पयः कृष्णाव्रीहिशालयः वेतसः स्रुवः वैतसी समिदिन्धनं च । सू० । ३ । ४ ।—काशदिविधुवकवेतसामेकत्र कृत्वा''' तत उदकमध्ये पात्रं अधोमुखं निनयति । उदके विप्लावयति । सू० ६ । कुक्कुरशिरमभिमंत्र्य उदके विप्लावयति । मेषशिरमभिमंत्र्य उदके प्रक्षिपति मानुषकेशजरद् उपानहौ वंशाग्रे प्रबध्य योधयेति जपन् । सू० ८ । अर्थोत्थापने विघ्नशमनविधि वक्ष्यामः ॥ अर्थकामोद्यमं यदा करोति तदा इदं करोति ।'''द्रव्य हस्त्यश्वरत्न हिरण्यधनधान्यादि एवं कामो यदोद्यमं वणिजादि करोति तदा इदं कर्म करोति ॥ यस्मिन्नारम्भा गृहादि न सिध्यन्ति तदा इदं कर्म ॥ सू० १० ।—अथ द्यूतजयकर्म उच्यते ॥ सू० ११। उत्तराषाढ नक्षत्रे संमिनोति पूरयति । सू० १३। त्रयोदश्यादयस्तिस्रो दधिमधुनि वासयित्वा'''अक्षान् वा कपर्दकान् वा द्यूतक्रीडां कुर्यात् । सू० १४ ।—अथार्थोत्थापनोद्यमकरविघ्नशमनकर्म उच्यते मरुतो यजते पाकयज्ञविधानेन यथा वरुणं मारुतं क्षीरौदनं मारुतश्रितमित्यादि भवति ॥ एवमाद्या ओषधीः संपात्य अभिन्युब्जनं । विप्लावयति । श्वशिर एडकशिरः केशजरदुपानहौ युद्धउदपात्रकर्म एतानि अभिवर्षणानि कर्माणि भवन्ति एकैकस्यसूक्तस्य । एके आचार्यामारुतस्थाने मन्त्रोक्त देवतायागं कुर्यात् यथा वरुणं । अथोषधि होमसमानं वर्षकर्मणां । उदकघटं सम्पात्याभिमंत्र्य तत आप्लावयति । अवसिञ्चति । विघ्नशमनकामः । समासानि अभिवर्षणावसेचनानि कर्माणि । सू० १५ ।— वैश्वानरो रश्मि"रिति सूक्तेन "उदेहि वाजिन्निति विंशत्या ऋग्भिश्च उद्यन्तमादित्यं स्नानं कृत्वोपतिष्ठते अर्थमुत्थापनकामः । सू० १७ ।—वस्त्रं ददाति । विद्रावणादिविषये शमनकामः । समासानि विघ्नशमनकर्माणि । सू० १८ ।—अथ गोवत्सद्वेषो विरोधसांमनस्यमुच्यते।

सू० १९।—ततो वत्सं त्रिः परिभ्रामयित्वा पानार्थं मुञ्चति । सू० २० ।—गवां वत्सेन सह विरोधि वत्सगोविरोधिसांमनस्यकर्म समाप्तं । गोवत्सस्य विरोधि सौमनस्यं । अकरणे गोः पूर्वां विनश्यति । अथ गोवत्सः । तदा राजा प्रजाः । सू० २१ ।—अश्वशान्तिविधिं वक्ष्यामः । अश्वाः शान्तास्तेजस्विनो निरुपद्रवा वेगवन्त आरोग्या भवन्ति ।

कण्डिका ॥ ४२ ॥

सू० १ ।—अथ प्रवासनद्रव्योत्थापनमुच्यते । प्रवासे गत्वा चौरभयं उदकभयं गमनविघ्नं न भवति । हविषामुपधानं कुर्यात् । सू० ३ ।—यदि यानेन याति तदा इदं कर्म । सू० ४ ।—वाणिजद्रव्यं वस्त्राश्वादिसर्वद्रव्यं···विक्रयार्थं नयति। यदा द्रव्यं गृह्णाति तदा इदं कर्म । सू० ६ ।—अथाभ्यागतपुरुषाणां सांमनस्यं क्रियते । यदा विशिष्टो गृहे आगच्छति तदा इदं मैत्रीकर्म क्रियते । मित्रं-त्वेषां दर्शनं आगतानां । यदा गृहे आगच्छति तदा इदं कुर्यात् । सू० ७ ।—हस्त्यादियानं सम्पात्याभिमंत्र्य तस्मिन्याने यस्य सांमनस्यं क्रियते···उपरि उपविशंति । सर्वे यानस्योपरि चटन्ति ततः पश्चिमदिशि गत्वा पुनर्गृहे आगच्छन्ति । ततः ओदनमभिमंत्र्य सह भुञ्जन्ति मन्थं वा । समाप्तं सांमनस्यं । एकस्मिन् युद्धे क्रियमाणे सहागतस्य कर्म इदं कर्म अन्यस्य च साधारणमित्यर्थः । यो युद्धे साहाय्यत्वं करोति तस्येदं कर्म । प्रथमं पादौ प्रक्षाल्य ततः कर्म चेति । क्षत्रिययोरिदं कर्म मन्यन्ते केचित् । सू० ८ ।—अथ गृहे विरुद्धे सति सांमनस्यमुच्यते । कर्त्ताऽरण्ये गत्वा समिधो गृहीत्वा तूष्णीं गृहमागत्य···गृहमनुष्याणां सांमनस्यं भवति कलहनिवारणं । सू० ९ ।—अथ मंत्रब्राह्मणयोर्द्रव्यमिच्छति तस्येदं कर्म प्रतिगृह्यादि उच्यते । वेदपाठेन शास्त्रपाठेन अर्थोत्थापनमिच्छन्निदं करोति । समाप्तं वेदेन अर्थोत्थापने विघ्नशमनं । सू० १२–१७ अथ परिमोक्षविधि वक्ष्यामः । गोदानिकतन्त्रमाज्यभागान्तं कृत्वा ततः शान्त्युदकं कृत्वाभिमंत्रयते । "अपोदिव्या" इति चतसृभिः । ततोऽभ्यातानादि परिदानान्तं कृत्वा । केचित् परिदानान्ते ततोऽभ्यातानं हुत्वा तत इदावत्सरायेति कल्पजैश्चतसृभिर्ऋग्भिराज्यं जुहुयात् । समिध आदधाति । वेदव्रतं कल्पव्रतं मृगारव्रतं विषासहिव्रतं यमव्रतं शिरोव्रतं अङ्गिरोव्रतं इत्येवमादिषु "इदावत्सराये"ति व्रतविसर्जनं व्रतश्रावणं च करोति । यत्र क्वचित् व्रतं वैदिकं लौकिकं च तत्र सर्वत्र व्रतादानं व्रतविसर्जनं च भवति विधानेन। शिरोव्रतादीनि नित्यानि—कृच्छ्रचान्द्रायणादीनि काम्यानि स्मृतिपुराणशास्त्रवेदविहितानि । तानि सर्वाणीत्येतेन विधानेन कर्त्तव्यानि । सू० १८—परिमोक्षानन्तरं त्रिरात्रं स्नानव्रतं चरेत् । सू० १९ ।—अथ पापलक्षणाख्यी तस्याः

शान्तिरुच्यते। स्त्रीमुखं प्रत्यृचं प्रक्षालयति तस्या मुखं हस्तयोर्मशकशिग्रुकशिरकौ अस्थानतिलकं ह्रस्वकेशादि पापलक्षणं सामुद्रिके स्त्रीलक्षणं व्याख्यातं। स्त्रियं पापलक्षणामभिषिञ्चति दक्षिणात् केशादारभ्य यावदुत्तरपार्श्वं ततः पापलक्षणं विनश्यति सू० २२।— अथ पापदर्शने शान्तिरुच्यते। दर्शनदोषो न भवति। पुरुषस्य भाग्यकाले हरिणो यान्ति प्रदक्षिणाः अप्रदक्षिणेषु हरिणेषु अयं जपः पक्षिषु च। श्वानरुदिते काकरुदिते काकमैथुनेषु पुरुषस्य मैथुनेषु श्येनमैथुनदर्शने नग्नस्त्रीदर्शने नग्नपुरुषस्य नपुंसकस्य दर्शने। यत्र क्वचिदपशकुनाः पतिताः तत्र सर्वत्र अयं जपः। श्रुतौ स्मृतौ पठिता अद्रष्टव्यास्तेषां सर्वेषां दर्शने अद्भुतानां दर्शनेष्वयं जपः कर्त्तव्यः। लोके यद्विरुद्धं अन्वीक्ष्य'''अयं जपः। अपशकुनजपः समाप्तः। सू० २३– अथ पुरुषह्वे अकार्यकरणेन विघ्नशमनकर्म उच्यते।

कण्डिका॥ ४३॥

सू० १।— पुनर्विघ्नशमनमुच्यते। पिशङ्गवर्णसूत्रे बद्ध्वा'''अरलुमणिं सम्पात्याभिमन्त्र्य बध्नाति'''विस्कन्ध विघ्नशमनोमणिः। स्पर्धमानस्य स्पर्धा विनश्यतीत्यर्थः। वेणुदण्डादीन् सम्पात्य ततः सूक्तेन विमृज्य धारयति।'''चित्रदण्डे ध्वजदण्डे चिन्हदण्डे। लकुटादिदण्डं सर्वं सम्पात्य'''धारयति तस्य सर्पश्‍ङ्गि दंष्ट्रादि विघ्नं न भवति। आयुधं सम्पात्याभिमन्त्र्य विमृज्य सूक्तेन धारयति। सर्वशस्त्रसम्पातिते मायादिकं मायाजालयुद्धे निवारणं संग्रामे इन्द्रजालनिवारणं युद्धे विघ्नं न भवति शत्रुहवं निवारयति। शत्रवो गच्छन्ति। स्पर्धिमानं शत्रुं जयति हवं विनाशयत्ति। सू० २।—विघ्नं गृहीतं पुरुषं धूपयति। यस्यारम्भा न सिध्यन्ति। सू० ३।—अथ भूमिशुद्धिं गृहं करिष्यमाणस्तस्येदं करोति। अथवा नवे गृहे श्येनयागः कर्तव्यः विकल्प इति भाष्यकारः। प्रथमतो वा श्येनयागो नवे वा गृहे। सू० ४।—अथ गृहप्रवेश उच्यते। वास्तुसंस्कार उच्यते। सू० ५।—ततः शान्त्युदकं करोति। मातलीं पूर्वं कृत्वा वास्तोष्पत्यादीनिचतुर्गुणीं महाशान्ति शान्त्युदके आवपते। ततो मातलीं कृत्वा ततः शान्त्युदकं समाप्यते। तेन भूमिं प्रोक्षयेत्। सू० ७।— अन्येषु स्थूणा गर्तेषु पार्श्वस्थितेषु प्रक्षिपति। सू० ८।— नीयमानां शालामनुमन्त्रयते। सू० ११।-इडां कारयति शालाभूमिं। सू० १३।– द्वाभ्यां चरुं जुहोति। केचिदस्मिन्तन्त्रे यजूंषि यज्ञ इति। सू० १५।—वृद्धस्त्रियोगीतमङ्गल्यादि कुर्वन्ति ब्राह्मणाः पुण्याहानि पठन्ति श्राद्धं च केचित्पश्चात्कुर्वन्ति। यत्र गृहं मण्डपं वा कुटीं वा चित्रशालां वा मठस्थानं वा देवगृहं वा अन्यं वा तृणमयं वा काष्ठमयं वा इष्टकामयं वा पाषाणमयं वा गृहादिकं करोति तत्रानेन विधानेन वास्तुयागः कर्तव्यः। सू० १६।-अथ क्रव्यादोपहतगृहे क्षेत्रे वान्यत्र गोष्ठे

वा यत्र क्वचित्तत्र शान्तिरुच्यते । क्रव्यादा प्रविष्टे गृहे कुमारा म्रियन्ते वत्सान् वा किशोरान् वा धननाशो यत्र भवति तद्गृहं ग्रामं नगरं वा क्रव्यादोपहतं जानीयात् । सू० १८ ।—पालाशसमिध आदधाति । सू० १९ ।—कुमारवत्सगोमरणादि धन-धान्यविनाशादि चिन्तितोद्वेगादि क्रव्यादचिन्हानि । क्रव्यादोपहतशान्तिः समाप्ता । सू० २० ।—अथ क्रव्याच्छमनविधानमुच्यते । लौकिके वाग्नौ गृहे वावसथ्ये वा शान्तिकपौष्टिकार्थं मन्थने वा यत्र वा क्रव्यादोपहतिर्दृश्यते तत्र सर्वत्र कुर्यात् । सू० २१ । अथ वशाशमनविधानमुच्यते "ये अग्नय"इति दशर्चेन सूक्तेन वशा-मभिमन्त्र्य ततो ब्राह्मणाय ददाति । यस्य गृहे वशा भवति जायते तद्गृहं दैवहतं विजानीयात् ।

कण्डिका ॥ ४४ ॥

सू० १ ।— वशाशमनविधानमुच्यते । सू० ३ ।—शान्त्युदकं करोति अन्वा-रब्धायै वशायै काष्ठेन तृणेन वा । सू० ५ ।—मातल्यन्तेन शान्त्युदकेनाचामयति च संप्रोक्षति च । सू० ६ ।—वशां कर्ता ऊर्ध्वस्थितः वास्तोष्पत्यादि चतुर्गणीं महाशान्तिं उच्चैस्तृतीयसवने जपति वशाभिमुखः स्थितः । सू० १४ ।— समस्येति मन्त्रेण भूमौ कृत्वा तत उपरि वशां पातयति । सू० १५ ।—निरुच्छ्वासं करोति मार-यतीति । सू० १७ ।—यद्वशेत्यृचा कल्पजया आज्यं जुहोति । सू० १९ ।—इति कर्त्ता ब्रूयात् । सू० २८ ।—शेषमुदकं पार्श्वदेशे निक्षिप्य ततोऽभ्यन्तरे प्रविश्य । सू० ३६ ।—छेदनस्थानमभिधार्यं ।

कण्डिका ॥ ४५ ॥

सू० ३ ।—अवदानानि पशोरेकादश गृह्णाति । सू० ४ ।—ततः स्विष्टकृद-वदानानि गृह्णाति तानि त्रीणि दक्षिणो बाहुः वामजंघा च अन्त्रविभागं । एतानि त्रीणि भागानि । सू० ६ ।—ततो यद्दैवत्यः पशुस्तद्दैवत्यश्चरुः श्रपयितव्यः । सू० १२ ।—वपाश्रपण्यौ द्वे सह जुहोति । सू०१३ ।—अथ पित्र्येषु काम्येषु विशेषः । सू० १६ । —सम्राडिति मन्त्रेणाज्यं जुहोति सर्ववीरायेत्यादि चतस्र आहुतीर्जुहोति । समाप्तं वशाशमनविधानं । दैवहतं तस्य गृहं यस्य गृहे वशा-जायते तस्य धनादिनाशो भवति तस्माच्छान्तिः कर्तव्या । सू० १७ ।—अथ दुष्टे प्रतिग्रहे सौम्ये वा कृते याजने वा दक्षिणाप्रतिग्रहणे येन कर्मणा पापं विन-श्यति तदुच्यते । प्रतिग्रहं प्रतिगृह्णाति प्रतिग्रहदोषो न भवति । सू० १८ ।— सर्वाणि कर्माणि कृत्वा "पुनर्मैत्विन्द्रिय"मित्यृचा कर्म समाप्य तत आत्मानमनु-मन्त्रयते । सर्वकर्मसु भवति । इत्यात्मशान्तिः । सन्ध्यावन्दने आज्यतन्त्रे

अस्मिन् कर्मणि नित्यनैमित्तिककाम्येषु "पुनर्मैत्विन्द्रियमि"त्यृचा आत्महृदयमनुमन्त्रयते । सू० १९ ।—एतेन विधानेन पशवो व्याख्याताः । नित्यनैमित्तिककाम्याः । पैठीनसिना काम्याः पठिताः ।

कण्डिका ॥ ४६ ॥

सू० १ ।—अथ अकृते पापे लोके पापवचनमुत्पद्यते तत्र शान्तिरुच्यते । सक्तुमन्थं···भक्तमभिमन्त्र्य ददाति प्रथममग्रे कृत्वा अभ्याख्यातं गृहे प्रवेश्य कर्ता पश्चात्प्रविशति । सू० २ ।—द्रुघणमणिं सम्पात्याभिमन्त्र्य बध्नाति । सू० ३ ।—पलाशकाष्ठमणिं द्रुघणप्रतिरूपं कृत्वा अभिशस्ते बध्नाति । कृष्णलोहमणिं... ताम्रमयद्रुघणप्रतिरूपमणिं हिरण्यमणिं द्रुघणप्रतिरूपं बध्नाति । सर्वत्रकौशिके कर्मणां विकल्पः । एकस्मिन्विषये यत्र बहूनि कर्माणि पठितानि तत्रैकं कुर्यात् सर्वाणि वा तन्त्रविकल्पः । सू० ४ । —अथ यागे क्रियमाणे येन कर्मणा विघ्नशमनं भवति तदुच्यते । ऋत्विजो यजमानश्चाशयन्ति अविघ्नेन यज्ञसिद्धिर्भवति । सू० ५ ।—यागसमाप्तौ विघ्नशमनमुच्यते । सोमदेवत्यं चरुं जुहोति । सू० ६ ।—अथ धनधान्यादि प्रतिग्रहादियाचनामिच्छन्निदं कृत्वा याचितविघातो न भवति । याचितं न प्रतिषेधयति । सारूपवत्सं पायसं सम्पात्याभिमन्त्र्याश्नाति । सू० ७ ।—अथ कपोते उलूके वा गृहं प्रविष्टे अन्यत्राभीष्टदेशेऽपि तत्र शान्तिरुच्यते । शान्त्युदके आवपते ततो मातलिं कृत्वा शान्त्युदकं समाप्यते रात्रौ तेन शान्त्युदकेन तत्स्थानं प्रोक्षति "यतार्य" इत्येतैर्मन्त्रैः कपोतोलूकस्थानं यावत् । सू० ८ ।—त्रिः शालां परिणयति कपोतस्थानं वा परिभ्रामयेत् । आरण्यके पक्षिणि प्रविष्टे इदं कर्म कुर्यात् । कपोतोलूके वा प्रविष्टे द्विपदचतुष्पदविनाशो वेदे श्रूयते तस्य दोषशमनम् ॥ सू० ९ ।—

अथ स्वप्नाध्याये पठिते उग्रे स्वप्नदर्शने शान्तिरुच्यते । स्वप्नाध्यायपठितदुःस्वप्नं च रुद्रभाष्यकारमतेन गृहीतव्यं । पक्वमांसे प्रेतदर्शने परिष्वङ्गमर्कटे दृष्ट्वा तैलाभ्यङ्गे नग्नपुरुषदर्शने नग्नस्त्रीदर्शने कालसूत्रे इत्यादि स्वप्नाध्यायपठिता अनेकशः । इति दुःस्वप्नदर्शने शान्तिरुच्यते । स्वप्नं कुत्सितं दृष्ट्वा मुखं प्रक्षालयति ॥ सू० १३ ।—अथ पुनर्घोरदुःस्वप्ननाशनकर्म उच्यते । "विद्मा ते" स्वप्ने इत्येकेन पर्यायेण दुःस्वप्नं दृष्ट्वा मुखं विमार्ष्टि ।·· पार्श्वेन द्वितीयेन भूयते । अन्नं स्वप्ने दृष्ट्वा निरीक्षते । मैश्रधान्यं पुरोडाशं जुहोति । सू० १४ ।—अथ आचार्ये मृते ब्रह्मचारी इदं करोति । श्रेयस्कामः आचार्यदहने । अग्नेर्भूम्यामित्यादि पञ्च सामिधेनी हुत्वा ततो दहनं त्रिर्भ्रामयित्वा तत "नहि ते अग्ने तन्व" इति सूक्तान्ते पुरोडाशं जुहोति तस्मिन्दहने ॥ सू० १६ ।—कौशिकसूत्रे शयनं न मन्यते च प्रेतादिभयात् तद्विघातशमनं । सू० २७ ।—"अपो दिव्या" इति चतसृभिर्ऋग्भिः स्नानं कृत्वा

त्रिरात्रं गृहे आगत्य ततः शयीत इति कौशिकमतं । मृते आचार्ये इदं कर्म प्रायश्चित्तं कृत्वा ततः समावर्त्तनं कुर्यादित्यर्थः । अन्यं गुरुमुपासीत । सू० १९ । अथ ब्रह्मचारी स्त्रिया मैथुनसंयोगे इदं करोति । स अवकीर्णीत्युच्यते । तस्य प्रायश्चित्तमिदमुच्यते । ब्रह्मचारिणं दर्भरज्ज्वा कण्ठे बद्ध्वा । सू० २२ ।—अथ स्वयं प्रज्ज्वालिते अग्नौ प्रायश्चित्तमुच्यते । सू० २३ ।—अथ अग्निशब्दकरणे शान्तिरुच्यते । अग्निमुपतिष्ठते ॥ २४ ॥ अथ संदेशे विस्मृते" अग्निमुपतिष्ठते । यदि ग्रामे वा गृहे वा संदेशं न कथयति तदा इदं प्रायश्चित्तं ॥ सू० २५—अथ पापनक्षत्रे जाते स्त्री वा पुरुषो वा यो जातस्तस्य शान्तिरुच्यते । तस्य मुञ्जरज्ज्वा कण्ठे पादे बद्ध्वा ततः "प्रलोही"ति–सूक्तेन उदकघटं सम्पात्याभिमंत्र्य दर्भपिञ्जुलीर्घटे प्रक्षिप्य ततोऽभिषिञ्चति ।'''ग्रीवा पाशं नदीफेनेषु निदधाति । नदीनां फेनानित्यर्धर्चेन कटिपाशं उदकमध्ये प्रक्षिपति । मातृपितृभ्रातृषु दोषः श्रवणात् । तस्मात् पापनक्षत्रेण शान्तिः कर्तव्या । मूलनक्षत्रे इदं कर्म क्रियते । यो नक्षत्रकल्पोक्तं कर्म कुर्यात् । तदुच्यते । "प्रलो ही"ति सूक्तेन क्षीरौदनं सम्पात्याभिमंत्र्याश्नाति । एतस्मिन् तंत्रे समूलं बर्हिस्तृणाति समूलेध्मानुपसमाधाय एष विशेषः । नक्षत्रकल्पोक्तं । एषा नक्षत्रकल्पोक्ता शान्तिः । आप्लवनावसेचने च क्षीरौदनं च प्राशनं एतानि त्रीणि । अथवा "प्रलो ही"ति सूक्तेन उदकमभिमंत्र्य पापनक्षत्रजातमवसिञ्चति शिरसि एतानि त्रीणि कर्माणि भवन्ति ॥सू०२६।—अथ ज्येष्ठे भ्रातरि जीवति विवाह आधान दीक्षां च करोति तस्य शान्तिरुच्यते॥ सू० २८।—उत्तरपाशं नदीनां फेनानित्यर्धर्चेन नदीफेने निदधाति ॥ अधरपाशं नदीमध्ये प्रक्षिपति । ततो बन्धनं कृत्वा ततोऽवसिचति ॥ सू०२९।—अपां सूक्तैर्घटं सम्पात्याभिमंत्र्य तत आप्लावयति। अवसिंचति । परिवित्ति परिवेत्तृ प्रायश्चित्तं । सू० ३०—अथ मृते आचार्ये इदं कर्म । सू० ३३—अथ देवपितृवर्जितखदाशयनिहितस्य अन्नस्य याज्ञाकेन येन कर्मणा भवति तदुच्यते । अनुवाकेन खदाशयादन्नादुद्धृत्य सेतिकामेकां जुहोति। सू० ३४—प्रायश्चित्तम् । सू० ३५—खदाशयान्नसंस्कारशान्तिः समाप्ता। सू० ३६—अथ मृते धनिके ऋणकस्य ऋणदानशान्तिरुच्यते । अपमित्यमप्रतीत्तमिति त्रिभिः सूक्तैर्द्रव्यमभिमंत्र्य पुत्राय ददाति । अनृणो भवति । सू० ४१—आकाशोदकेन शरीराप्लवने दोषो भवति तस्य शान्तिरुच्यते॥ सू० ४२ ।—"दिवो नु मां बृहत" इति सूक्तेन एकतैलं सर्वौषधिगन्धं हिरण्यं वा एतान्यभिमंत्र्य शरीरमुद्वर्तयेत् ॥ आकाशबिन्दुदोषोपशान्तिः समाप्ता । सू० ४३ ।—अथ कुमारस्य कुमार्यां वा यस्योत्तमदन्तौ पूर्वौ जातौ तस्य मातापित्रोर्मरणशङ्का भवति तत्र शान्तिरुच्यते । सू० ४४ ।—व्रीहियवतिलमाषानेकीकृत्याभिमन्त्र्य उत्तमजातदन्ताभ्यां दंशयति । सू० ४७ ।—अथ शिरसि अङ्के वा काकोपविष्टे दोषः श्रूयते तस्य शान्तिरुच्यते । ४८।—

उल्मुकमभिमन्त्र्य काकमुखेन अपमृष्टं पुरुषं पर्यग्निकरोति। उपरि भ्रामयित्वा दूरे निक्षिपति। ४९।—अथ संसर्गदोषशान्तिरुच्यते। सर्वेषु रोगेषु शावदन्तादि कुनखिनावण्डेन ज्वरेणापामार्गादिरोगेषु संसर्गेषु सर्वदोषान्मुच्यते। सू० ५०।— अनृतमुक्त्वाचमनं करोति। वणिजि अनृतं कृत्वा दोषो न भवति। सू० ५१।— यत्र क्वचित् खनति तत्र सर्वत्र "यत्ते भूम" इति। खननदोषो न भवति। सू० ५३।— अथ शकुनशान्तिरुच्यते। अपशब्दं श्रुत्वा कपिञ्जलवाशितं श्रुत्वा ग्रामे अरण्ये पक्षिवाशितं श्रुत्वा वा स्वयं वा क्रुद्धभाषणं कृत्वा अन्यस्य वचनं श्रुत्वा—उलूकवाशने कपोतवाशने पूर्वतो वा उत्तरतो वा लोके निन्दितः। यत्किंचिल्लोके विरुद्धं दृष्ट्वा श्रुत्वा सर्वत्र जपने स्वस्त्ययनं भवति। सू० ५५—आकाशे यदि स्वपिति अरण्ये वा शून्ये गृहे वा पर्वते वा तदा तदा "यो अभ्य बभ्रूण" इत्यृचं जपित्वा स्वपिति। समाप्तानि नैमित्तिकानि सर्वज्ञानप्रबोधनार्थं...दुष्टदोषविनाशनैमित्तिकानि। नैमित्तिकान्यवश्यं कर्तव्यानि। अकरणे धनधान्यपश्वादिविनाशः। "जरायुज" इति दुर्दिनमायन्नित्यादीनि। अथाद्भुतानि वर्षे यक्ष्मेष्वादिनैमित्तिकानि तानि अवश्यं कार्याणि।

इति पञ्चमोध्यायः ॥ ५ ॥

कण्डिका ॥ ४७ ॥

क्रमप्राप्तो अथर्ववेदविहितोऽभिचार उच्यते। मीमांसायामभिचारो निषिद्धः। मनुस्मृतौ च विहितोऽभिचारः। सू० २।—आङ्गिरसकल्पोक्ताः संभाराः प्रत्येतव्याः। दक्षिणस्यां दिशि मण्डपं, कारयेत्तत्र यथोक्तविधिना गुरुः। पताकातोरणैर्युक्तं द्वारं...स्मृतम्। सू० ९। तथा तदग्र इत्यादि स्मर्त्तव्यं सर्वत्र। अभ्यातानान्ते "दूष्या दूषिरसी"ति सूक्तेन तिलकमणिं सम्पात्याभिमन्त्र्य बध्नाति कारयिता कर्त्ता सदस्यश्च...आत्मरक्षार्थम्। सू० १२—अधुना दीक्षा उच्यते शुक्लपक्षे त्रयोदश्यां पूर्वाण्हे अभ्यातानान्तं कृत्वा "द्यावापृथिवी उर्वन्तरिक्षमि"ति सूक्तं कर्त्ता "कनक रजतेति" सूक्तं द्वाभ्यां सूक्ताभ्यां वेणुदण्डं छिनत्ति। सू० १४–१६। "य इमां देवो मेखला"मिति पञ्चर्चेति सूक्तेन। मेखलां सम्पात्य। "अयं वज्र इति" सूक्तेन दण्डं सम्पात्य। "य इमा"मित्यृचेन मेखलां बध्नाति। "वज्रो"सीति तृचेन सूक्तेन दण्डं गृह्णाति। "नमो नमस्कृद्भ्य" इति सप्तर्षिभ्य उपस्थानं करोति शालाया बहिः। ततः शालां प्रविश्य व्रतादानीयाः समिध आदधाति शान्ताः। व्रतश्रावणं तस्मिन् करोति। अभ्यातानामुत्तरतन्त्रम्। दीक्षितस्त्रिरात्रमनशनं। त्रिरात्रे निवृत्ते कृष्णपक्षे प्रतिपदि कर्म भविष्यति। सू० १७।—आङ्गिरसदण्ड वृश्चन सूक्तं प्रतिपादन उक्तं गृहीत्वा मेखलाया ग्रन्थिमालिम्पति "आहुतास्यभिहुता" इत्यृचा। सू०

१८-२० ।—"अयं वज्र"-इति तिसृभिर्ऋग्भिः "यदश्नामि यद्गिरामि-"इति द्वाभ्यां ऋग्भ्यां भोजनं करोति "यत्पिबामी" त्यृचा उदकं पिबति । अमुष्यस्थाने शत्रुनाम ग्रहणं—। सू० २१ ।—फड्ढतो महुमद इत्येतेन मन्त्रेण भोजनपात्रं भिनत्ति । सू० २२ ।—"इदमहं महुमदस्य तुरुष्कस्य मूतिकर्णपुत्रस्य प्राणापानावपयच्छा"मीत्यनेन मन्त्रेण मेखलां ग्रन्थ्या बध्नाति गाढं करोति । सू० २५-२७ ।—"द्यावापृथिवी उर्विति" सूक्तेन पशुंवृक्षपत्रं च गृहीत्वा शत्रोर्दक्षिणा धावतः पदं ऋजुं छिनत्ति । तिरश्चीनत्रिकोणे एकैकं एवमष्टावरान् सूक्तावृत्तिः । सू० २८ ।—तस्माच्छेदात्पांसुं च गृहीत्वा वधपत्रे बद्ध्वा···भ्रष्ट्रे न्यस्यति । सू० ३० ।—अथवा एतत्···अभिचारतन्त्रमुच्यते । पश्चादग्नेः करिष्यां कृद्युपस्तीर्णायां । सू० ३१ ।—उदकं हस्ते कृत्वा दक्षिणामुखः प्रक्षिपति । सू० ३२-३३ ।—इदं च उष्णोदकमध्ये अक्षितसक्तून् प्रक्षिप्य पिबेत् अनालोडितानेकोच्छ्वासेन । सू० ३४-३६ ।—"त्रीस्त्रीन्मुष्टी"स्त्रिरात्रं द्वौ द्वौ त्रिरात्रमेकैकं षड्रात्रे भुंक्ते "आहुतास्यभिहुते"त्येवमादि स्मर्त्तव्यं । सू० ३७ ।—ब्राह्मणान्परिचारकांश्च भोजयित्वा पात्रस्थितमुच्छिष्टमेकधा कृत्वा बहुमत्स्ये गर्त्ते प्रक्षिपेत् । सू० ३८ ।—यदि ते धावन्तो दृश्यन्ते ततो द्वेष्यो मृतो जानीयात् । सू० ३९-४२ ।—"द्यावा पृथिवी"इति सूक्तेन लोहितशिरसं शशकमाशयित्वा । प्रेतवत् कृत्वा अभिमन्त्र्य दहति ततः "अग्ने यत्ते तप"इति पञ्चभिः सूक्तैरुपतिष्ठते । अन्यः कर्त्ता अभ्यातानान्तं कृत्वा कृकलासमष्टधा कृत्वा प्रत्यृचं जुहोति । सू० ४४ ।—निवृत्य वेद्यामुपवेश्य···स्वेदाक्ताः शरभृष्टीः प्रत्यृचं जुहोति । सू० ४५ ।—शत्रुपदात्पांसुं गृहीत्वा पश्चादग्नेर्निधाय उदग् व्रजत्यास्वेदजननात् । निवृत्य स्वेदालङ्कृतान्पांसून्···जुहोति । सू० ४६-५२ ।—कृकलासशरीरे शर्करानवधाय विषमवधाय···बध्नाति "पाशेस" इति पादेन । "आमु"मित्यादत्ते । मर्मणि खादिरेण स्रुवेण गर्त्तं खनति "अतीव य"इति तत्र निदधाति । सू०५३ ।—संचित्य मृत्तिकोपरि निदधाति "द्यावापृथिवी"इति सूक्तेन जुहोति । सू० ५४ ।—"द्यावापृथिवी" इति सूक्तेन आवलेखनीं हृदये विध्यति······सू० ५७ ।—शत्रुमारणकामः ।

कण्डिका ॥ ४८ ॥

सू० १ ।—अश्वत्थ···कृकलास···एरण्ड···श्लेष्मान्तक···खदिर···शरसमिध आदधाति । सू० ३ ।—स्रुवाग्रे दण्डं बध्नाति । सू० ४ ।—शत्रुमर्मणि निखनति···सू० ५ ।—तौ अश्वत्थशाखायां प्रणुदति । सू० ६ ।—यावन्तः सपत्नास्तावन्तः पाशान्···उदके प्लावयति । सू० ७ ।—शत्रुकोशं तमन्वाह मरणं भवति । सू० ८ ।—उपसमाधानं । ···स्रुवग्रहणं । ···जुहोति···सू० ९ ।—कृकलासकर्म

शरभृष्टिकर्म सपत्नक्षयणीयकर्माणि षट्ग्राममेत्य च कर्माणि षट्मणिकर्म पाशकर्माणि त्रीणि विकङ्कतस्रुवकर्म एकोनविंशति तन्त्राणि भवन्ति। सू० १०।--सर्पच्छत्रं चूर्णयति। सू० ११।—गोहरणेऽभिचारः। सू० १२।—चौरानन्वाह। सू० १३-२२।--"नैतां ते"ति सूक्ताभ्यां श्रमेण तपसेत्यनुवाकः सदा गोहरणमारणेषु··· क्रियमाणेषु ब्रह्मचारी जपति। श्मशाने जपति। उवध्ये श्मशानमवधाय ततो परिस्थितः "श्रमेण तपसे"त्यनुवाकं जपति। द्वादशरात्रं यावत् अहरहः ततः मृतो द्वेष्य इति जानीयात्। सू० २३।—श्वेतमृत्तिकामभिमन्त्र्य शुने प्रयच्छति। सू० २४।—पलाशमणिं सम्पात्याभिमन्त्र्य बध्नाति। सू० २५।--इङ्गिडं जुहोति। सू० २७।--"इदं तद्युज"—इति चिताग्न्यभिचारः। सू० २८।—"इदं तद्युज"—इति सूक्तेन मध्यमपरिभवापर्णेन फलीकरणाञ्जुहोति। यत्किंचासाविति सूक्तेन पञ्चर्चेन मध्यमपलाशेन फलीकरणाञ्जुहोति। सू० २९-३१।—बर्हिर्लवनादि प्रतिष्ठापनान्तं कृत्वा तमग्निं स्फोटयति शर अन्यमग्निं प्रणयति निरमुमिति सूक्तेन स्तरणं कृत्वा पुनर्मन्त्रेण स्तृणाति। "निरमुमि"ति सूक्तेनाभ्यातानान्तं कृत्वा इङ्गिडं जुहोति। सू० ३२।—वत्सखल्वायां कृत्वा तस्य वृषणैरपिधाप्य वाधकेन काष्ठेन हन्यात्। सू० ३५।--शत्रुं दृष्ट्वा जयति। सू० ३७।—विद्युद्धतवृक्षस्य समिध आदधाति। सू० ३८।--ऊर्ध्वशुष्कवृक्षसमिध आदधाति। सू० ४१-४३।—"असदन्गाव" इति चारक्तोशालि शकुनीक्षीरौदनं पक्वाभिमन्त्र्य द्वेष्याय प्रयच्छति भक्षार्थं। आमपात्रस्योपरि हस्तप्रक्षालनं करोति।

कण्डिका ॥ ४९ ॥

सू० १।—द्वेष्याभि मुखं विसृजति वृषोत्सर्गवत्। सू० २।—आश्वत्थीः स्वयं पतिताः समिध आदधाति। सू० ३-२७।—उदवज्राणां विधानमुच्यते। "इन्द्रस्यौज"—इति दूर्वाभवैर्घटं प्रक्षालयति। "जिष्णवे योगायेत्युत्तराभवैः षडुदकां सघटानुदकसमीपे निदधाति। "इदमहं यो मा प्राच्यां दिश" इति अष्टर्चेन कल्पजेन सूक्तेन उदकमध्ये निदधाति घटं। "इदमहमि"ति घटेनोदके इदमहमिति सूक्तेन घटमध्ये मुखं करोति। "इदमहं यो मा प्राच्यां दिश"इति सूक्तेन घटमुदकपूर्णं कृत्वा अपक्रामति। "इदमहमि"ति सूक्तेन उदकपूर्णं घटं मण्डपे स्थापयति एतदभिचारे उदकाहरणम्। येन विधानेन वज्रप्रहरणं क्रियते तदुच्यते "इन्द्रस्यौज०" इत्यादि सर्वं कृत्वा। इदमहमिति स्थापनान्तं कृत्वा "अग्नेर्भाग"-इत्याद्यष्टभिऋग्भिर्द्विधाकरणं। अर्धं घटे कृत्वा अर्धं भाजने करोति भाजनमग्नौ तापयति। घटमन्यस्मै पुरुषाय प्रदाय "अग्नेर्भाग"-इत्यष्टभिस्तापने मन्त्रः। बहिर्दक्षिणामुखं उपविश्य भाजनमग्रे कृत्वा "वातस्य रंहितस्य"—इति मन्त्रेण उदकं गृह्य। "सम-

भय"—इति सूक्तेन कल्पजेन सर्वेभ्यो भूतेभ्यो अभयवदनम्। "यो वा आपोऽपा"मिति वज्रप्रक्षेपः । "एता मनाधरा च परा च" इति कल्पजया ऋचाभाजनमुदकभूमौ निनयति "यं वयमि"ति सूक्तेनैव "अपामस्मै वज्र"मित्येकया एवमेव "इन्द्रस्यौज"-इत्यादि कर्तव्यं । तत्र रुद्रकृताः श्लोकाः—

प्रक्षालनं तथा योगो अप्सु पात्र निधापनं ।
अपोहनमनेनैव तन्निवेद्य पात्र पूरणम् ॥ १ ॥

विष्णोः क्रमोऽसीति द्वादशभिः प्रत्यृचं विष्णुक्रमान्क्रमते । शत्रोरभिमुखं । सवविधानेन बृहस्पतिशिरओदनं द्वेष्याय ददाति । "ममाग्ने वर्च"—इति सूक्तेन तं पृषातकेनोपसिच्य "तस्यौदनस्येत्यर्थं"—सूक्तेनाभिमन्त्र्य ददाति । सूक्तेनाभिमृते सति सूक्तेन सम्पातवन्तं करोति ।···उदेहि···नार्च···द्वेषस्तु अन्वाह—। समिद्धो शङ्कुसहितान् पाशानभिमन्त्र्य अरण्ये निदधाति । द्वेषस्य पदं वृश्चति । पाशान् अग्नेऽभ्यस्यति । आमपात्रस्योपरि द्वेष्यस्य हस्तप्रक्षालनं करोति । वृषभं सम्पात्य उत्सृजति शत्रुगृहानभिसृजति । रक्तशालिक्षीरौदनं सम्पात्याभिमन्त्र्य द्वेष्याय ददाति । शत्रुप्रतिकृतिं च मृन्मयां कृत्वा वेदिमध्ये ऊर्ध्वं स्थाणौ निबध्य···मूर्ध्निसम्पातानानयति । घृतेन पाचयति । "यस्मिन् पडुर्वीः पञ्च"इति उदवज्रान् प्रहरति उक्तेन विधानेन। "योऽन्नादोऽन्नपति"रित्यृचा द्वेष्यं मनसा ··आचामति स्वयं द्वेष्यस्य मरणं भवति । सू० २५ ।—यश्च गां पदा स्फुरति ऋगद्वयाधिकारः तृचेन द्वेष्यं दृष्ट्वा अन्वाह । सू० २६ ।—अवभृथे स्नात्वा "निर्दुर्मण्य"—इति सर्वौषधिभिरात्मानमभिमृशति । अभिचारं कृत्वा इमां कर्त्ता शान्तिं करोति । समाप्ता अभिचारपद्धतिः । मरणं बन्धनं वा प्रणिपात उन्मत्तभावो वा भवति । भद्रमतेन भाष्यकारदारिलमतेन च एभिः त्रिभिर्भाष्यकारैः कौशिकोविचारितः तस्य तस्य एते पदार्था भवन्ति। ततः श्लोकाः। दस्योमरणं व्यसनं चैव बन्धनं च विशेषतः । प्रणिपातोन्मत्तो वा देवोपहतिरेव च ।···उपाध्यायकवीश्वरेण नाम्नातोऽभिचारः कृतः । तुरुष्कमहुमदोपरिकारितः । पृथिव्यां दुष्टउत्पन्नः सर्वदा च विनाशयेत् । अधर्मसम्भवोदुष्टः प्रजाहिंसनतत्परः । तुरुष्कनाम्नापापिष्ठाः देवब्राह्मणहिंसकाः पृथिव्यां श्रीभोजदेव धर्मसंरक्षणार्थ च । देशे तु मालवके उत्पन्नः श्रीराजगृहेषु च ।"

कण्डिका ॥ ५० ॥

सू० १ ।—स्वस्त्ययनकर्मणां विधिं वक्ष्यामः यदा ग्रामे गच्छति तदा आचमनं कृत्वा···प्रथमं दक्षिणेन पादेन प्रकामति अध्वानं । सू० २ ।—गृहे वा क्षेत्रे वा अन्यत्र वा प्रक्षिपति । यत्र क्षिपति तत्राविनाशोभवति । द्विपदचतुष्पदादीनां स्वस्त्ययनं भवति । सू० ३ ।—दर्भादीनि तृणानि गृहे वा क्षेत्रे प्रक्षिपति । इन्द्र-

मुपतिष्ठते। सू० ४।—खड्गादिशस्त्रं सम्पात्य हस्तेन विमृज्याभिमंत्र्य धारयति। राज्ञे प्रयच्छति। सुखं भवति इत्यर्थः। सू० ५।—दिष्टया मुखं मीत्वा स्वपिति रात्रौ स्वस्त्ययनकामः। मध्यमाङ्गुल्याङ्गुष्ठाभ्यां। प्रदेशन्याङ्गुष्ठाभ्याम् प्रदेशीदिष्टीरित्युच्यते। सू० ६।—प्रभाते निद्रां त्यक्त्वा यदा उत्तिष्ठति तदा सूक्तं जपित्वा त्रीणि पदानि प्रक्रम्य तदा···प्रयोजनार्थं गच्छति। गच्छतां स्वस्तिर्भवति। सू० ७।—सुप्त्वोत्थाय··· भूमौ तिस्रो दिष्टीर्मीत्वा ततो गच्छति प्रयोजनार्थं स्वस्त्ययनकामः। दिष्टीः प्रादेशमात्रीः। सू० ८-९।—अथाध्वाने गच्छतां कर्म उच्यते। पथि गच्छन्तं सम्बलं सक्त्वादि प्रेतं पादावित्यृचा अभिमंत्र्य ब्राह्मणाय ददाति स्वस्त्ययनकामः। सू० १०। —"उपस्थास्त"-इत्यृचा ओदनसक्तून् वटकादीनि त्रीणि द्रव्याण्यभिमन्त्र्य भूमौ निक्षिपति। त्रीणि त्रीणि प्रसृतिर्वा अञ्जलीर्वा मुष्टीर्वा। पथि ततो गच्छति। स्वस्तिर्भवति सर्वस्य अनेन विधानेन। एतदध्वानकर्म समाप्तं। सू० ११।—अथ सर्वार्थं स्वस्त्ययनकर्म उच्यते। गृहे वा अथवा अरण्ये वा भये समुपस्थिते स्वस्त्ययनं नित्यं···कुर्वीत। सू० १२।—वणिक्कर्मलाभार्थमुच्यते। उत्थापयति विक्रययोग्यत्वात्।···लाभो भवति स्वस्तिर्भवति। सू० १३।—"येऽस्यां प्राचीदिगि"ति सूक्ताभ्यां···आज्यादित्रयोदशद्रव्याणि भवन्ति। पालाशादयो द्वाविंशतिर्वृक्षाणां समिध आदधाति। यत्र समिध आदधाति तत्र सर्वत्र एते समुचिता वा विकल्पिता वा भवन्ति। सू० १४।—भवा शर्वौमृडतमिति सूक्तेन चरुं जुहोति।···रुद्र भूत प्रेत राक्षस लोकपाल गृह देव महादेव गणाद्युपहताभिघाते स्वस्त्ययनं। समाप्तं महादेवाभिघाते स्वस्त्ययनं। सू० १५।—अथ शीघ्रेण पुण्यमङ्गलकर्मकरणे स्वस्त्ययनमुच्यते।···ब्राह्मणस्य शक्तुपिण्डान् पर्वस्वाध्याय अग्रेभूत्वाभिमन्त्र्य ततः प्रयच्छति-किमद्याहरिति पृच्छति। सू० १६।—स च शोभन मद्याह मङ्गल मद्याहरिति ब्राह्मणो वदति।···यदा शीघ्रे प्रयोजने कार्यं कर्त्तुमिच्छति तदा इदं कर्म कृत्वा ततः शान्तिकर्म करोति। सू० १७।—अथ सर्पादिस्वस्त्ययनमुच्यते। सर्पवृश्चिकद्विदंशकमशकभ्रमरभूमिकीटकृमयः। एतेषां भयं न भवति। "येऽस्यांस्थेति सूक्तेन···प्राचीदिगिति सूक्तेन युक्तयोः दिग्युक्तयोः मा नो देवा"इति सूक्तेन···सिक्तामभिमन्त्र्य शालां परितः किरति।···शर्करामभिमन्त्र्य शयने वा शालायां वा उर्वरायां वा गृहे वा वने वा ग्रामे वा तत्र परिकिरति। सू० १८— "येऽस्यां स्थे"ति तृणमालां युगछिद्रेण सम्पात्याभिमन्त्र्य द्वारे बध्नाति स्वस्त्ययन कामः। महानवम्यां दीपोत्सवे च शिष्टाचारः। गजमार्गे बध्नाति। महानवम्यामिदं जयकर्म। तृणमालां युगछिद्रेण सम्पात्य पथि वा पत्तनद्वारे वा गृहद्वारे वा बध्नाति। अहिभये वृश्चिकभये मशकभये भ्रमरसंघे कृमिभये। सू० १९।—"येऽस्यांस्थेति" शुष्कगोमयमभिमन्त्र्य गृहे विसृजि···स्तृणाति।सू०२०।—गोमयमभिमन्त्र्य पत्तनद्वारे

गृहद्वारे क्षेत्रे वा निखनति । सू० २१ ।—गोमयं अग्नौ । सू० २२ ।—"येऽस्यां-स्थे"ति–अपामार्गमञ्जरीमभिमन्त्र्य संभिनत्ति गृहे स्तृणाति ।···अपामार्गप्रसूनमभि-मन्त्र्य द्वारे निखनति । अपामार्गमञ्जरीं निखनति ग्राममध्ये । गुडूचीमभिमन्त्र्य नाना करोति । गृहे स्तृणाति । गुडुचीपादानभिमन्त्र्य निखनति । गुडुचीपादानग्नौ जुहोति । पराचीन मूलान् समाप्तानि मशकादीनां स्वस्त्ययनानि ।

कण्डिका ॥ ५१ ॥

सू० । १ ।—अथ व्याघ्रचौरवृकचरकसिंहारण्यकादीनां भये स्वस्त्ययनान्यु-च्यन्ते । गांपृष्ठतो गच्छति । कीलकं निखनन्नुद्घाटयन् गृहारण्यं गच्छति व्या-घ्रादि स्वस्त्ययनकामः । सू० २ ।—उदकघटमभिमन्त्र्य गोमचारे निनयति । ततः पांसुन्कूटतन्त्रं कृत्वा अर्धं दक्षिणेन हस्तेन विक्षिपति । इन्द्राय पाकयज्ञ विधानेन । सू० ४ ।—ये ऽस्यामिति सूक्तेन प्रत्यृचमुपतिष्ठते । सू० ५ ।—मध्ये पञ्च बलिहरणं···। सू० ७ ।—पर्वतदेवतायै अरण्ये पाकयज्ञविधानेनाज्यभागान्तं कृत्वा" ब्रह्मजज्ञानमनासा ये सहस्रधारेति सूक्तेन जुहोति" । हिमवते त्वा जुष्टं निर्वपामि हिमवते त्वा जुष्टं प्रोक्षामि हिमवन्तं गच्छतु हविः स्वाहेति । निकटं पर्वतं यजते । भवाशर्वौ मृडतमित्यर्थं सूक्तेन चरुं जुहोति । भवाय जुष्टं निर्वपामी-त्यादि । सू० ८ ।—भवाशर्वादिभ्यो देवताभ्यो निर्वापं कृत्वा बृहद् भाण्डके श्रपणं ।···एते सप्तपर्वतदेवताः । व्याघ्रचौरवृश्चिकहस्त्यारण्यकगवि इत्यादि-भये स्वस्त्ययनं । सू० ९ ।—गोष्ठकर्म व्याख्यास्यामः । गोशान्तेः पाकयज्ञं तन्त्रं कृत्वा इन्द्रदेवतायै ब्रह्मजज्ञानमनासा ये सहस्रधार इति सूक्तेन । भवाशर्वौ मृडत मिति सूक्तेन चरुं जुहोति ।···रुद्रदेवस्य चरोः हविरुच्छिष्टं यजमानोऽश्नाति । सू० ११ ।—प्रथमप्रसवे गवां शान्तिरुच्यते । ब्रह्मजज्ञानं···वत्सस्य वा वत्सिकाया वा मुखं म्रक्षति स्वस्त्ययनकामः । सू० १३ ।—शाखामुदकमभिमन्त्र्य गोभ्यो बहिरुदकधारां निनयति । सू० १४ ।—अथ पत्तनग्रामस्य गृहस्य शान्ति-रुच्यते । गृहकोणेषु निखनति चतुरः एकं मध्ये एकं गृहोपरि निदधाति । सू० १५ ।—अथात्र स्वस्त्ययनमुच्यते । सू० १६ ।—त्रीणि सस्यवल्ली अभिमन्त्र्य क्षेत्रमध्ये निखनति । समासमन्नव्याधिरक्षास्वस्त्ययनम् । सू० १७ ।—अथ मूषकपतङ्ग शलभहरिणरुरुशल्यादीनि सस्यविनाशकानि तेषां शान्तिरुच्यते । अभिक्रामति मूषिकादिस्थाने । सू० १९ ।—मूषकादिमुखं केशेन वन्धयित्वा क्षेत्रमध्ये निखनति । सू० २२ । तस्मिन्नहनि मौनं कुर्यादस्तमयनं यावत् । समाप्तं मूषकशलभपतङ्गटिट्टिभकीटकीटिकाहरिणरुरुशल्यकगोसेधागोकृम्यादिस्वस्त्य-यनम् ।

कण्डिका ॥ ५२ ॥

सू० १ ॥—आज्यं जुहोति । समिध आदधाति । पुरोडाशादि योऽयं सर्वत्र । सू० २ ॥—मन्थमभिमंत्र्य पथिकाय प्रयच्छति स्वस्त्ययनकामः । भक्तमभिमंत्र्य भक्षयति । समाप्ता ग्रामदूरगमनस्य शान्तिः । कलहदोषो न भवति । सू० ३ ॥—पुरुषबन्धने मोचनशान्तिरुच्यते "यस्यास्त"—इति चतुर्ऋचेन सूक्तेन येन बद्धः तत्सदृशं सम्पातवन्तं कृत्वा सूक्तसदृशं द्वितीयं च सम्पातवन्तं करोति । यत्ते देवीति तृचेन सूक्तेन निगडयुगलद्वयं च सम्पातवन्तं करोति । "विषाणापाशानि"ति चतुर्ऋचेन निगडयुगलद्वयं सम्पात्य एक मुक्तं निगडं चर्ममयं वा लोहमयं वा येन बद्धस्तन्मयं कृत्वा अभ्यातानाद्युत्तरतन्त्रं । समाप्तं बन्धनमोचनं । सू० ४ ।—वाचा बन्धनस्य मोचनमुच्यते । भूमिलेखां सम्पात्य तत उत्तरतन्त्रम् । समाप्तं बन्धनस्वस्त्ययनं बद्धो अनेन कर्मणा कृतेन मुच्यते बन्धनात् । सू० ५ ॥ अग्निदावरक्षार्थमुच्यते । उदकमभिमंत्र्य गर्त्ते प्रक्षिपति ··· उदकपूरणं करोति । सू० ६ ।—शालामध्ये द्वयो उदकमभिमंत्र्य गर्त्ते प्रक्षिपति । अग्निरक्षा भवति । सू० ७ ।—अग्न्युपसर्गे एतत्कर्म । सू० ८ ।—आयन इति सूक्तेन दिव्यमभिमंत्र्य गृह्णाति दिव्ये शुद्धयति तत्समापके दिव्ये । सू० ९ । अङ्गदग्धे उदकमभिमन्त्र्य प्रक्षालयति । अङ्गमारोग्यं भवति अङ्गे अग्निरक्षा । समाप्तानि अग्निदाहरक्षाणि । सू० १० ।—नावापेटकपट्टिकादिस्वस्त्ययनार्थोदकतरणार्थो रक्षा उच्यते ॥ नावादि अभिमंत्र्य ततश्चटन्ति उपविशन्ति । न कदाचिन्मज्जति क्वचित् । उदकरक्षार्थे दूरदेश गमने ॥ ११ ॥ सम्पातवतीं तृचेन नावं सम्पात्य । तत उत्तरतन्त्रं । समाप्तं दूरदेश गमने एतत्कर्म । तृचेन नौमणिं सम्पात्याभिमंत्र्य·· नाविकेभ्यो बध्नाति । ये नावं चटन्ति तेषां बन्धनं । सू० १२ ॥—अथ नष्टे द्रव्ये लाभकर्म उच्यते । उत्थापयति नष्टनिरीक्षणार्थं ॥ सू० १४ ॥—समाप्तं नष्टलाभकर्म ॥ १५ ॥ नमस्कृत्य द्यावापृथिवीभ्यामित्येकां जपित्वार्थसूक्तं कुर्वीत स्वस्त्ययनकामः । केचित्स्वस्त्ययन कामोपस्थानं···॥ सू० १६ ॥ सप्तप्रतीको अंहोलिङ्गगणः । एकैकस्य प्रतीकस्य होमः । त्रयोदश हविर्भिः प्रतीकविकल्पः । भोजनमभिमंत्र्य पाययति स्वस्त्ययनकामः । भक्षं भक्षयति । हविराज्यसमिधादि जुहोति ।···आप्लवनावसेचनाचमनादीनि यथासंभवं कर्त्तव्यानि । पापसंसर्गे व्याधिसंसर्गे वर्णसंसर्गे अन्यस्मिन्पापे स्वस्त्ययनं । अंहोलिङ्गेन विकल्पेन···हृदयमालभ्य जपं कृत्वा उपस्थानमादित्यस्य कुर्यात् तेनैव सूक्तेन···अभिमर्शनं पुरुषस्य अन्यस्य वा·· वृक्षगृहस्त्रीपुरुषादीनां स्वस्त्यनं क्रियते । अभिमर्शनं कृत्वा उपस्थानमादित्यस्य कुर्यात् ॥ १७ ॥ हविरभिमंत्र्य भक्षयति ।···स्वयमभिमंत्रणं करोति स्वयं हविषां भोजनमिति वचनात् ॥ यत्र क्वचिच्छान्तिः क्रियते तत्र सर्वत्र स्वस्त्ययनहोमं कुर्यात् । गृहे नगरे वा बहिर्वा पत्त-

ने वा ग्रामे पुरे वा सर्वत्र । समाप्तानि स्वस्त्ययनानि । सू० १८ ।—आयुष्यकर्मणां विधिं वक्ष्यामः ॥ सू० १९ ।—स्थालीपाकेन घृतपिण्डत्रयं कृत्वा सम्पात्याभिमंत्र्य घृतमश्नाति स्थालीपाकमश्नाति । सू० २१ ।—हिरण्यमणि युग्मकृष्णलं···त्रिगुणं कृत्वा सम्पात्याभिमंत्र्य बध्नाति । स्थालीपाके स्थापयित्वा स्थालीपाकमश्नाति । केचित्स्थालीपाके सम्पातं न कुर्वन्ति । अथ क्रमेण "यथाद्यौरि"त्यादि गोदान-मध्ये पठितं प्रथमं व्याख्यायते ।

कण्डिका ॥ ५३ ॥

सू० १ ।—अथ गोदानं सम्वत्सरे···यथाकुलधर्मेण वा कुर्यात् । सू० ८ ।—मातल्यन्तेन शान्त्युदकेन त्रिरेवाग्नि···सू० ९ ।—माणवकं । सू० १३ ।—उत्तर सम्पातान्दक्षिणतः सुहृदो हस्ते शकृत्पिण्डे आनयति । सू० १५–१६ ।—उदपात्रे पोथिकां गुडूचीं च प्रक्षिप्य ततः सम्पातः । शकृत्पिण्डे दूर्वां कृत्वा ततः सम्पातः । शान्त्युदकमुष्णोदकं चैकधाराभिः समासिच्य । सू० १८ । "अदितिःश्मश्रु" इति ओदनं ।

कण्डिका ॥ ५४ ॥

अत्र ब्राह्मणवाचनं वृद्धस्त्रीभिर्गीति च कारयेत् । सू० १ ।—अथ नापिताय प्रैषं ददाति । सू० ३ ।—क्षुरं मार्जयित्वा नापिताय प्रयच्छति पुनर्वपनार्थं । सू० ८ ।—वेद्युपरि प्रदक्षिणमग्निमनुपरिणीय ' सू० ९ ।—उपरितनं वस्त्रं गृह्णाति कर्त्ता । सू० १० ।—परिधानवस्त्रेण उपरि आच्छादयति माणवकं । सू० ११ ।—यथा इत्यादि प्रथमतो व्याख्यानं कृत्वा ततो गोदानं प्रारब्धम् । आयुष्यमंत्रा आयुष्यकर्ममध्ये पठिताः । सू० १२ ।— आज्यं जुहोति ।···समिध आदधाति··· पालाशादयः । पुरोडाशं···पयः···ओदनं···पायसं···पशुं जुहोति···आवपति । सू० १३ ।—पितुर्मन्त्रा न मातुः । सू० १४ ।—परिदानानि । गोदानं समाप्तम् । सप्तमे पञ्चमी कण्डिका । सू० १५ ।— अथ चूडाकरणमुच्यते–सम्वत्सरे द्विसम्वत्सरे वा गोदाने कृते पश्चाच्चूडाकरणं कार्यं पूर्वतन्त्रम् । शान्त्युदके तुभ्यमेवेति सूक्तमनु-योजयेत् । यत्र वपनं पठ्यते तत्र सर्वत्र गोदानविधानेन वपनं कुर्यादिति दारिलमतम्···।

कण्डिका ॥ ५५ ॥

सू० १।–२ गर्भपञ्चमे गर्भाष्टमे । वर्षे कुर्यादिति पैठीनसिः । वसन्ते ब्राह्मणमु-पनयीतेति च मीमांसायां । शान्त्युदके "आयातुमित्र" इति सूक्तमनुयोजयेत् । ततो अभ्यातानानि । ततः "आयातु मित्र" इति । "आयुर्दा" इति केचित् सूक्तेन

मूर्ध्नि सम्पातानानयन्ति। दक्षिणे पाणौ अश्म मण्डलवर्जं शान्त्युकमुष्णोदकं कृत्वा-तस्मिन्नुदपात्रे सम्पातानानयति। उत्तर सम्पातान् स्थालरूपे आनयति॥ सू० ४॥ वपनं करोति सकृद्दक्षिणे पिंजुलीवर्जं एवमुत्तरे शिरः पार्श्वे॥ सू० ८।— ब्रह्मचारी ब्रवीति। आह ब्रूहि। सू० १०।—तत आचार्यो ब्रवीति को नामासि ? किं गोत्र मिति ?। पुन र्ब्रह्मचारी ब्रवीति सोमदेव दत्त शर्म नामाहं अमुक सगोत्रोऽहं यथा संख्यप्रवरोऽहं॥ सू० ११।—पुनर्ब्रह्मचारी ब्रवीति॥ सू० १२॥—पुनराचार्य आह। सू० १३।—उदकाञ्जलिमादित्याय ददाति ब्रह्मचारी। सू० १४।...दक्षिणं पाणिं गृह्णाति आचार्यः। सू० १४।—आदित्यं निरीक्षते॥ सू० १६।—पूर्वाभि-मुखं ब्रह्मचारिणमुपवेश्यः...नाभिदेशं संस्पृश्य संस्तभ्य। सू० १७।—गणं जपति आचार्यः॥...

कण्डिका॥ ५६॥

सू० १।—मेखलां प्रवरां चतुःप्रवरां वा॥ बध्नाति। सू० २।—मित्रावरुण-योस्त्वेति श्येनोऽसीति च सूक्तेन ब्रह्मचारिणे प्रयच्छति॥ ३॥ ब्रह्मचारीदण्डं गृह्णा-ति। पुनर्मैत्विन्द्रियमिति। यज्ञोपवीतमभिमंत्र्य परिधत्ते मन्वादिभिःविहितं अहं रुद्रेभिरिति सूक्तं प्रत्यृचं ब्रह्मचारिणं वाचयति। सू० ७।—अथ व्रतग्रहणं करोति ब्रह्मचारिव्रतं द्वादशवार्षिकं। यथा स्मर्यमाणधर्मकं इत्याद्युक्तं आङ्गिरसकल्पे व्रतश्रावणं। अग्नये गुरवे च ब्रह्मचारिव्रतं निवेदयेत्। "अग्ने व्रतपते इति प्रत्यृचं अष्टौ समिध आदधाति। सू० १२।—अथ आचार्य आचारं कथयति। "माय-ज्ञायं कुरु इत्येवमादि आचारान्कथयति। सू० १३।—अथैनं भूतेभ्य इत्यादिभि-र्व्रीहियवशमीमभिमन्त्र्य मूर्ध्नि दद्यात्। सू० १६।—ब्रह्मचारिणमात्मसंमुखं करोत्याचार्यः। सू० १७।—समिध आदधाति। अभ्यातानानि हुत्वा "वाताज्जात"-इति सूक्तेन शंखमणिं सम्पात्याभिमन्त्र्य बध्नाति। उपनयनं समाप्तम्।

कण्डिका॥ ५७॥

सू० २१।—"मय्यग्र"इति पञ्चभिः पञ्चसमिध आदधाति। उपनयनाग्नौ नष्टे इदं प्रायश्चित्तं। अनेन विधिना पुनाराधानं ब्रह्मचारी करोति। इति ब्रह्मचारी-नाग्नौ अग्निपरिग्रहः। द्वादशरात्रं सावित्रीव्रतस्य न ग्रहणं नो दीक्षणं भवति द्वादश-रात्रं पयाशी भवति। त्रयोदशेऽहनि वेदव्रतं ददाति व्रतग्रहणं व्रतादानीयाः भवन्ति। सू० २२।—सायंप्रातरग्निकार्यमुच्यते। सू० ३१।—अथ ब्रह्मचारी उपनयना-नन्तरं मेधाजननमन्त्रैः आयुष्यमंत्रैश्चाज्यं जुहुयात्। ये त्रिषप्ता अहं रुद्रेभिस्त्वं नो मेधे द्यौश्च म इति। मेधा सम्पद्यते—

कण्डिका ॥ ५८ ॥

सू० १-२ ।—कर्णक्रोशन्तमनुमन्त्रयते । अक्षि स्फुरन्तमनुमन्त्रयते । दुःस्वप्नदर्शने स्वस्ति अनिष्टदर्शने च अद्भुतदर्शने च । सू० ३ ।—पुरुषशरीरमनुमन्त्रयते आयुष्यकामः । सू० ४ ।—ब्राह्मणोक्तमुच्यते । सप्तब्राह्मणानभीष्टान्नभोजनं कारयित्वा एकः प्राङ्मुख एको दक्षिणामुखः चत्वार उदङ्मुखाः "सर्वे उत देवा"—इति सूक्तेनाभिमृशन्ति पुरुषस्य शरीरं । समाप्तं ब्राह्मणोक्तमायुष्कामस्य । ऋषिहस्त उच्यते । "अन्तकाय मृत्यव"—इति सूक्तेन नाभेरूर्ध्वमधस्तादभिमन्त्रयते । द्विः सूक्तावृत्तिः । "आरभस्वे"ति-हृदयमभिमन्त्रयते-"आवतस्ते ब्राह्मणाय नम"-इति सूक्ताभ्यां दक्षिणकर्णमनुमन्त्रयते । समाप्त ऋषिहस्तः । सू० ५ ।—आयुष्कामस्य "कर्मणो वामि"ति-हस्तौ प्रक्षाल्य-"वि देवा"इति अभिमन्त्रयते । सू० ६-७ ।—आत्मानमनुमन्त्रयते आयुष्यकामः । सू० ८ ।—आयुष्कामा रक्षार्थे युद्धे नाशनं नैनं प्राप्नोति न शपथो न कृत्या नाभिशोचनं । सू० ९ ।— आयुष्कामरक्षार्थी उपनयने नित्यं बन्धनं । सू० १० ।—सूक्तेन सुवर्णरजतलोहं त्रीणि शकलानि एकत्र कृत्वा नवशालाकं मणिं त्रिवृत्तं कृत्वा सम्पात्याभिमन्त्र्यबध्नाति । सू० ११ । आयुष्यकाम आरोग्यकामः रक्षाकामः बालशरीरमनुमन्त्रयत । सू० १२ ।—अनुलोमं प्रलिम्पति । अप्रतीहारं । यो विकलेन्द्रियस्तस्येदं कर्म । सू० १३-१४ ।—पाययति । ततः पिता नाम करोति । अथ आचार्यो वा दक्षिणे कर्णे श्रावयति । नक्षत्रकल्पोक्तं नाम द्व्यक्षरं चतुरक्षरमित्यादि । सू० १७ ।—प्रच्छादयति । शिवे ते स्तामित्यादि । परिदानानि सिंहावलोकनन्यायेन गोदानमध्ये उक्तानि । अभ्यातानाद्युत्तरतन्त्रम् । ततः श्राद्धं । नामकरणं समाप्तम् । सू० १८ ।—चतुर्थे मासि पुण्याहान्ते निष्क्रामयति । ततः पूर्वोक्तानि परिदानानि ददाति श्राद्धं च । सू० १९ ।—अथान्नप्राशनं षष्ठे मासि प्राशनं कुर्यादिति पैठीनसिः सर्वस्यां स्मृतौ । पञ्चमे कुमार्या इति । सू० २०-२१ ।—गोदानवत्परिदानानि ददाति । नामकरणे निष्क्रमणे अन्नप्राशने च गोदानिकानि परिदानानि भवन्ति । इत्यन्नप्राशनं समाप्तम् । ऊनो वातिरिक्तो वा यः स्वशाखोदितो विधिस्तेनैव सर्वं परिपूर्णं न कुर्यात्पारतन्त्रिकं पश्चाच्छ्राद्धं सर्वेषु संस्कारेषु कुर्यादिति दारिलभाष्यकारस्याभिप्रायेण व्याख्यायत इति । श्राद्धं कृत्वा पश्चात्कर्मेति रुद्रभद्रौ ।··· सू० २२ । पुनरायुष्यकर्म उच्यते । सू० २३ ।—"विषासहि" मित्यनुवाकेनादित्यमुपतिष्ठते त्रिकालमायुष्यकामः । सू० २५ ।—"अग्निं ब्रूम"-इति सूक्तस्य "यन्मातली रथक्रीतमि"ति सर्वासां द्वितीयाव्यतिसङ्गेन यन्मातलीकर्तव्या ॥

कण्डिका ॥ ५९ ॥

अथ काम्यानां कर्मणां विधिं वक्ष्यामः। संभारलक्षणे मण्डपविधानमुक्तम्। गृहे वा कुर्यात् ॥ सू० १ ॥—चरुं जुहोति। शतवर्षपरिमित आयुर्भवति ॥ २॥ उपतिष्ठते विश्वान्देवान् ॥ ३ ॥ पुष्टिकामो द्रव्यवृद्धिकामः ॥ ४ ॥ सम्पच्छब्द उदयशब्द उच्यते ॥ ५ ॥ पुरुषादिबलकामो राजा नित्यं कुर्यात् ॥ ७ ॥ जुहोति इन्द्राय ग्रामकामः। इन्द्रमुपतिष्ठते ॥ ८ ॥ पालाशसमिध आदधाति। समानामुपस्तरणानि जुहोति। सू० ९ ।—चरुं जुहुयात्। भृशमिन्द्रमुपतिष्ठते। सू० १०। इन्द्रं यजते। कूपतड़ागवापीपुष्करिणीउदकमर्थी सेतुबन्धादिउदकार्थी एवंकामः। अथवा उपतिष्ठते। सू० ११ ।—इन्द्रं यजते। उपतिष्ठते ॥ सू० १२ ।—इन्द्रं यजते। उपतिष्ठते। एकोऽस्यां पृथिव्यां राजा भवति। एकाधिपत्यकामः। सू० १३ ।—इन्द्रं यजते। उपतिष्ठते। निखिलं राज्यं भवतीत्यर्थः। सू० १४ ।—इन्द्रं यजते। उपतिष्ठते। द्विपदचतुष्पदानामविनाशमित्यर्थः। सू० १५ ।—अग्निं यजते। उपतिष्ठते। सू० १६ ।—पृथिवीमग्निमन्तरिक्षं वायु द्यौः आदित्यः दिशः चन्द्रमाः। एता अष्टौ देवताः। अष्टौ चरवः। उपतिष्ठते सर्वकामः ॥ सू० १७ ।—यजते वा उपतिष्ठते वा सर्वकामः। सू० १८ ।—इन्द्रं'''अथर्वाणं''अदितिं देवान् बृहस्पतिं यजते वा उपतिष्ठते वा सर्वं कामः। "बृहस्पते सवितरि"त्येकया सुप्तं ब्रह्मचारिणमुत्थापयति। आदित्य उदिते सति प्रायश्चित्तमेतत्। सू० १९। मन्त्रोक्ता देवताः यजते उपतिष्ठते च सर्वकामः। सू० २१। सर्वलोकाधिपत्यकामः। सू० २२ ।—अभीष्टमन्नमभिमन्त्र्य भिक्षुकेभ्यः करोति। सू० २५। अथर्वाणं यजते उपतिष्ठते वा सर्वलोकाधिपत्यकामः। परिमोक्षः। गोदानिकं तन्त्रं परिधाननान्तं कृत्वा ततो-इदावत्सरायेति ततोऽभ्यातानानि। ऋचं सामेति। ततोऽभ्यातानान्तं हुत्वा दोषो गायेति—सूक्तेन भक्तं सम्पात्याभिमन्त्र्याश्नाति। सू० २६। व्रतं समाप्य व्रतविसर्जनं कृत्वा "अभयं-द्यावापृथिवी" इति यस्य ग्रामस्य नगरस्य वा अभयमिच्छति तस्य प्रतिदिशं। सू० २७। ज्योतिष्टोमे दीक्षिताय दण्डप्रदानं करोति ब्रह्मा। सू०२८। द्यावापृथिव्यौ यजते उपतिष्ठते वा विरिष्यति यदि विनाशोपस्थितं तदा इदं कर्म कुर्यात् ॥—

॥ इति सप्तमोऽध्यायः ॥

कण्डिका ॥ ६० ॥

अथ सवयज्ञानां विधानं व्याख्यास्यामः। संभृतेषु साविकेषु संभारेषु देवयजन मुक्तं। उदगयने। ऋषिमार्षेयं गुणयुक्तानृत्विजो वृणीते। एषः ऋत्विक्कल्पः।

उक्तो मधुपर्कः । एकादश्यां वरणं कृत्वा गोदानिकेन विधानेन केशश्मश्रुरोमनखानि वापयित्वा । केशवर्जं पत्नी नखानि कारयेत् । स्नातावहतवाससी भवतः । सुरभिणी भूत्वा दाता उपनयनवद् दण्डमेखलायज्ञोपवीती । त्रिरात्रं दीक्षाग्रहणं सह पत्न्या । अग्नये ब्रह्मणे गुरवे व्रतश्रावणं कृत्वा ततो व्रतादानीया अष्टौ समिध आदधाति । ततः कर्त्ता अभ्यातानाद्युत्तरतन्त्रं करोति । हविष्यभक्षणादि कर्ता कारयिता पत्नी च करोति । अथ चतुर्दश्यां प्रातर्यज्ञोपवीती शान्त्युदकं कृत्वा देवयजनं संप्रोक्ष्याकृति-लोष्टवल्मीकेनास्तीर्य दर्भैश्च गो अश्वाजाविलोमभिः । पलाशमयी अरणीद्वयेनाग्निं मन्थयेद्यजमानः । अग्ने जायस्वेति । सू० २०–२१ ।—पत्नी नाम यजमाननामग्रहण-मिति प्रथमे अर्धर्चे । सू० २३ । अग्नेऽजानिष्ठ इति त्रिभिः पादैर्जातं । अस्यै रयिमिति पादेन पत्नीमनुमन्त्रयते । सू० २४ ।—उत्तमं नाकमिति दातारं पादेन वाचयति । एवं ब्रह्मौदनिकमग्निं मथित्वा स्थण्डिलेऽग्निं कृत्वा "यद्देवा पूर्णहोमं जुहुयात् । पूर्ण-होमस्य विधानं शान्तिकल्पे उक्तं । "यद्देवा देवहेडनमित्यनुवाकेनाज्यं जुहुयात्समि-धोऽभ्यादध्यात् । शकलान् वा दध्यात् । एवं ब्रह्मौदनिकमग्निं संवत्सरं दीपयत्यहो-रात्रौ वा यथा कामी वा । संवत्सरं तु प्रशस्तं । सू० २५ ।—अथामावास्यायां प्रात-रुदकाहरणं करोति । ब्राह्मणीमलंकृतां साधुवादिनीं उदकघटं हस्ते गृहीतां प्रेषयति । सू० २८ ।—गृहद्वारे । सू० ३१–३२ ।—ततः "पुमान्पुंस" इति पादेन यजमानं आरोहयति । तत्र ह्वयस्वेति पादेन पत्नीं आह्वयीत । सू० ३३ ।—"यावन्तावग्ने प्रथममिति पादेन अपत्यानि अन्वाह्वयीत । सू० ३५ ।—उदकघटमनुनिपद्येते ॥

कण्डिका ॥ ६१ ॥

सू० १ ।—प्रतिदिशमुपतिष्ठते मन्त्रोक्तं ॥ सू० ४ ।—भूमौ स्थापयति सर्वाणि कर्माणि तेनोदकेन कुर्यात् ॥ सू० ५ ।—"पुनन्तु मा वायोः पूतो वैश्वानरो रश्मि-भि"रिति पवित्रगणः । एतेन दाता पत्नीमपत्यानि च···पवित्रेण प्रोक्षयेत् । सू० ६ ।—अथ निर्वापकरणं ॥ सू० ७ ।—ततोऽनडुहि व्रीहिं त्रीणि विभागानि करोति । ततो देवपितृमनुष्यत्रयं पत्नी अनजानत्यै प्रयच्छति । कर्त्रा प्रैषं ददाति । व्रीही-न्विभागेषु निधाय कर्ता "त्रेधा भागो निहित" इति त्रिभिः पादैः···अनुमन्त्रयते ॥ सू० ९ ।—यः पितृभागस्तेनावभृथान्ते वृद्धिश्राद्धं करोति ॥ सू० १३ ।—निरुप्तान् अभिमृशतः ॥ सू० १५–१७ ।–त्रीन्वरान्वृणीष्वेति दातृप्रैषं दत्त्वा एवं पत्न्यै ददाति । तौ "वृणन्तौ त्रयो वरा" इत्यर्धर्चेन प्रतिपत्न्यनुमन्त्रयते । दाता सर्वकर्मणां समृद्धिभिः प्रथमं वृणीते ॥ सू० २१ ।–ऊर्ध्वो नकस्येत्यर्धर्चेन मुसलमुच्छ्रयन्तीमनुमन्त्रयते ॥ २४ । उदूहन्ती ॥ सू० २६ ।—"अस्यै रयि"मिति पादेन । अवक्षिणन्ती ।—

कण्डिका ॥ ६२ ॥

सू० १ ।—पत्न्या दर्वीं ग्राहयति ।···सू० ३ । दर्व्यां कुंभ्यां ॥ सू० ४ ।—

तस्मिन् दर्विकृते शेषं—॥ सू० १५।—ओदनस्योपरि गर्तं करोति॥ सू०२०-२१।—“अत्यासरत्”—इत्यर्धर्चेनाभिसरन्तीं गामनुमन्त्रयते । “उपवत्सं”—इति पादेन वत्सं सर्जयति। वाश्यते गौरिति वाश्यमानामनुमन्त्रयते । व्यसृष्ट सुमना हिं करोतीति हिंकुर्वन्तीं । बधान…इति वत्सं बन्धयति । भुञ्जती निर्ज्येति नियोजयति । गोधुगुपसीदेति दोहायोपसादयति । दुग्धीत्यादिपदसहितेनार्धर्चेन दोहयति । सा धावत्वित्यर्धर्चेन विमुच्यमानां गामनुमन्त्रयते । “अतूर्णदत्तेत्यर्धर्चेन पुनः वत्सेन संसर्जयति ॥ सू० २२ ॥ एवं दोहयित्वा दुग्धेनौदनमवसिच्य । “इदं मे ज्योतिरिति”पादं दातारं वाचयति हिरण्यमधिदधाति। दाता सूक्तेन सर्वं सम्पातवन्तं करोति । “श्राम्यत” इति प्रभृतिभिर्वा दातृपत्न्यपत्यानि अन्वारम्भं करोति । रसैरुपसिच्य प्रतिगृहीते । दातोपवहति ॥ २४-३४ ॥

कण्डिका ॥ ६३ ॥

सू० १।—अथाथर्ववेदे ब्राह्मणानामाह्वानकालः । “दाता सोमराजन्नि”ति ऋचा चतुर आर्षेयान् भृग्वङ्गिरोविद आहूय। श्रुतं वा ॥ सू० ३-९ ।—अथ दाता व्रतं निवेद्य साविकव्रतं त्रिरात्रं यथाशास्त्रविहितमित्यादिव्रतश्रावणं । इदावत्सरायेति। इति ब्रह्मौदनप्रकृति सर्वसवविधानं समासं। अथर्ववेदविहिता यागा एते। आवसथ्याधाने सवयज्ञान् कृत्वा ततोऽग्न्याधानं कुर्यात्। ब्रह्मौदनं वा कुर्यात्। आधाने नित्यं सवदानम् ।—

कण्डिका ॥ ६४-६५-६६ ॥

सू० १।—द्वाविंशतिसवाः। सवयज्ञानां परिगणनं क्रियते। अग्ने जायस्वेत्यर्थसूक्तेन ब्रह्मौदनं ददाति । सू० १ ।—पुमान्पुंस इत्यनुवाकेन स्वर्गौदनं ददाति। सू०२। आशानामिति चतुः शराव सवं। सू० ३।—यद्राजान इति सूक्तेन अविसवं। सू० ४। अजो ह्यग्नेरजनिष्टेति सूक्तेन अजौदनसवं। सू० ५।—आनयैतामित्यर्थसूक्तेन पञ्चौदनसवं । सू० ६। —अघायतामित्यर्थसूक्तेन शतौदनसवं । सू० ७।—“ब्रह्मास्य शीर्षमि”ति सूक्तेन ब्रह्मास्यौदनसवं। सू०८ ।—यमौदनमिति सूक्तेनातिमृत्युं सवं। सू० ९।—“अनड्वान्दधारे”ति सूक्तेनाड्वाहं सवं । सू० १० ।—सूर्यस्य रश्मीनिति तिसृभिर्ऋग्भिः कर्कं सवम् । सू० ११ ।—आयं गौरिति तिसृभिर्ऋग्भिः पृश्निसवं। सू० १२ ।—अयं सहस्रमिति द्वाभ्यामृग्भ्यां पृश्निगां सवं। सू० १३।—देवा इममित्यृचा पौनःशिलं सवं। सू० १४ ।—पुनन्तु मेति सूक्तेन पवित्रं सवं। सू० १५।—कः पृश्निमित्यृचा उर्वरां सवं। सू० १६ ।—साहस्रत्वेष इति सूक्तेन ऋषभं सवं। सू० १७।—प्रजापतिश्चेति सूक्तेनानड्वाहं सवं। सू० १८।—नमस्ते जायमानायै इत्यर्थसूक्तेन वशासवं। सू० १९ ।—ददामीत्यनुवाकेन

वशासवं । सू० २० ।—उपमितामित्यर्थसूक्तेन शालासवं । सू० २१ ।—तस्यौदनस्येत्यर्थसूक्तेन बृहस्पतिसवं । सू० २२ ।—अभिचारकामस्य । सू० २३ ।—द्वाविंशतिः सवयज्ञाः संहितायां पठ्यन्ते स्वर्गौदनतन्त्रेण सर्वे कर्त्तव्याः ब्रह्मौदनतंत्रेण वा स्वर्गब्रह्मौदनौ तन्त्रमिति वचनात् । ॥ इति अष्टमोऽध्यायः ॥

कण्डिका ॥ ६९ ॥

सू० १ ।—अथ क्रव्यादशमनेन सह आवसथ्याध्यानं व्याख्यास्यामः ।··· दक्षिणतः पत्नी अधरारणिं गृह्णाति । उत्तरतो यजमान उत्तरारणिं । अरणिलक्षणे अरणिरुक्ता । योऽश्वत्थ इति द्वाभ्यां यजमानं वाचयति । अर्चयित्वा देहाद्धूपं चन्दनेन समालभते । उभयोर्वाग्यतस्तावत्पूर्णाहुतिविसर्जनं । सू० १७ ।—अरणिलक्षणे उक्तं मन्थनविधानं । सू० २०-२१ ।—उर्वश्यसीति मन्त्रेणोत्तरारणिमूलमधरारणिना संयोज्यं । पत्नी पश्चात्मुखी मन्थं धारयति पूर्वाभिमुखो यजमानो मन्थयति । सू० २२ ।—वैश्वानरमाह्वयति—

कण्डिका ॥ ७० ॥

सू० ८-९ । सत्यं बृहदिति नवभिः । शन्ति वेति दशम्या । उदायुषेति द्वाभ्यां । अग्ने गृहत इति वैतानाग्निमुपतिष्ठते ।

कण्डिका ॥ ७१ ॥

सू० १ ।—क्रव्यादं विभजति । सू० ३ ।—नडोनलः । सू० ४ । अपावृत्येति षड्भि ऋंग्भिः क्रव्यादं गृहीत्वा एकाग्निं प्रदक्षिणं कृत्वा दक्षिणस्यां दिशि निष्क्रम्य ततो गृहाद्द्वारे भूमौ निदधाति । सू० ८ ।—अन्येभ्यस्त्वा पुरुषेभ्य इति तिस्रः··· हिरण्यपाणिमिति तिसृभिः···यथा शमयति तथा होतव्यं । भस्मनि होमः । सू० ९-११ ।—जीर्णपिटके क्रव्यादं भस्म कृत्वा शान्त्युदकेन सुशान्तं कृत्वा भूमिस्थानं कृत्वा दग्धं खात्वा पिटके प्रक्षिप्य ततः "परं मृत्यो" इत्यृचा पिटकं यजमानशिरसि ददाति । सू० १३-१५ ।—सीसं नदीफेनं लोहमृत्तिकां एतानि त्रीणि द्रव्याणि यजमानहस्ताञ्जलौ दत्त्वा । सू० १६ ।—अस्मिन्वयमिति द्वे । सीसे मृढ्वमिति द्वे ।···उदकसहितेन सीसेन हस्तप्रक्षालनं करोति ।···सू० १८ ।—प्राङ्मुखा आगच्छन्ति । सू० १९ । लोपयति ।···२० । द्वितीयया कूद्या पदानि लोपयति सप्त नदी आ नावः । सू० २१ ।—प्रागुदक्षिणस्यां दिशि कूदीं प्रक्षिपति—

कण्डिका ॥ ७२ ॥

सू० १ ।—तस्मिन् अकर्णमश्मानमुदकमध्ये निदधाति—सू० ५ ।—सर्वे शालायां प्रविशन्ति । केचिद् गृहद्वारे महाशान्तिं चतुर्गणीमुच्चैरभिनिगदन्ति ।

सू० ७ ।—वृषभमनुमन्त्रयते अनड्वाहं वा······ । सू० १० ।—शयने उपविश्यानुमन्त्रयते । सू० ११ ।—त्राणि दर्भपवित्राणि एकत्र बद्ध्वा पिञ्जुलीमुच्यते । केचिदेकं । सू० १२ ।—इमे जीवा अविधवा सुजामय आञ्जनेन सर्पिषेति पिञ्जुलीं उदकघटोपरि भ्रामयित्वा यजमानादिपुरुषेभ्यः प्रयच्छति एकैकस्मै पुरुषाय त्रिस्त्राच्छः। सू० १३–१४ ।—एतैर्मन्त्रैराज्यं जुहोति । सू० १६ ।—शर्करान् स्वयं क्षिन्दितान् ···बद्ध्वा अग्नेरुपनिदधाति । सू० २० ।—यजमानोऽशित्वा···दद्यात् । इति आवसथ्याधानं समाप्तम् । दक्षिणा । ॥ इति नवमोऽध्यायः ॥ ९ ॥

कण्डिका ॥ ७५ ॥

सू० १४ ।—अधर्चेनावगाह्य । सू० २५ ।—उशतीरिति सप्तभिर्ऋग्भिरुष्णोदकपात्रं सम्पात्य ।

कण्डिका ॥ ७६ ॥

सू० २–३ ।—तद्वासस्तुम्बरदण्डेन गृहीत्वा गोवाटे प्रक्षिपति । सू० ५ ।—शतदन्तेषीकेन । सू० ६–१० ।–उपाध्याय कौतुकगृहे प्रविश्य कुमारीं हस्ते गृहीत्वा निर्णयति। सू० १८ ।—त्रिरविछिन्नन्ति । सू० १९ ।—वृषाकपि ब्राह्मणाः सूर्यं पठन्ति सूर्यपाठं । सू० २१ ।—प्राच्यः । सू० २२ ।—लेखासूपरि कुमारी पदानि ददाति। सू० २४ ।—कुमारी कटिवेष्टितं योक्त्रम् । सू० २९ ।—इति विवाहः समाप्तः ।

कण्डिका ॥ ७७ ॥

उद्वाह उच्यते सू० २ ।—पथि गच्छतो वरवध्वोरग्रे कर्त्ता व्रजति । सू०३—मा विदन्नृक्षरा इति द्वाभ्यामध्वानं दक्षिणेन प्रक्रामति । सू० ४ ।—तदा इदं प्रायश्चित्तं । सू० ६ ।—सम्पृच्छत शपथो नवयन्त सुशीम । सू० ८ ।—लोष्टं प्रक्षिप्य तत उत्तरन्ति । सू० ११ ।—व्रीहियवादिक्षेत्रं दृष्ट्वा वने वृक्षान् नद्यादिषु च । सू० १३ ।—यदि पथि स्वपिति । सू० १९ ।—वधूमास्थापयति । सू० २० ।—गृहे प्रवेशयति । सू० २३ ।—गृहदेवतां नमस्कारं कुर्वतीं—

कण्डिका ॥ ७८ ॥

सू० ५ ।—बल्वजस्तृते चर्मणि वधूमारोहयति । सू० ९ ।—कुमाराय फलमोदकादि दत्वा तत उत्थापयति । सू० १०–११ ।—अष्टर्चं कल्पजं सूक्तं । आगच्छत इति तृचं सूक्तं । सविता प्रसवानामिति सूक्तं । एतैः सूक्तैराज्यं जुह्वद्वरवध्वोः क्रमेण सम्पातानानयति ।

कण्डिका ॥ ७९ ॥

सू० १० ।—मदुघमणिं पिष्ट्वा औक्षे प्रक्षिप्य अभिमंत्र्य परस्परं वरवधू समा-

लभेते । आह पैठीनसिश्लोकः । "आवपेत्सुरभि गन्धान् । क्षीरे सर्पिष्यथोदके । एतद्देवनमित्याहुः । औक्षं तु मधुना सह" । सू० ११ । वरः प्रजननदेशं स्पृशति । सू० १२ ।—खट्वायां उत्थापयति । सू० १६ ।—यदि चतुर्थिकाकर्ममध्ये रजस्वला वधूर्भवति तदेदं प्रायश्चित्तं । सू० २१ ।–कर्त्ता । सू० २५ ।—स्नानं सर्वे कुर्वन्ति । सू० ३० ।—पितृगृहे यदि रोदनं भवति तदा इदं प्रायश्चित्तं । सू० ३३ ।—आवृताः प्राजापत्या इति शूद्रस्य विवाहे तूष्णीं सर्वं कार्यं । इति दशमोऽध्यायः ॥१०॥

कण्डिका ॥ ८० ॥

सू० १ ।—अथान्त्येष्टिपितृमेधं व्याख्यास्यामः । सू० २ ।—वृक्षवर्जिते देशे दहनं कर्तव्यमिति ब्राह्मणोक्तं । आहिताग्नेरेकाग्नेश्चायं संस्कारः । सू० ३ ।—मुमूर्षन्तमग्निशालायां आवसथ्यशालायां वा शालातृणानि आस्तीर्य तेषूपरि दर्भैस्तृणाति । सू० ५ ।–अथ यदि काकपिपीलिकासर्पव्याघ्रशृङ्गी श्वापदादिषु दंष्ट्रादिदंशदोषात् म्रियते तदा इदं प्रायश्चित्तमुच्यते । "यत्ते कृष्णशकुनीत्यृचा तस्य दुष्टव्रणमग्निना दहति । सू० १० ।—सप्तगोत्रिणः स्पर्शं न कुर्वन्ति । सू० १२ ।—अथ शान्त्युदकं करोतीति कर्त्ता न सकलप्रतीकत्रयेण ओषधित्रयेण च मातृनामप्रतीकत्रयं शान्त्युदके आवपति । सू० १६ ।—स्रजोग्निं हरन्ति । सू० १९ ।—एकाग्नौ च उषाः कुर्वन्ति । सू० २३ ।–अथ देशान्तरमृते आहिताग्नेश्च कर्म उच्यते । सू० २६ ।—दर्शपौर्णमासयोर्विधानमुच्यते । सू० २८ ।—तिल्पिञ्जानां इध्माग्रहणं । सू० ३० ।—देशान्तरमृतस्य दर्भाज्याग्निहोत्रं वा समारोपणं समाप्तम् । सू० ३१ ।—अथ प्रकृतमुच्यते उत्थापनं । सू० ३४ ।—वृषभौ अभिमन्त्र्य शकटे युनक्ति अन्यः शयने पुरुषान् वा । सू० ३५ ।—अतिद्रवेत्यष्टौ ऋचो हरिणीत्युच्यते । दहनदेशे नीयमानं हरिणीभिरभिमन्त्रयते । सू० ३६ ।—कर्त्ता अग्नयः प्रेतस्याग्रे कृत्वाभिमन्त्रयते । सू० ४८ ।—वेदयष्टिं प्रेतहस्ताद् गृह्णाति पुत्रः ॥४९॥ धनुर्हस्तादिति क्षत्रियहस्तात् । सू० ५० ।—अङ्कुं हस्तादितिमन्त्रविकारं कृत्वा । सू० ५३ ।—केचित्प्रतिदिशं शिरः कुर्वन्ति । सू० ५५ । आचार्योऽनुमन्त्रयते ।

कण्डिका ॥ ८१ ॥

सू० २१ ।—गां निर्ऋतिदेशे जघनप्रदेशे लकुटेन घातयित्वा । हन्यमानां गामुपवेश्य । सू० ४५ ।—उपतिष्ठते । सू० ४८ ।—समाप्तं दहनकर्म ।—

कण्डिका ॥ ८२ ॥

अथ प्रथमे दिवसे पुत्रगोत्रिणां शान्तिरुच्यते । सू० ५ ।—सर्वे बान्धवाः ।

सू० ९।—एकविंशति दर्भपिजूलीर्नद्यां ह्रदे वा आवपति। सू० १७।—यवानाल-भते। सू० १९।—अप नः शोशुचदिति सूक्ताभ्यां शाम्याकीः समिध आद-धाति। सू० २०।—बान्धवाः। सू० २१।—अथ द्वितीयेऽहनि कर्मोच्यते। दिवो नभ इत्यृचाग्निं प्रज्वाल्य स्थालीपाकं सक्तुस्सर्वहुतं करोति। सू० २४।—समासं द्व्यहकर्म। सू० २५।—तृतीये नास्ति कर्म। चतुर्थेऽहनि कर्मोच्यते···। श्वक्तिकं-शुक्तिकं। सू० २९।—ततः संचयनं करोति। सू० ३३।—समासं संचयनं चतुर्थेऽहनि केचिद्यवीयः प्रथमानि कर्माणि कुर्वन्ति। तथा च माहकिः—

कण्डिका॥ ८३॥

अथ पितृमेध उच्यते। संवत्सरे कुर्यादिति श्रुतिः। अथवा संवत्सरमध्ये। सू० ३।—शतछिद्रं सहस्रच्छिद्रं द्वितीयं मृन्मये द्वे कुर्यात्। सू० ४।—द्वे जीर्ण-वाससी नीललोहितसूत्रे प्रसिद्धे प्रसव्यं रज्जुं। इति पितृनिधानसंभाराः। सू० ५।—अथ पितृनिधानकाल उच्यते। सू० ९।—अथावसानमस्थिगृहमुच्यते तत्स्थानमुच्यते। सू० १३।—अथ चतुर्दश्यां इदं कर्म। सू० १७।—संप्रोक्ष-ण्यौ। सू० २१।—अस्थिनाशे प्रायश्चित्तकर्मोच्यते। अस्थिनाशे तद्देशात्पां-सून्गृहीत्वावसानं समोप्य तत उत्थापयति। सू० ३४।—अथवा त्रीणि शतानि षष्टिश्च पलाशत्सरुप्रान्तैः पुरुषं कल्पयित्वा तत उत्थापनीभिरुत्थाप्य हरिणीभिर्हं-रेयुः। शरीरनाशे दग्धे वैतत्प्रायश्चित्तं भवति। सू० २५।—मण्डपः···तस्योत्तर-द्वारं दक्षिणद्वारं कुर्यात्। सू० २७।—अस्थीनि मण्डपे प्रवेशयति।—

कण्डिका॥ ८४॥

सू०। ६।—सयवस्य चरोः सर्वे स्वगोत्रजा भोजनं कुर्वन्ति। सू० ८। अथ प्रैषं ददाति गोत्रिणां। वीणां वादयेत्। वाद्यानि वादयेत्। सू० १३-१४—अथा-मावस्यायाः प्रभाते कर्मोच्यते। तान्यस्थीनि मण्डपादुत्थाप्य हरिणीभिर्हरेयुः। ततः पादे निधाय। अथ विधानमुच्यते। पश्चात् पूर्वकृतेभ्यः पितृभ्यः। सू०१५।—प्रागदक्षिणां दिशमभिमुखमारभ्याणि उत्तरस्यां दिशि समाप्यन्ते—

कण्डिका॥ ८५॥

सू० १।—अथ प्रमाणमुच्यते। सू० ४।—एवं विधं मण्डपं मिमीते। सू० ८।—अयुग्मानि कुर्यात्। परिमण्डलानि वर्तुलानि। चतुरस्राणि वाश्मशानि कार्याणि विकल्पेन शौनकिनां। सू० २०।—जीर्णवस्त्रगास्तृणाति। सू० २२। जीर्णवस्त्रं स्तृणाति ततो द्वितीयं परिचैलवस्त्रं। सू० २३।—तत्रैव बर्हिर्धारयित्वा अग्नेः कर्म भविष्यति। तेन वस्त्रेण उक्तो होमः स्तरणं च। सू० २४।—सर्वाण्य-स्थीनि तस्मिन् गर्ते निवपति। सू० २५।—कुले ज्येष्ठो अस्थीनि यथापरु···।

सू० २७ ।—"यास्ते धाना"–इति द्वे धाना धेनुरित्येका एतास्ते असौ धेनव इत्येका यास्ते धान्य अस्त्वित्येका एताभिस्तिलमिश्रधानाः'''अस्थिषूपरि आदधाति''' ।

कण्डिका ॥ ८६ ॥

सू० १ ।—तान्यस्थीनि गर्तस्थितानि । सू० २ ।–द्वौ चरू'''अष्टौ चरवः प्रतिदिशं दधाति । सू० ४ ।—एकं मध्ये निधाय ततोऽभिमन्त्रयते प्रतिमन्त्रं क्षीरादिपूर्णा मन्त्रोक्ता अपूपाः पिधानाः सर्वे कर्तव्याः प्रसव्या दातव्याः । सू० ५ ।—अस्थीनि । सू० ६ ।-मध्यमपलाशपत्रैः शतच्छिद्रसहस्रच्छिद्रादि चरवश्च । सर्वं आच्छादयन्ति ॥ १० ॥ शिलाभिर्विषमाभिरिष्टकाभिर्वा प्रसव्यं चिन्वन्ति । श्मशानं । सू० १४ ।—शरस्तम्बस्य अन्तर्हितमघमिति मंत्रेण कटिकामभिमन्त्र्य ग्रामश्मशानमन्तर्धानं करोति । सू०१५ ।—अष्टाङ्गुलां कटिकां प्रसव्यं कुशेन त्रिः परिषिच्य भ्रामयित्वा सिञ्चति पश्चिमायां दिशि स्फाटयन्ति । सू० १६ ।—समेत विश्व इत्यनया ऋचा सर्वे बान्धवाः परिषिञ्चन्ति ध्रुवनान्युपयच्छन्ते । त्रिः प्रसव्यं परिकीर्णकेश्यः परियन्ति दक्षिणानुरूनाघ्नाना इति ध्रुवनानि । सू० १७ ।'''इन्द्र-क्रतुमित्यन्तं । एतैः पश्चात्स्थिता उपतिष्ठन्ते कर्ता गोत्रिणश्च । सू० १८ ।—समाप्तं श्मशाने चित्तस्य कर्म । सू० १९ ।–शुभकर्म । सीसे मृड्ढ्वमित्यादि क्रव्याच्छमनेन व्याख्यातं । सू० २२ ।—पदानि लोपयति । सू० २८ ।—सप्तशर्करा पाणिष्वावपते इत्यादि'''तासां धूमं भक्षयन्ति इत्येवमन्तं सर्वं कुर्वन्ति गोत्रिणः । सू० २९। वैवस्वतं स्थालीपाकं श्रपयित्वा इत्यादि यमव्रतान्तं सर्वं भवति ॥

कण्डिका ॥ ८७ ॥

सू० ८ । त्रीनधो मुष्टीन्निर्वपति'''। सू० १४ । तिर्यगङ्गुलिं—। सू० १५ ।–अवागङ्गुलिं । सू० २७ ।—एताभिर्बर्हिस्तृणाति बर्हिषि आयवनं करोति । सू० २८ ।–आ यत पितर इत्यृचा आच्य जान्वित्यृचा संविशन्त्वित्यृचा एतैस्तिलान्विकीर्य ।

कण्डिका ॥ ८८ ॥

सू० १ ।—चरुमभिघारयति । सू० ६ ।—संवर्हिरक्तमिति सदर्भास्तण्डुलाञ्जुहोति । ततः पर्युक्षणं । सू० १४ ।—पिञ्जूलीर्घृताक्ताः पिण्डेषु निदधाति । सू० १८ ।—अत्र पितर इति प्रतिपिण्डं जपति । सू० २० ।—त्रींस्त्रीन्प्राणायामान् कुर्यात् । सू० २१ ।—पिण्डेषूपतिष्ठन्ते । सू० २९ ।—यन्न इदमिति मनो न्वा ह्वामहेति सूक्तं हृदये अन्वालभ्य जपेत् ।

कण्डिका ॥ ८९ ॥

सू० १६ । —गृह्योप्यनाहिताग्नेर्होमः । सू० १४ । —इदं मे कृतमस्तीति मंत्रेणाग्निमुपतिष्ठते यस्मात्कोशादिति । इति पिण्डपितृयज्ञः समाप्तः ॥ ११ ॥

॥ इति एकादशोऽध्यायः ॥

कण्डिका ॥ ९० ॥

सू० १ ।—अथ मधुपर्कं उच्यते । आचार्ये गृहमागते इदं कर्म करोति । सू० ९ ।—सूक्तं जपित्वा पुनराचार्यं उदकमभिमंत्रयते ।

कण्डिका ॥ ९२ ॥

सू० १४ ।—आचार्यो ब्रूते तृणानि गौरस्त्विति । तृणानि ददाति गवे । सू० २५ ।—भूयसो भूयस्मेति मंत्रेण ॥— ॥ इति द्वादशोऽध्यायः ॥ १२ ॥

कण्डिका ॥ ९३ ॥

अद्भुतकर्मपरिभाषा उच्यन्ते । ''' लोकविरुद्धं दृश्यते यत्तदद्भुतमित्युच्यते । अद्भुतशान्तिर्यत्र न क्रियते तत्र दोषो भवति । अद्भुतं यत्र भवति तत्पराभवति विनश्यति । विनाशार्थे अद्भुतं देवाः सृजन्ति । सू० ९ ।—श्रौषस्थामनुदित्यां '' उषामनुदित्यां । सू० १० ।—दारुणसंवत्सरे दुर्भिक्षे मारके वा । सू० १३ ।—देवतेषु'''सू० २१ ।—धेनुर्धेनुं धयत्यां । सू०२२ ।—आकाशफेनं पिबति । सू० २६।—अनाज्ञातमद्भुतं दृश्यते । यदद्भुतेन पठितं तदनाज्ञातमद्भुतमथवालौकिकं जुगुप्सितं वा अदृष्टं वा । सू० ३२ ।—यूपो । सू० ३४ ।—धूमकेतुः सप्तऋषीन् । सू० ३६ ।—मांसमुखो । सू० ३७ ।—अनग्नावभासे । सू० ३८ ।—श्वसति । सू० ४० ।—प्रास्योऽग्निः । सू० ४२ ।—कुम्भोदधाने—

कण्डिका ॥ ९४—१२० ॥

१०० क०—सू० ३ ।—शकधूममिति सूक्तेनाज्यं जुहुयात् । विषासहिमित्यनुवाकेन । रोहितैरुपतिष्ठते । १०३—अवर्षणे ग्रहनक्षत्राणां समापेक्षे'''शान्तिः । १०४—सू० २ ।—या असुरा इति द्वाभ्यां ।—१०५—या असुरा ।—१०६ ।—सीतामध्ये लाङ्गलसंसर्गे पुच्छसंसर्गे च ।—११५ ।—सू० १ ।—पुरुषो वा आकाशफेनं भक्षयति ।—११६ । सू० ३—४ ।—पिपीलिकायां शान्तिः समाप्ता । अथ पिपीलिकाभिचार उच्यते—११८ ।—अथ मधुजालके गृहे लग्ने शान्तिरुच्यन्ते—११९ । अथ सर्वाद्भुतेषु शान्तिरुच्यते । भार्गव्याणि । गार्ग्याणि । बार्हस्पत्याद्भुतानि । महाऽद्भुतानि औशनसाद्भुतानि । यद् ग्रंथे न पठ्यते तत्सर्वमनाज्ञातमित्युच्यते । यदपि परिशिष्टेषु पठ्यते । इतिहासपुराणज्योतिःशास्त्रे अश्ववैद्यके नरवैद्यकेषु पठितेषु अद्भुतेषु सर्वाद्भुतेषु एषा शान्तिः । अथवा महाशान्तिरमृता घृतकम्बलकोटिहोम सर्वाद्भुतेषु कौशिकअपठितेषु एषा शान्तिः । महाशान्तिर्वा विकल्पात् इति भाष्यकारः । इति त्रयोदशोऽध्यायश्चतुर्दशश्च ॥ १३ ॥ १४ ॥

शुद्धिपत्रम् ॥

—❀—

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
१७	५	सूर्य्योदयनतः	सूर्य्योदयतः
,,	१२	हाम	होम
१९	१०	शमा	शमी
,,	१२	यजकर्ताक	यज्ञ कर्ता को
,,	१३	कम	कर्म
,,	१५	प्रयाग	प्रयोग
२०	३	प्रमन्दा	प्रमन्दो
,,	६	तल	तिल
,,	६	प्रिङ्ग	प्रियङ्गु
२१	७	वनस्पतानिति	वनस्पतीनिति
,,	१९	श्रोत्रियाय	श्रोत्राय
२२	७	जिह्वा	जिह्वां
,,	१८	अथव	अथर्व
२३	२७	आग्रयण	आग्रहायण
२५	१६	मथ्न	मन्थ
२६	११	लोभानि	लोमानि
,,	१३	॥ ६२ ॥	॥ २ ॥
२७	९	॥ ६ ॥	॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥
,,	१०	लोमणि	लोममणि
,,	१३	अङ्गल	अङ्गुल
,,	१७	किलासमये	किलासमजे
२८	६	सर्मिध	समिध
३१	२१	अङ्गर	अङ्गार
३५	१	भूतो	भृतो

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
४९	१७	अभिमंत्रण	अभिमंत्रण
५१	४	निवति	निर्वपति
५५	२८	बहुमूल	बहुमूत्र
५६	१३	मूस्त्र	मूस
५६	१७	अग्निमंत्रण	अभिमंत्रण
,,	२४	उपर	ऊपर
५७	४	भूमि	भूमिं
५८	१७	अवसेचत	अवसेचन
,,	,,	जलोद्रक	जलोद्रके
५९	११	हाथ धनुष को	हाथ में धनुष को लेकर
६३	२०	ओलनी	ओलती
६९	१४	विस्रिगी	विलिगी
७०	२१	शीर	शीभ
७५	२३	सिंचन कर	सिञ्चन करे
८०	१६	तेहतीसवी	तेतीसवीं
८४	२९	पैहाने	पैताने
८६	२७	॥ ७ ॥	॥ १७ ॥
,,	२९	॥ ११ ॥	॥ १८ ॥
९१	१५	अकवीन	अकवन
९६	१६	सत	सूत
९७	२२	पिवे	पीवे
१०९	५	बभूथ	बभूव
१११	५	मन्याशायां	मन्याशालायां
११२	२३	पांशों	पाशों
१२८	१०	गडूजी	गुडूची
१२९	२६	ही	हो
१३५	१४	माता और पिता माता	माता और पिता
१५०	१५	भूमिका	भूमिको
१५६	१७	दाता देवे	देवे
१६२	१०	सव	सबको

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
१६२	११	सव	सवको
,,	१२		
,,	१३		
,,	१४		
,,	१५		
,,	१६		
,,	१७		
,,	१८		
१६४	२४	सद्सठ	सरसठ
१६५	१९	यजमा को	यजमान से
१५९	२४	रवि	रवीं
,,	२७	रवि	रवीं
१७४	१८	पुतावे	न बुझावे
१८३	१८	कमर इजर	कमर में इजार
१९०	२३	हय	यह
२०७	१७	कह	कहे
२०९	१८	नावे	नाव को धरे
२१८	२४	भो	भोः
२३१	२६	चारवी	चौथी
२३४	२२	आठहवी	आठवीं
२४३	२३	वन के आध टीका संग्रह शुद्धा शुद्धि	वन के आधे
९	८	मध्यमधर	मध्यमा धर
२४	२७	अमिमृ	अभिमृ
२५	२५	काराणि	द्वाराणि
२५	३०	मृगारव	मृगाखर
३०	१६	तदक्षन्	तद्वदत्
३०	२२	चिन्स्याद्या	चित्त्याद्या
३१	२३	वा प्रताप	वा प्रतापयति
३१	२८	यांस्वे	यां स्वे
३१	२९	न शिश्नस्य	शिश्नस्य

विज्ञापन ।

प्रत्येक बड़े २ रोगों, भूत, प्रेतादिक उपद्रवों, जादू टोनादिको दूर करना, इनकी अचूक दवा, वेदोक्त यन्त्र, आभिमंत्रित बूटियों द्वारा रोगों को दूर करना, युद्ध, मोकद्मा, की जीत होगी। इत्यादि।

———❀❀❀———

१ मृतवत्सा रोग—गर्भ या जन्मते ही या छोटे या स्याने होने पर बच्चे मर जाया करते ।

२ वन्ध्या—अनेक प्रकार की होती है। इनको नहीं जानने से लोग प्रारब्ध पर तकेया करके निरुपाय हो बैठ जाते हैं।

३ सन्तान न होना, जन्म भर दुःखी रहना—प्रेतादि के आवेश से, डाइन के करतूत से, शाप से, पूर्व-जन्म कृत पाप से, तथा अन्यान्य अज्ञात कारणों से, ऐसा होता है।

४ सूतिका को—बच्चा होते समय ऐसी पीड़ा होने लगती जो ३-४ दिन तक उसकी मरण की दशा हो जाती या तो मरजाया करती या उसका डाक्टर द्वारा औपरे-शन होता है, ऐसी स्त्री ३ प्रकार की होती है। विकृतगर्भा, (टेढ़ा मेढ़ा, उलटा) मूढ़गर्भा (पता नहीं लगता कि क्या कारण है) और मृतगर्भा (पेट ही में बच्चा मरजाता) में बहुत ख़र्च करने पर अत्यल्पसंख्यकों की जान बच जाती है। अधिकांश की मृत्यु ही हो जाती है।

५ प्रेत, भूत, पिशाच, व चूडैल, यक्ष (जिन्न) अप्सरा (परी) आदि के आवेश से प्रायः स्त्रियां बालक और छोटे बच्चे तथा कतिपय पुरुष भी दुःखी होते हैं।

६ भूतादि आविष्ट व्यक्ति रोगयुक्त होने पर, रोगों की दवा करते करते, आविष्ट रोगी मरजाते परन्तु केवल दवा से रोगी अच्छे नहीं हो पाते) जब तक भूतादि को यन्त्रादि अलौकिक शक्ति से काम न लिया जाय।

७ बहुत सी स्त्रियाँ, पुरुष, बालक, आदि प्रयोग से वशी करण, पागलपन, उच्चाटन, मारण, मोहन आदि का प्रयोग करने पर लोग बेकार हो जाते हैं।

८ जिन्न, परी, जबरदस्त प्रेत, विनायक जो मामूली मन्त्र प्रयोक्ता से नहीं हटते, मकान, पाखाना, स्कूल, आदि में भी बदमास प्रेत लोगोंको कष्ट पहुँचाते हैं।

बहुत से नये मकान बनवा कर लोग उनमें रह नहीं पाते-रहने से आ जन्म दुःखी या बहुत से मरने लगते हैं।

कतिपय रोगों का नाम—कोष्ठबद्ध (कब्ज), अतीसार (बहुत दस्त होना या आंव), पाण्डु (कामला), तक्षण (कठिन ज्वर), काश, पामन् (चर्मरोग, खुजली), बलास (क्षयरोग, थैसिस) कुष्ठ व्याधि, रक्त स्राव (खून बहना) प्रस्राव बन्द (पेशाबबन्द), वक्षःपीड़ा, क्षेत्रिय रोग (Hiriditary diseases) गठिया (पक्षाघात) कृमिरोग (मनुष्य का), कृमिरोग (पशुका)।

नष्टवीर्य, विष, सर्पविष, क्षत (जख्म) नेत्र की बीमारी, बालों का उड़-जाना, शोथ, गण्डमाला, शूल रोग, यक्ष्मा (तपेदिक), पागलपन, धातुक्षीणता, वातव्याधि। इत्यादि अनेक रोग जिनका इलाज करने पर भी भला नहीं होता हो।

पाञ्चभौतिक शरीर या स्थूल शरीर, लिङ्गशरीर और कारण शरीर-ये तीन शरीर होते हैं। आयुर्वेद, एलो पैथिक, होमिओपैथिक आदि का जो इलाज या दवा करायी जाती है वह केवल भौतिक वा स्थूल शरीर का ही इलाज होता है। यह बात जानने की है जो रोग तीन प्रकार से अच्छा किया जाता है। दवा देकर (खिलाकर, सूंघाकर, लगाकर, सूई देकर, घाव को चीर कर, मलहमादि से) यह तो हुआ एक प्रकार। दूसरा प्रकार मन्त्रों से झाड़ कर, तीसरा यन्त्र वा एक जड़ी के उपयोग से पहिले प्रकार से जो इलाज होता है वह कम सफल होता-प्रत्युत अनाड़ी वैद्य, डाक्टर से काम पड़ा तो मुक्ति हो जाती है या शरीर बेकार हो जाता, हमारे आर्य्य पूज्य महर्षियों ने अथर्ववेदादि द्वारा प्रत्येक रोगों को मन्त्रों से यन्त्रों द्वारा और केवल एक २ जड़ी के उपयोग से छुड़ाने का उपाय बतलाया है आज मुझे ८१ वर्ष की उमर हुई एक समय मुझको चित्रकूट जाने का संयोग हुआ। और वहां एक मुझे सिद्ध साधु का दर्शन हुआ जो वेद का भी ज्ञाता थे इन से १ सप्ताह संग हुआ इनके द्वारा हमको हिन्दू धर्म, मन्त्र, तन्त्र, यन्त्रादि का रहस्य मालूम हुआ। इन्हीं कारणों से हमने अपने अन्तिम जीवन में जनता की सेवा करने के विचार से यह विज्ञापन दिया है कि सर्व साधारण इस कार्य्यालय से पत्र व्यवहार कर इन अलौकिक शक्ति निहित यन्त्र, मन्त्र, जड़ियों से फायदा उठावें। केवल एक जड़ी का दाम एवं इसके काम बताते हैं। स्त्रियों को बच्चा जनने समय जो असह्य कष्ट होता है प्रत्युत बहुतों को मृत्यु तक हो जाया करती। चाहे जिस प्रकार का कष्ट हो—इस जड़ी से प्रसव दुःख न होकर बच्चा मरा या जिन्दा अवश्य वेदना रहित दश मिनट के भीतर गर्भ से निकल बाहर हो जावेगा। जड़ी का दाम २॥) डाक व्यय सहित। इसको पत्थर पर घस कर सूतिका स्त्री अपने दोनों हाथों में लगा कर ५ मिनट तक एक दृष्टि से देखेगी इतने ही में बच्चा सुख पूर्वक बाहर आयेगा। स्मरण रहे कि घड़ी में ५ मिनट से अधिक समय न हो, अन्यथा स्त्री का आन्त्र सहित बाहर हो जावेगा और-यह जड़ी उपविष है इसलिये शीघ्र ही हाथों को साबुन आदि

से भलीभांति साफ कर लेना चाहिये–दाम २॥) रु० है। इसमें ५ सूतिका का काम चलेगा और किसी पुरुष के धातु क्षीणता चाहे असाध्य हो, उसका यन्त्र, दवा, तरकीब दाम ५) और थैसिस–जो १ सालके भीतर का हो। यन्त्र, दवा, तरकीब १०)। बाकी रोगों का हाल लिखकर जवाबो टिकट या पोस्टकार्ड भेजना। पत्र लिखते समय रोगी या दुःखी व्यक्ति स्त्री हो या पुरुष उसको उमर, जाति, शरीर का रंग, स्वभाव हो सके तो उसका फोटो एवं पत्र को उसके दहीने (पुरुष) या बायें हाथ (यदि स्त्री हो) से स्पर्श करा कर भेजना चाहिये। रोगी किस धर्म को मानने वाला है, मांस खानेवाला है या निरामिष, ईश्वर में उसे विश्वास है या नास्तिक है। इत्यादि बातें लिखनी चाहिये। लिफाफा के भीतर तोन पैसे या डेढ़ आने का टिकट जवाव के लिये -)॥ पैसे का टिकट यों ≡)॥ का टिकट अवश्य भेजना चाहिये। पत्र हिन्दी, संस्कृत या अंग्रेजी में होना चाहिये। एवं अपना पता पूरा देना चाहिये।

ठाकुर गणेशदत्त सिंह,

शास्त्रप्रकाशभवन, मधुरापुर,

डाक, बिदूदूपुर बाजार।

जि. मुज़फ्फरपुर, (बिहार)।